पतनंचसाधारणोधर्मः तदाहवृत्तिकारः तेनकाकतीयंनामाकस्माद्पतनंचित्रीकरणमुच्यतइति ततश्चाभकाकागमनतालपतनसमाग
मनरूपस्यपतनतालरूपकाकवधरूपस्यचउपमानस्यानुपादानात्तत्पदार्थोपमायांसुपमानलोपः समासार्थोपमायांवाचकोपमानलोपः भवे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वकिमिति वृत्तो वयमिदमिति तृतीयपादपाठेऽन्यपार्थोपमायां धर्मोपमानलोपः समासार्थोपमायां धर्मोपमानवाचकलोपः अत्र धर्मलोपमात्रमैहिकं य
त्पालयसे धर्मं धर्मो च निग्रहेण च सर्वैराघवशार्दूल धर्मस्त्वामभिरक्षतु अत्र राघवः शार्दूल इवेत्यर्थेऽपि नंयाद्वादिभिः सामान्यप्रयोगाद्इति समा
से धर्मवाचकयोर्लोपः अत्र वाचकलोपवद्धर्मलोपोऽपि शास्त्रीयः सामान्यप्रयोगस्यैवैतत्समासानुशासनात् धर्मवाचकलुप्तायां धर्मलोपस्यैहिक
त्वमपि संभवति यथा नरा यं सेवमानानां संसारोऽप्यपवर्गति तेजगत्यभजन्मर्त्यश्चंचावन्मकलाधरं अत्रापवर्गइवाचरतीत्यर्थेऽपवर्गतीत्याचा
रार्थस्यैहिकत्वोलोपाद्वंचकवद्धर्मस्यापिलोपः चंचेत्यत्रचंचात्यायुरुपइवेत्यस्मिन्नर्थेइनंप्रतिकृतावितिविहितस्यकलोऽत्रमनुष्यइतिलुप्तिवा
नाद्वाचकलोपोधर्मलोपश्च - अत्यश्लोकस्यपद्मकालामुरवसपः संसारोऽप्यपवर्गति नंशंभजन्मर्त्यश्चंवैचान्महिताकृतेरिति पाठे नोभयवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विधर्मस्य भ्रवरामपि संभवति रूपयौवनलावण्यस्पृहणीयतराकृतिः पुरतो हरिणाक्षीणामेष पुष्पायुधीयति· अत्र वाचकोपमेययोरभावः रूप
यौवनेत्यादिस्त्रिविशेषणसामर्थ्यात्स्वात्मानं पुष्पायुधमिवोच्चरतीत्यस्यार्थस्य गम्यमानत्वात्· स्वात्मनश्चोपमेयस्य लोपः कवेरौद्धिकः· नचैवं इत्यु
पमेयस्योपादानमस्तीति शंकनीयं कर्मविभक्त्यभावेन पुष्पायुधीयतीत्यत्रोपमेयानामनर्थकत्वात्· अत्रैव हरिणाक्ष्य इव क्षिणीइवापतेभ्यः क्षिणी
भासामित्यस्मिन्नर्थे नृशिष्टे हरिणाक्षीणामिति पदे धर्मोपमानवाचकानां लोपः सर्वोऽप्ययं सप्तम्युपमानपूर्वपदस्येत्यादिसूत्रकृतस्य लोपः
त्रिलोपे धर्मलोपस्तैर्द्विको वा संभवति· यथा यद्वोगरामस्य चेति श्लोकस्य द्वितीयपाठे समासार्थोपमायाम्· स्वेतुम्नायामष्टौ पक्षाः प्रद
र्शिताः काव्यप्रकाशिकाकारादिभिस्तु पूर्वाचार्याः षड्विधाः वृत्तापास्तधर्मलुप्तादिष्वंतरभेदेन कैश्चिदेकोनविंशतिरन्यैर्विंशतिर्विधाः प्रदर्शि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ना: नञ्तपविभाग: पूर्वाणावद्विविधा श्रौत्यार्थाच सादृश्यमात्रवाचकयथेवादिशब्दनीश्रौती सादृश्यविशिष्टधर्मिपर्यंतत्वसदृशसंकाशादिशब्दवत्यार्थी द्विविधा
पिमात्रेसमासेतद्धितेचेत्येवंषड्विधा पूर्वाणि धर्मनञ्ज्ञापि पूर्वाणवदेवविभागवती किंतु श्रौतीतद्धितेनसंभवतीत्येवंचविधा वाचकलक्षणाकर्मकर्तृसाधनो:
कर्माधिकरणावचो: क्विपि तिनौसमासेचेत्येवंसप्तविधा उपमाननञ्ज्ञावाक्यसमासयोर्द्विविधा धर्मवाचकनञ्ज्ञाक्विप्समासयोर्द्विविधा धर्मोपमाननञ्ज्ञावा
क्यसमासयोर्द्विविधा उपमेयवाचकनञ्ज्ञाक्यमेकविधा धर्मवाचकोपमाननञ्ज्ञासमासस्यैकविधेति यदाहु: पूर्वाणि नञ्ज्ञासप्तविधा श्रौत्यार्थीचेति तेपुन:
द्विविधेपथमावाक्येसमासे तद्धितेभवेत् तद्धत्वञ्ज्ञापिधर्मस्यलोपेश्रौतीनतद्धिते इत्यादिलोपेद्विविधेतत्पुरुषेचिचकाः तथातिनौसमासेचसप्त
धैषाप्रकीर्तिता उपमानस्यलोपेनद्विधावाक्यसमासयो: इत्यादिधर्मलोपेनद्विविधाक्विप्समासयो: धर्मोपमानयोर्लोपेवाक्यगाचसमासगा

64

राम:
२१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इवादेरुपमेयस्य द्वयोर्लोपेभवेत्क्वचि वादिधर्मोपमानानां लोपे तेषां समासगेति · अत्रोदाहरणानि तन्मतरीत्या संग्रहश्लोकाभिर्निरूप्यंते · यस्याज्ञाशि
रसोद्यतेसुमनसां वृन्दैर्यथामालिकावध्नाम्युच्चनियः पशुनिवत्तनान्यस्याभवद्वैभवं · हृष्टंशोवधिनासमंहृदिभजन्त्यानन्दसारोपमंयंधन्याः शशिवस
मत्रवपुषेनस्मेनमः शंभवे · अत्रवध्नाविपरणादिर्हीता · तत्रप्रथमवाक्ये वाक्यगाप्रौती · द्वितीयवाक्ये समासगाप्रौती · इवेननित्यसमासोविभक्त्य
लोपः पूर्वपदप्रकृतिस्वरत्वंचेतिवार्त्तिकमुक्तं तेनपशुनिवेत्यस्यसमासपदत्वात् · तृतीयवाक्ये तद्धितगाप्रौती · भवद्वदितिषष्ठीसमर्थाद्ध
तेसत्रतस्येवेतिसूत्रेणाइवार्थेविहितत्वात् · हृष्टंशोवधिनासमंहृदिभजन्तीत्यत्र वाक्यगाआर्थी · आनंदसारोपममित्यत्रसमासगाआर्थी · हृष्ट
मितिविशेषणामत्राप्यपेक्ष्यते · अन्यथाधर्मत्रयैवस्यात्रपूरणी · शशिवदित्यत्रतद्धितगाआर्थी · तत्रत्यवनेसेननन्त्यं क्रियाचेहतिरितिनृत्या

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्थे विहितत्वात्. मूर्त्तिर्यथानवमुधावनभिन्नशाविकरणप्रभामुखदृश्यश्च जटासहिष्णुः. शंखाक्षिकांचननिभं पदमङ्कुशेषं पयस्यैषमेस्तहृदिदैवतसार्वभौमः. भ
त्रपंचविधापि धर्मेतुप्रादर्शिता. तत्रमूर्त्तिर्यथानवमुधेतिवाक्यगाप्रौती. वलभिन्नशाविकरणप्रभेतिचसमासगाचप्रौती. उभयत्रापिभातीत्यादिक्रि
याप्रयोगेसैवसाधारणोधर्मइतिधर्मेतुप्रानभवेत्. अतस्तत्प्रयोगः. प्रौतीतुधर्मेतुप्रातद्धितेनसंभवति. षष्ठीसमर्थात्तत्रमीसमर्थाद्वाइत्यर्थेविहि
तवतेर्धर्मोपादानंविनाऽन्वयसौकर्याभावात्. नत्ववाच्यपिवेदेतिकृतावित्यधिकारेइत्यर्थेविहितस्यतद्धितस्यधर्मोपादानंविनापिनैराकांक्ष्यमस्तिकु
ग्राहीयाबुद्धिः. द्वौलेपंदधिपौंडरीकमुखमितिवर्णनात्. अतस्तत्रप्रौतीधर्मेतुप्रातद्धितेऽर्थाद्गृहीतइति. इवेवतिकृतावित्यधिकारेविहित
प्रत्ययानांतुत्यार्थेस्वविधानात्. अन्यथातेषांसादृश्यविशिष्टधर्मिपर्यन्तत्वाभावेनकुग्राहीयाबुद्धिरित्याद्युपमेयसामानाधिकरण्याभावात्तादृश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विधानमपि सदृशपर्यवसानिसामानाधिकरण्यपदर्शनादिति सूत्रे इत्यत्र हस्तान्न विरुध्यते · सुसदृशश्चेत्यादिवाक्यत्रये क्रमेणार्थाविवक्षया समासगतद्धित
गाच · अत्रुदेरपि तत्र ईषदसमाप्तौ विहितेषिदेरपवत्वयः सादृश्येप्रयुज्यते · सोपि सामानाधिकरण्यात्सदृशपर्यवसायी नन्वसदृशादिशब्दयो
गे सादृश्यविशिष्टधर्मिपर्यन्तत्वादार्थमिदम् · सादृश्यादिशब्दयोगे कथं क्रियाप्रीतिरत आर्थी · यथा · परस्पराक्षिसादृश्यमदूरोज्जितवर्त्मस्वन्यान्वेषु
पदृश्यमेस्यं हृत्यवद्धदृष्टिमद्भुत्यादौ आर्थ्येव · तत्र तद्धितप्रकृत्यार्थधर्मिपर्यन्ताभिधानपूर्वकमेव भावप्रत्ययेन सादृश्याभिधानात् · वस्तुतः प्रीतेरेवेति कुतः ·
तत्र तद्धितप्रकृत्यार्थधर्मिपर्यन्ताभिधानेपि प्रधानप्रत्ययाभिहितस्य सादृश्यस्यैव वाक्यार्थत्वापत्त्यात् · यथा इषदसमाप्तिपदिमनसिजः कीटतांगत
नष्टः स्वान्तेयोन्तः पुरीयत्यथभजनकृतस्तं कुमारीयतिप्रकृ · अतस्तं भायतेयस्त्रिभुवनभवनेकोक्तिलालापिनीयं वामांगेकल्पवल्लीभ्रयतिदुवनयद्रूपा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मलांतमपि · अत्र समासविधायिवाचकलक्षणानि दर्शितानि · तत्र सीयमिव यस्य पत्नीत्यर्थे दीयदर्शीमिति कर्मधारयलुगिकोऽस्य वनस्य इत्यर्थे कीटनाशमिति कर्मधारयलुगिस्यांते
अंतःपुरस्य वाचरतीत्यर्थे अंतःपुरीयती त्यधिकरणाकारचिकुमारं स्कंदमिव वाचरतीत्यर्थे कुमारीयती त्यिकर्मकर्मणि त्रिभुवनस्योत्तरौ मूलस्तंभस्य वाचरतीत्य
र्थे मूलस्तंभायते इति कर्मकाडि · कोकिलस्य वालवतीत्यर्थे कोकिलालापिनी तिप्रतीतौ कुवलयमिव रूपमस्य त्यर्थे कुवलयरूपमस्य लोचनमस्य त्यर्थे च क्रमे
णावाचकलक्षणानि दृष्टव्यानि · सुजनं पुरस्त्रियोत्तमे चित्तमस्य दयहायचापलं यस्य संप्रियहितं न दृष्टं येन नापि सदृशं निशम्यते · अत्र यस्य समाप
तिसमासे येन सदृशमिति यावेचोपमानलक्षणानि विधायिदर्शितानि · वृथा मम भ्रमन्त्यहो मन स्थितेन महेश्वरे भुजो त्तितेन किं मम स्वयोत्थवालित
लसः पदं पुरत्रयः सदा तदंघ्रिपंकजद्वये चकोरकीयतां स्थिरं मदानने शशिप्रभे · अत्रावशिष्टानि विधायिलक्षणानि दर्शितानि · तत्र द्वितीयपादे वाक्यस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मासयोर्धर्मोपमानलुप्ताद्विविधा-तृतीयपादेऽक्षिप्तसमासयोर्धर्मवाचकलुप्ताद्विविधा-चकोरकीयातिति वाचकोपमेयलुप्ता-शशिप्रभइति धर्मोपमानवाचकलुप्ताक्रमेणाइ
ष्टया-एवमयं पूर्वार्धलुप्तविभागो वाक्यसमासप्रत्ययविशेषगोचरतयाप्रदर्शितः शास्त्रव्युत्पत्तिकौशलप्रदर्शनपरोतानीवालंकारशास्त्रमुपाश्रयतामर्हति-नचालु
प्तानामयं समासस्येनविभागः-तथाहि-धर्मलुप्तावाक्यसमासतद्धितेषुप्रदर्शितादिर्भावेपिदृश्यते-पटुपटुर्देवदत्तइति-अत्रहिप्रकारेगुणवचनस्येतिसाद
ष्टेद्विर्भावविधानात्पटुसदृशइत्यर्थः-योहिशास्त्रादिषु पटुरेवपटुवदभिनयतिसउच्यतेपटुपटुरिति-तत्रावदिमेवाक्येधर्मलुप्त-कर्मधारयवदुत्तरे
ष्टितिसमासवद्भावविधानेनैकपदप्रसिद्धेः-अतएवसमासेपिधर्मलुप्तेयं-वाचकलुप्तायामिविनाकैश्चित्वाद्विधादर्शितातिनासहापरैः सप्तविधा
द्विप्तद्धितयोरपिदृश्यते-यद्यत्तानांसुखमयः संसारोप्यपवर्गति-तंशंभुमजन्मर्त्यंश्चंचैवात्महिताकृतेरिति विवृतमेतत्प्रसंगात् वाक्यसमासयोरु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पमानलुप्तापि दर्शिता · उपनतमेतमेतदकस्मात्तदीयतकाकतालीयमिति तद्धितेपि दृश्यते · वाचकोपमानलुप्तास्वरूपतस्तनोपहता · सापि काकतालीयप्रकृतिभू
तेसमासे दृश्यते · धर्मोपमानलुप्तापि तद्धितेकाकतालीयमित्यत्र दृश्यते · धर्मवाचकलुप्ताद्धि उपमानयोरिव तद्धितेपि दृश्यते · तंजगात्यभजन्तर्मश्चवाचं
द्रकलाधरमिति हि प्राग्दाहृतम् · तस्माल्लुप्तविभागे दिङ्मात्रप्रदर्शनमेवेदं प्राचां न तु समासस्येनविभागः · येत्वन्येकाव्यालोकादिषु उपमायाः प्रकार
भेददर्शितास्ते सर्वे तेष्वेवद्रष्टव्याः · दर्शिताश्चेतपिलेदानीं लक्ष्यलक्षणविचारप्रस्तावे · रूपकप्रकरणे चास्याः प्रकारभेदानकांश्चिद्दर्शयिष्यामः ·
पुनश्चेयमुपमा संक्षेपतस्त्रिविधा · क्वचित्तत्त्ववैचित्र्यमात्रविश्रान्ता यथा · सच्छिन्नमूलः क्षतजेनरेणुभिरादौ · क्वचित्क्रियार्थोपपादनपरा · यथा · अ
नेतरत्नप्रभवस्य यस्येत्यादौ · यथा वा · विश्रब्धघातदोषः स्वयं धावद्वनस्पतीरकोपकरः वनतरुसंगाधनिर्विहरिनिद्रातस्करः करिणः ! क्वचिद्गोपप

67

राम:
२३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धाना. साचर्यस्य वस्तुलंकारस्य रूपतया त्रैविध्यात्त्रिविधा। तत्र वस्तुध्वनिर्यथा. दर्पाभ्यर्थांधगजकुंभकपाटकूटसंक्रांतिनिघ्नघनशोणितबिंदुशोणाशोचिः
वीरैर्व्यलोकिपुष्पिकोपकषायकान्तिः कालीकटाक्षइव यस्य करेकुपाणः अत्र कुपाणस्य कुपितकालीकटाक्षसादृश्यवर्णनेन सकलरिपुबलक्षय
क्षणादेव करिष्यत इति वस्तुव्यज्यते अलंकारध्वनिर्यथा. यत्प्रसिद्धविकसितेन्दुहिमकरकिरणाच्छादधवले भ्रमरइव पुंडरीके विराजते विष्णुपद
मेतत्. अत्रोपमालंकारेणायं द्वासः पुण्डरीकवद्वैष्णवस्य भ्रमरवदस्य च प्रतीतेराभ्यामभिरतोरनुरूपस्य लक्षणोपमालंकारोव्यज्यते. रसध्वनि
र्यथा विस्तरोदाहृतः क्वचिदेकत्रैव त्रिविधोपि ध्वनिर्दृश्यते. यथा. पद्मपत्रनलिनीपत्रे बलाकापरिदृश्यते. हरिन्मणिमये पात्रे भुक्तिरेव प्रतिष्ठिता. कि
मावयोः संकेतस्थानं भविष्यतीति प्रष्टुमनुमनसोर्जनयमक्षमितिनपृच्छतश्च प्रच्छन्नकञ्चुकस्याभिप्रायमिंगितेन विदितवत्याविदग्धया।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संकेतस्थानस्तवनार्थमिदं वचनम् अत्रपक्षपत्रस्थितवलाकायामरकतपात्रप्रतिष्ठितसुक्तिकासाहचर्यात्तेनतस्यास्तद्वनिश्चलत्वप्रतीतेरश्चलत्वं मन्यते तेन
ननत्रदेशस्थमिर्ननत्वं व्यञ्जयतइतिवस्तुध्वनिः तत्राश्चतदेवसंकेतस्थानमावयोरितिप्रकाशमानत्वलक्षितलक्षणार्थप्रकाशमरूपलक्षणालंकारध्वनिः एवंत
दभिप्रायानुसारेणधर्मिणामपरस्परप्रतिभावोभिव्यक्तनइतिरसध्वनिश्च नतुरसादिध्वनिरसंलक्ष्यक्रमव्यंग्यइतिप्रसिद्धिः कथमत्रनस्यात्तुरसानेनव्यंग्यपत्रोच्यते भे
वंयत्रविभावानुभावादिवशादभुभाविनीरसानिव्यक्तिस्तत्रासंलक्ष्यक्रमता अन्यत्रतुरसादिध्वनिरपिसंलक्ष्यक्रमएव तदुक्तमभिनवगुप्ताचार्यैः यद्यप्योरसना
दिरर्थोध्वन्यमानस्तथापिनासौवाक्यकदाचिदपिनथापिनसर्वोऽसंलक्ष्यक्रमस्यविषयइति अतएवध्वनिकारेणापि एवंचादिनिदेवर्षिपार्थेयिनुरवोमुखी-लीलाक
मलपत्रालिशास्त्रयामासपार्वती इत्यत्रलज्जाव्यंजकभावमनुरसानव्यंग्यमुदाजहार अथोपमाव्यंग्यस्य संगारवसाधनयप्रकर्षेते तत्रशब्दशक्तिमूलो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पमाध्वनिर्यथा · किरतिप्रकरांगवांप्रकामंमुमनः स्वच्छतरनिधौकलानाम् · कतिचिकलयंतियत्रबोधंकतिचित्रेतिमनस्वभावस्य · एकस्मादुरोर्वि
द्यांशिक्षमाणांतां केचित्प्रगल्भतेनान्येइति विशेषो बोधकस्यगुरोस्तेषुतेषुबोधनविशेषकृतोनभवतिकिंतुतत्स्वभावकृतः · इत्यस्मिन्नर्थे
प्रकृतेऽप्रकृतार्थस्योपमानत्वकल्पनयाऽत्रैवसुपमाध्वनिः · यथाचन्द्रेकिरणानांप्रकरेजविशेषेणासर्वपुष्पेषुविकिरतिकानिचिद्विकसंति
नान्यानीत्येषविशेषस्तत्रपुष्पस्वभावकृतएव · ननुचंद्रस्यकिरणाविकिरणविशेषकृतः · एवंगुरौसर्वशिष्येषुअविशेषेणाद्यायंविकिर
तिषुबोधनविशेषोपितत्रस्वभावकृतएवेत्यत्रशिष्याणांगोमुमनःकलानिधिशब्दानांवर्णादिपर्यायपरित्यसहिष्णुत्वाच्छब्दशक्तिमूला
नुरणानरूपध्वनिः - अर्थशक्तिमूलोवस्तूनोपमाध्वनिर्यथा · वाहिवानयनःकांतांतांस्पृष्ट्वामामपिस्पृश, त्वयिमेगात्रसंस्पर्शश्चंद्रेदृष्टि

Nepal Sanskrit University, Balmeeki Campus, Ka

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समागमः अत्रार्थस्य समाचंद्रेहस्थिसमागमस्य वर्णनेनचंद्रेहीनामुखसादृश्यं व्यज्यते अलंकारेणोपमाधनिर्यथा येर्द्दोषितथातलाटपतितप्रासप्रहारोपविक्षीता
घक्कसुनिपाल्लीकृतपुरोभागः परान्दारयन् नेत्रांतः सहकामदेहदहनप्रोद्भूतनेत्रानलज्वालातीव्रभरभारेपरिपावस्तंगतंक्षौतुकं अत्रान्यकार्यंप्रकुर्वतोप्र
कृतस्यवस्तुतस्तात्कोविशेषालंकारः इक्षुरूपंचापरूपंतेयथोक्तविशेषणाविशिष्टपुरिपुरुषीनमासीदिति निबंधनात् करणास्यक्रियासामान्यात्तेतेदृश्यनेपि
सद्भावः यद्यप्यपमर्थोनवास्तथापितस्मिन्नौतकालमयवर्णनाच्चंगपः तेननदाचंतथाभूतःपुरिपुरिवस्थितोसौन्यपमायज्यते स्वकृपमायादि
गृहाहता अथोपमादोषाश्चिंत्यंते मूनत्वमधिकत्वंलिंगभेदोवचनभेदः असादृश्यमसंभवइत्यस्याः षड्दोषाताः तत्रोपमेयाद्यपमानस्यापकृष्टत्वं
मूनत्वंउत्कृष्टत्वमधिकं अयमपिज्ञाप्यप्रमाणोनधर्मतोवेतिप्रत्येकंत्रिविधं तत्रजातिप्रमाणगतमूनत्वाधिकेयथा चंद्रालेखिप्रवृष्णाभिःसाहसंपर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मंडलम्. वह्निस्फुलिंगाइवभ्रमरयंचकाशि. अयंपरमासीनश्चक्रवाको विराजते. पृष्ठदेशभगवान्नेधाविनिर्मितुपिषजा:. पातालमिवनाभिस्ते पर्वता विव
चलन्ते. वेगादिशा: पुनरयंकालिंदीपातसन्निभ: अत्रचंद्रतारादिभिरुपमानै: प्रकृतोऽर्थोऽयंनमेवकदर्थितइत्यत्रचिंतार्थतायामिमेसूनत्वाधिक्ये प
र्यवस्यत:. धर्मतोऽसूनत्वाधिक्येनहीनाधिकपदत्वरूपौदोषौ. यथा समुद्रिर्त्तोद्धितोमोज्याकृष्णाजिनयटबहन. व्यापजन्नीलजीमूतभागाश्लिष्टइवांशु
मान्. पृथीनवासा:प्रगृहीतशार्ङ्गमनोज्ञभीमंवपुरायकृष्ण:. ज्ञातकृष्णेन्द्रायुधवान्निशापांसंस्पृश्यमान:शशिनेवमेघ:. अत्राद्येऽपमानस्यमोंजीधृतिविं
वस्तदिलक्षणोधर्मोनतिवद्वइतिसूनत्वं. द्वितीयेऽवमेयस्यशंखादेरनिर्देशोवशशिनोयहणमतिस्थितस्यत्वाधिक्यम्. लिंगवचनभेदौयथा. मा
गधाभावाकारस्थापिचिंतारत्नमिवच्युत:. शाक्रवोभक्षिताद्देवशुद्धा:कुलवधूरिव. इमौप्रकृतभंगानर्हतोदोषौ. कथंसूनत्वादिरत्नसाधारणधर्मोभविनु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शरत्कंसध्वलदृशांसध्वंशरत्कमन्निभं · अत्रकविसमयप्रसिद्धेर्नकिंचिन्नौचित्यं · उपमानोपमेयगतातिशयधर्मोपादानस्यएकैकधर्मकानेकोपमानार्थत्वेनवाप्रसाधा
रणधर्मवत्तासंपादनार्थत्वेनवाधर्मिस्वरूपविशेषणलाभार्थत्वेनवाविधांतरेणावाप्रस्तुतकार्यानुसार्थत्वेधर्मतोऽनुक्तावाधिक्येनदोषौ · यथा · क्षीरोदवेलेवसफेनपुंजापर्यापचन्द्रेवशरत्रियामा · नवंनवंक्षौमनिवासिनीनामभ्योजमौदर्यसादधाना · इत्यत्रोपमेयगतक्षौमदर्यसाहस्याधिकविशेषणोपादानस्यएकैकविशेषणकानेकोपमा
नार्थत्वात् · एवं · क्षीरोदवेलावसफेनपुंजापर्यापचन्द्राचशरत्रियामा · अत्रवधाक्षौमनिवासिनीनामभ्रूप्रसंदर्यसादधानामित्यस्यैवकस्यचिदेकोपमा
नगतानेकधर्मोपादानमेकैकधर्मकोपमाद्व्यर्थमित्युपमानस्यधर्मतआधिक्यंनदोषः · इतिविज्ञापितोराज्ञाध्यानस्तिमितलोचनः क्षणमात्रमिवस्तस्थौमृगु
मीनजवहूदः · अत्रविज्ञापितत्वविशेषणंध्यानस्तिमितलोचनइतिसाधारणधर्मवत्तासंपादनार्थमितिस्वतंत्रंनदोषः · न्यायिनादसमिगृह्णतीनयोः प्रादुरास

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बहुलक्षपाछविः· ताडकाचलकपालकुंडलाकालिकेवनिविडावलाकिनी· अत्रनिविडेतिविशेषणंकालिकायांबहुलक्षपाछविरितिसाधारणधर्मकथनंसंपादना
र्थमित्यधिकंनदोषः· अतिथिंनामकाकुत्स्थात्रमापकुमुद्वती· पश्चिमायामिनीयामानुमादमिवचेतना· अत्रातिथिनामेतिविशेषणंधर्मिविशेषला
भार्थमितिन्यूनत्वंनदोषः रसांतरासंपेकरसंयथादिव्यंपयोभुते· देहेकालेगुणोश्रेवमवस्थाक्षणमविक्रियः· अत्रदिव्यमितिविशेषणंधर्मिविशेषलाभार्थमि
त्यधिकत्वंनदोषः· एवंप्रकृतकथासंघटनेचमत्कारादिकार्यांतरार्थत्वेपितत्रतत्रद्रष्टव्यं· एवंचप्रस्तुतकार्यांतरोपयोगरहितानांबिंबप्रतिबिंबभावेनसाधा
रणधर्मतयैकप्रयोजनतयासंभाव्यमानानामुपमेयोपमाविशेषणानांप्रतिविशेषणाद्येतिर्द्वेशेषेन्यूनत्वमधिकत्वंचदोषः कार्यान्तरार्थनिमा
प्यगुणामितयाविशेषणानिर्द्वेशेनवासाधारणकरणेत्वधिकोगुणः· यथा· ध्वनिनादमभिगृह्णन्तीतिश्लोकेध्वनिनादमभिगृह्णन्तीमुपमेय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विशेषणांताऽकारस्वयमेवनिघ्नांसयाप्राद्दर्शयप्रथमसमिद्दुनवतीरामेलाहन्तेतिस्त्रीवधानौचित्यपरिहारार्थत्वेप्रमानताधारणांकालिकाया
सपिगर्जितशालिन्यामतिशयोक्तानद्विशेषसाधृतेः यथा-दर्पनमावर्त्तेतिप्लोकेःस्वयंभूर्मविश्वीत्यस्यव्यतिक्रमणार्थत्वेपिसागरगामिनी
तिनस्त्रीविशेषणानिर्देशः कृतः यत्रलिंगवचनभेदेपिसामान्याभिधायिपदस्यरूपभेदंनापद्यते-सतत्रनदोषः भयानुगतिक्षमत्वा
त्यथा भीमकानैर्नपगुणैः-तद्वेषोसदृशोस्यापिःस्त्रीभिर्मधुरनाम्नतः दवनेस्मपरांशोभांतदीयाविभ्रमाइव-सामान्याभिधायिपदस्यच
रूपभेदापन्नावपिलिंगवचनभेदोमहाकविप्रयोगेषुदृश्यते दूरोपितंमतःशिष्टस्तस्यार्तस्ययथौषधं-स्वाम्योदयुःप्रियोप्यासीदंगुली
वोरगक्षता प्रवृद्धोहीयतेचंद्रःसमुद्रेपितथाविधः सतुतत्तमवृद्धिश्चनवाप्तत्वाविवक्षयोत्यादौ-कालादिभेदेनभूयांस्युदाहरणानि

राम:
२८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतादृशी पुलोकसिद्धत्वालिंगादिभेदेन दोष इति वामनः · एवं गुणादोषव्यवस्थायां सहृदयहृदयमेव प्रमाणं · उक्तं हि दंडिना · न लिंगवचनभेदेन हीनाधिकतेऽपि उपमादूषणायालं यत्रोद्वेगो न धीमतां स्त्रीवाग्छ्रुतिधराद्येयं वक्त्रेषा स्त्री पुमानिव प्राणाइव प्रियोयं मे विद्याधनमिवार्जिता भवानिव महीपाल देवराजो विराजते · अलमंभ्रमतः कक्षामारोढुं तेजसानयः · इत्येवमादिसौभाग्यं न जहात्येव जातुचित् · अस्ति चक्रचिद्वेगः प्रयोगेवाधिदंयथा · हंसीवधवतः श्रृंङ्गशशांसीवामतं नभः · मद्दीप्तकोभटः श्वेतवघोतो भाति भानुवत् · ईदृशं वर्णनेसद्भिः कारणांतरचिंतनात् इति कविसमयप्रसिद्धौ सत्यामसाहृदयेन दोषः · यथा चंद्रधवलाकीर्तिरित्यादौ उपमेयगतासंभावितत्वविवक्षायामुपमानस्यासंभवेन दोषः · यथा: चंद्रविंबादिविषयिज्यादौ · अस्तु साधारणधर्मायामत्र अपि सहृदयहृदयाह्लादायिन्यां कल्पितायामुपमायामप्रसिद्धिर्न दो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

ष: यथा कविमतिरिव बहुलेहासघटितचक्राभातवेतेव हरस्वर्णिरिव हसंती भाति विश्वमानलोपेता सयोमृगितमत्र हृगाचिव कश्यर्द्धिनारंगक
मित्यादौ एवमन्येपि दोषा यथादर्शकारा विद्वद्भिश्चिंतनीया: इति चित्रमीमांसायामुपमाप्रकरणम् अथोपमेयोपमा निरूप्यते
उपमानोपमेयत्वं द्वयो: पर्यायतो यदि उपमेयोपमा सास्याद्द्विविधैवाप्रकीर्तिता यदि द्वयोर्यद्वर्णनेसोपमेयोपमेनुच्यते तत्रानुप्रयो
गिनायामतिव्याप्ति: तत्र जनस्यतस्मिन्समयेविगाढेवभूवतुर्द्वौ सविशेषकांतौ तापयतोदक्षमपादसेवौ सचोदयश्चोन्नयति: शशी
चेति द्वयोर्उपमानोर्द्वयोपदेकधर्मान्वयवर्णनात् अत: पर्यायेणानुक्तं तथापि तस्मद्विपानां मदवारिसेकानुरागिघातात्व
रंगणां रेणु: पपेदेपथिपंकभावं पंकोपि रेणुत्वमियाय भूय: इत्यत्रातिव्याप्ति: तत्र रेणुपंकयो: पर्यायेणापंकरेणुभाववर्णा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नात् · अतः उपमानोपमेयत्वमित्युक्तं · द्वयोर्यदुपमानोपमेयत्वं वर्णयते सोपमेयोपमेयत्वेऽपि · युवयोः प्रणयानां च वियोगवेदनाविदूननारीक
मभूत्समं तदेतदुभयविश्रान्तहृदुपाख्यानमुपमायामतिव्याप्तिः · नचनत्रोभयोरपि सादृश्यपरत्वरूपस्योपमेयत्वस्यैव प्रतिपादनमति
नसादृश्यप्रतियोगित्वरूपस्योपमानत्वस्यातीतातिव्याप्तिरिति वाच्यं · मुख्यतः प्रतिपादनाभावे पि तयोः पारस्परमुपमानत्वपार्थात्स्वतीतिः
नस्वपमानोपमेयत्वं यत्र वाच्यमिति लक्षणे विवक्षितं · व्यापोपमेयोपमानं यहाभावप्रसंगात् · अतः पर्यायेणाह्युक्तं · एवमपि भाति तिरि
वमतिर्मतिरिति चेष्टेत्यादिरसत्योपमायामतिचेष्टयोः पर्यायभेदेनोपमानत्वस्योपमेयत्वस्य वसत्वेनातिव्याप्तेर्परिहारायैकस्मिन्य
र्थायं प्रत्युपमानत्वं तं प्रत्येव पर्यायांतरोऽपमेयत्वं विवक्षणीयं · द्विविधं धर्मेणाह्युक्तं · द्वैविध्यं धर्मस्य साधारणपरत्वप्रतिवस्तूपमाभावाभ्यां ·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुगंधिनयनानंदिनदिग्मदशालं. अंभोनमिवतेवक्त्रंचक्रमिवपंकजं. सहायाम्भोजवदनाः सहायवदनाम्बुजाः. बाष्पोगनाइवामांतियत्रबाष्पइ
वागनाः इतिक्रमेणोदाहरणे. अत्रेदंविचार्यते. लक्षणास्यतद्वत्तुनायुगपदुन्मिषितेनतावदितिप्राग्दाहृतायांयुगपदुपमेयोपमायामव्याप्तिः
नचेयमुपमेयोपमानभवतिकिंतूभयक्रांतोपमामात्रमितिशंकनीयं. परस्परतुलाक्रियमेवद्वयोरपिप्रतियोगित्वस्यापिप्रतिपाद्यमान
तयाऽपमेयोपमेत्यवयवार्थस्याविवक्षितत्वादर्थादपिसिद्धत्वात्. परस्परप्रतियोगित्वस्यप्रत्यक्षत्वात्प्रतिपादनेनतृतीयसदृशावच्छेदरूप
फललाभाच्च. किंचजोषिःस्पंदनोद्भूतैरितिप्राग्दाहृतायांपरस्परोपमायामतिव्याप्तिः. नचतत्राप्युपमेयोपमातृतीयसदृशाव
च्छेदघटनीते. द्विविधैषाप्रकीर्तितेतिविभागासामंजस्यप्रसंगाच्च. नचत्रधर्मस्यसाधारणंवस्तुप्रतिवस्तुभावोवाप्ति. गगनस्यभ्र

राम:
३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नतेनसादृश्येरजोयाप्तनसाधारणधर्मः भूतलस्यागनेसादृश्येगजानांनेघानांचबिंबप्रतिबिंबभावइत्यत्यंतविवक्षितत्वात् अतएवात्रतृतीयसत्वस्य
वारिभवद्धेतुरूपंफलमपिनसिद्धति एकधर्मात्रयेणापरस्परसाम्यिवर्णिमानेघनयोरस्मिन्विषयेतृतीयसत्वस्यचारीनालीतिफलति के
स्यचिन्नेतचिन्तादृश्येवर्तिनेतस्याप्यनेनसादृश्यमर्थसिद्धमपिमुखतोवर्णिमानंतृतीयसादृश्यमवद्धेतुर्भवतीतिहिनफलकत्वेबीजंनचैनद्धर्मसा
धारणादृश्यधर्मभेदेपिलभ्यते रजोभिर्गगनस्यभूतलसादृश्यवर्णिनेनभूतलस्यमेघाकारोगगनसादृश्यस्यार्थस्यार्थतः सिद्धभावात् अपिन,
पितातमाराधनतत्परेणापुत्रेणापुत्रीतयथैवतेन पुत्रस्तथैवाधिकवस्तुलेनसतेनपित्रापितमाचभूतेतिमत्यस्तधर्मिबिंबप्रतिबिंबको
पमायामतिव्याप्तिः अत्रहिपुत्रः पिताचेत्युभावुपमेयोपमानभूतौधर्मिणौ तयोस्तादेवमन्यासेनपितृमत्वंपुत्रित्वमितिसाधारणधर्मको

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रेविष्टनयोर्यात्रौनयोश्च बिंबप्रतिबिंबभावरूपसाधारणपादकोधर्मोमनुविनिप्रत्ययोपात्तंप्राप्तत्वंप्रहंसायांस्वत्रौप्रत्ययोप्रहंसोपपादकंसमाराधन
तयात्वंयात्सत्यंच. तेनपितायथाप्रहालपुत्रवानतथापुत्रःप्रहालपितमानिनिवाक्यार्थः पित्रापितमानिनिसंबंधमात्रस्यावक्तव्यत्वात्. एवंचपुत्रस्यपि
श्चप्रहालपितमत्वंप्रहालपुत्रवत्त्वंचबिंबप्रतिबिंबकरंबिनेनबलक्षभावेनसाधारणोधर्मइतिलभ्यते. तयोश्चपितापुत्रयोःप्राप्तत्वप्रतिपादकंअधिकवत्त
लेनसमायधनतमरेणोतिविशेषणो. ततश्चधर्म्युपमायांपः पितापुत्रस्योपमानंसएवतस्यतद्रूपपादकेबिंबप्रतिबिंबनिर्देशेउपमेयइतिलक्षणत्वव
र्त्तनंतावत्यपुं. नचेयमुपमेयोपमा. पुत्रपित्रोर्धर्मिणोरुपमायांप्रहालपितमत्वंप्रहालपुत्रवत्त्वंचबलप्रतिबलभावेनबिंबप्रतिबिंबभावकरंबिनेन
साधारणोधर्मः. पितापुत्रयोरुक्तधर्मकोटिनिविष्टयोर्वास्तवभ्रमप्रतिपादकनंप्राप्तत्वमनुगतसाधारणधर्मइतिपूर्वोक्तरूपसाहूप्यात्तमु

74

पादः
३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वृषोपमया पुत्रोपि पितृभक्त्या प्रहसन्तः पितापि पुत्रवात्सल्येन प्रमदस्यर्थस्य लाभे पितृतीयसत्रस्य चारीव्यवच्छेदलाभात्तु. नचात्र इवशब्दस्य पर्यायद्वयाभावात् पर्यायविशेषस्यैवातिव्याप्तिनिरासः स्यादिति वाच्यं. वाच्यकक्षायां पुत्रपित्रोरुपमायां पकक्षायां पितापुत्रयोरिति पर्यायद्वयसत्त्वात्. नहि पर्यायद्वयस्यापि वाच्यत्वमत्र विवक्षितं. येनेवशब्दद्वयप्रयुक्तपर्यायद्वयाभावात् अतिव्याप्तिर्निरस्येत. तथा सति यथोपमेयोपमा साधारणपर्यायस्यात्. इत्युक्तं. नचात्र धर्मिणोरेवोपमा धर्मयोस्तूपमानोपमेयसाधारणार्थभेदस्य वक्तव्यायतेनोपमेति वाच्यम्. नलिन्याइव तच्चोपासस्याः पद्ममिवाननं. मयामधुकरेणेव यापं यायमनन्यत. इत्यादौ बिंबप्रतिबिंबभावापन्नयोस्तन्वीनलिन्यादिकयोरुपमायाः प्रतिदर्शनेन धर्मयोः साहचर्येन साधारणीकरणस्याप्युपमाद्वयोनकत्वात्. तस्मात्तत्रातिव्याप्तिशंकाऽवकाशः. अतोनुपपन्नमित्येतल्लक्षणं लक्ष्यते. अत्रेदम्: अन्योन्येनोपमावोध्याव्यक्तगाहसंतरेणवा. एकधर्माश्रयाद्यास्यात्तोपमेयोपमा

Nepal Sanskrit University, Balmeeki Campus, Kathm

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मता अन्योन्येनेति विशेषणान्नरश्वोपमायामतिव्याप्तिः यत्रान्यद्धर्मान्तरेणावबोधेति विशेषणाद्धर्मोभयविशिष्टसादृश्योपमायामतिव्याप्तिः तत्रपरस्परप्रतिक्षेपकविकल्पा
र्थेनवाकारेणाहियापरस्परप्रतियोगित्वविशिष्टोपमा. तद्विषयधर्मान्तरनिरपेक्षव्यक्तिबोध्यानद्विषयव्यक्तिनिरपेक्षधर्मान्तरबोध्यावाभवतिसोपमेयोपमेतिपर्यवस्यति
ततश्चोभयविशिष्टसादृश्योपमायामन्योन्यप्रतियोगिकत्वांशेव्यक्तिः साहश्यरूपोपमांशेधर्मान्तरमितितयोः करंवितत्वान्नातिव्याप्तिशंका. सामान्यलक्षणासिद्ध
र्थंचव्यक्तिधर्मान्तरयोरन्योन्यत्वेनक्रोडीकृतयोर्हयोः एवंहितयोर्गुणीभूतयोर्हयोः एवंहितयोर्गुणीभूतयोर्हयोः इत्यत्रधर्मान्तरनिरपेक्षव्यक्तिबोध्यायामनङ्गीकारभूतायांव्यक्तिनिरपेक्ष
धर्मान्तरबोध्यायामलंकारभूतायांचोपमेयोपमायांलक्षणामनुगतंभवति. यद्यपिव्यंग्यायामविद्युपमेयोपमायांशब्दस्वतन्त्रकारित्वेनतद्गतधर्मोरपेक्षितत्वात्.
खमिवजलंजलमिवखमित्यादौवाक्यायामपिगम्यसारधर्मायांतस्यधर्मोद्वयोरपेक्षित्वपरस्परतैरपेक्षणसंभवि. तथाप्यन्योन्यप्रतियोगिकत्वविशिष्टसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दृश्यविषयदृश्यान्तरनिरपेक्षकत्वव्यक्तेः · तद्विषयव्यक्तिनिरपेक्षत्वं दृश्यांतरस्यचास्त्येव · इदमेव च व्यक्तिपदानपेक्षया अलंकाररूपाणां विशेषलक्षणानामपि · तत्र
व्यक्तिपदपरित्यागे दृश्यांतरमात्रवोधेत्येतद्विशेषणांपर्यवस्यति · ततश्चोभयविश्रांतत्वाद्दृश्योपमाव्याप्तिः · नच तस्यामेकस्यैवोपमानत्वेन द्वयोरपि परस्परोपमानत्वेन तद्दृश्योपमाव्याप्ति
वृत्तावित्यर्थमिति वाच्यम् · प्राकरणिकाप्राकरणिकयोः सादृश्यवर्तने प्राकरणिकस्यैवोपमानत्वलाभेऽप्युभयोरपि प्राकरणिकत्वे विनिगमनाविरहेणाप
रस्परोपमानत्वप्रतीतेः एकधर्माश्रयविशेषणात् · रत्नोपि स्पन्दनोत्कीर्णेत्यत्र परस्परोपमायां नातिव्याप्तिः · उक्तविशेषणावलादेवपितासमायाधनत्वयोरो
न्नपमायामपि नातिव्याप्तिः · उभयत्राप्युपमेययोर्भिन्नधर्माश्रयत्वात् · एकधर्माश्रयेत्यस्यचायमर्थः कस्यचिदन्येनोपमायां योधर्मः साधारणोवस्तुप्रतिवस्तु
भावोपन्नोवासस्वाभाव्यस्यतेनोपमायामपीति · नत्वनुगामिधर्माश्रयेत्यर्थः · बिंबप्रतिबिंबगर्भवस्तुप्रतिवस्तुभावनिर्देशोनदभावादिति दिक् · इदं रूपकप्रयो

Nepal Sanskrit University, Balmeeki Campus, Kathm

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पमानवयोजकलक्षणं अनुगतानि प्रसक्तलक्षणमात्रं तु. सदृशस्यतत्तीयस्यैव च्छेदायद्वयोः अन्योन्येनोपमेयत्वेनोपमेयोपमानमेतेति द्रष्टव्यम् अत्रान्यो
न्येनेति विशेषणं अहमेव गुरुः सदा हरणानामिति प्रतीयविशेषणाद्वृत्त्यर्थं. अथोदाहरणानि. तत्रधर्मस्यसाधारणस्य यथा. त्वमिव जलं जलमिव त्वं हंसइव चन्द्रइ
व हंसः. कुमुदकाराक्तारक्तारकाणामिव कुमुदानि. द्वयंप्रतीयमानसाधारणधर्मोच्चसाधारणधर्मो यथा. सुगंधिनयनानन्दीत्यादि यथावा. गिरिवगजरा
जोयंगजराजइवोच्चकैर्विभातिगिरिः निर्झरइवमदधारामदधारामदधारोवास्यनिर्झरः भवति. सत्रोपमेयोपमाद्वयस्यपरस्परानुग्रहात्मत्वेनविच्छित्तिविशेषोधिकः
वस्तुप्रतिवस्तुभावो यथा. तच्छायाम्भोजवदनेत्यादि. इदंवस्तुप्रतिवस्तुभावस्यबिंबप्रतिबिंबभावविशेषणतयोदाहरणं. तद्विशेष्यत्वे यथा. वक्त्रंपद्ममिवैतस्याने
त्रभृंगमनोहरं. पद्मंवक्त्रमिवाभातिभृंगलोचनभूषितं. इत्यनिपर्यायोपमेयोपमोदाहरणानि. यगपदुपमेयोपमोदाहरणानि तु. तद्वत्यादि. तत्रापि यथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संभवंपूर्वोक्ताभेदाऽनेषा: इत्युपमेयोपमाप्रकरणम् अथानन्वय: एकस्यैवोपमानोपमेयत्वेनन्वयोमत: एवकारबलादेकस्यामेवोपमितिक्रियायामितिग
म्यते. तेनोपमेयोपमायांरशनोपमायांचनातिव्याप्ति: उदाहरणं गगनंगगनाकारं अयंप्रतीयमानधर्म: निर्दुष्टधर्मोयथा नकेवलंभातिनितांतकांतिर्निर्तविनीतैव
निर्तविनीव यावद्विलासाम्बुधलासवासालेतद्विलासाइवतद्विलासा: ननुपितुर्नियोगाद्वनवासमेवनिस्तीर्यराम: प्रतिपन्नराज्य: धर्मार्थकामेषुसमांप्रयेदेयथात
थैवावरनेमृदुर्निं. इत्यत्रैकस्यैवरघुपतेरुपमानत्वमुपमेयत्वंच. नचतत्रानन्वय: समत्वयोपमयातस्य धर्मार्थकामेष्वनुजेषुसमवृत्तिमात्रस्यैवप्रतिपाद्यत
यासदृशान्तरमवच्छेदेतात्पर्याभावात्. तथा. त्वक्ष्यामिवैदेहसुतांपुरस्तात्तमुद्वनेमिंपितुराज्ञयेवेत्यत्राप्यस्ति स्वस्यैवोपमानत्वमुपमेयत्वंचतत्रापिनानन्व
य: पितृनियोगात्क्षितित्यागइत्यपवादात्तीतात्यागेपिनप्रतिषेध्योहमि[illegible]त्येतावत्येवतात्पर्यसादृशान्तरावच्छेदेतात्पर्याभावात् पितृनियोगा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रज्वलनाद्योऽपवादभयात्तीतात्यागेवसद्भावात्पक्षेऽभावेनतद्व्यवच्छेदस्यफलत्वायोगाच्च · एवमुपादेतस्यसहस्ररश्मित्वप्रज्ञानवंनिर्मितमातपत्रं · सतद्भूला
दविदूरमौलिर्विभोपतद्गंगंदुवोन्नमांगे · इत्यादावप्येकस्मैवोपमानोपमेयभावःस्पष्टः नचैतेषुक्वचिदर्थादिषुवृत्तेभवद्भिःपृष्टेप्रोपमानोपमेयभावः अन्यत्रक्षिति
त्यागस्यप्रतीतात्यागस्यच · अपरत्रगंगापतनस्यदुरूनसन्निधानस्यचनतुक्वचिदप्येकदेशस्यैवधर्मिणाःउपमानोपमेयभावः विशिष्टान्वयिनोपिविशेषेबाधेवि
शेषणासंक्रमोचित्यादितिवाच्यं · यथाधर्मार्थकामेषुसमांवृत्तिंप्रपद्येतथाऽवज्ञोचित्यादिप्रकारेणाएकस्मैवोपमानोपमेयभावेनिवद्धेपितस्यविशेषणोपमासं
क्रांतिकल्पनेपायोयमंसार्पितलंबहारस्यात्मानंचपिहारनिर्मितदीनामेवोपमानोपमेयभावःस्यादितिबिंबप्रतिबिंबोदाहरणमात्रविलोपप्रसंगात् यमराजवरा
योर्मुहुर्मित्यादावभेदेपिउपमानोपमेयभावनभ्युपगच्छतामलंकारिकाणांविशेष्यबाधस्यापरिहरणीयत्वाच्च · तस्मादत्रसविशेषणोक्तिनिन्यापोपन्यासो

राम:
३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

वाक्यमीमांसकानांशोभतेमातंगारमीमांसकानां. वाक्यमीमांसकाच्छब्देऽपमानोपमेयभावनिर्देशाच्चनास्तीतिमन्यमानानामनवगाधोर्थ्यहृत्तिपादावघ्रतनस्य पूर्वे
पुस्तनंयुक्तमुपमानं. एतत्कृत्यगमनस्यकृत्यांतरगमनमुपमानमित्यादिकृत्यर्थति. तस्मादलंकारिकमतेऽप्येतेषेकस्यैवोपमानोपमेयभावइतिलक्षणमति
व्याप्तमिति चेत्. अत्रब्रूमः. स्वस्यत्वेनोपमाया स्यादतगम्येकधर्मतः अन्वर्थनामधेयोयमनन्वयइतीरितः स्वस्यत्वेनेतिविशेषणात्तदुपमेयोपमायांरद्वानो
पमायांचनातिव्याप्तिः अनुगम्येकधर्मिकेतिविशेषणात्तदाहृतोपमाविशेषेषुनातिव्याप्तिः यद्यपिनेत्यपिसमोवृत्तिंप्रपेदेइत्याद्यंशोः गुणमिधर्म
स्तथाप्येकोनभवति. धर्मार्थकामावरजादिविंबप्रतिविंबभावकरंवितत्वात् अतएवैकग्रहणमपर्थवत् अन्वर्थनामधेयइति तृतलक्षणान्तर्गतं. किंतु
स्वेनस्वस्योपमाध्यगुणम्येकधर्मावेदेवानन्वयोनास्यथेत्यत्रोपपत्तिमात्रपरं. धर्मैकोहिस्वस्यत्वेनोपमानत्वेतीत्यनन्वयइत्यन्वर्थनामभवति. अत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वस्त्वर्थनिबंधनशाब्दानुपमत्वद्योतनफलापर्यवसानात्यर्थधावेत्. धर्मभेदेनैकधर्मावच्छिन्नेनैवैवधर्मान्तरावच्छिन्नस्य तस्योपमान्वेनीतिनतनान्वर्थनात्. नवा
नन्वर्थनिबंधनाधीनानुपमत्वफललाभः इदमनन्वयत्वयोजकं लक्षणं लक्ष्यामात्रेतु. यत्रैनैवतस्यस्यानुपमानोपमेयता. अस्माद्रूपविवक्षातोवदंति
नमनन्वयमितिभामहोक्तमनुसंधेयं. उभौयदिद्वौभिन्नौयद्यन्यवाहावित्यनिद्रयोक्तिविशेषेऽनुपमत्वद्योतनफलसाम्यकल्पनावत्यनिष्पन्निनिरासायनैनैवतस्येति
विशेषणम्. अयमनन्वयोऽलंकारोऽपि यथा. अद्ययामनोविंदन्नातात्वयिगतेकालेनैषाभवेन्नीतिस्तवैवागमनान्मुनः अत्रगतेगतेश्रीकृष्णप्रतिवि
दूतवाक्ये. इयंतदागमनप्रभवाप्रीतिर्बहुकालव्यवहितेनपुनरपितदागमनेनैवभवेन्नान्येनेत्युक्तिभंगपात्तदागमनप्रभवप्रतीतेः सैवसदृशीनतिनरप्रभवे
तियत्यते. एतादृशाद्यार्थ्यमर्थअनन्वयालंकारलक्षणोऽयंपात्तविशेषणंपूर्ववद्रूपव्यम्

इत्यनन्वयप्रकरणम्

अथस्मरणालंकारः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

स्मृतिः सादृश्यमूलायावस्त्वन्तरसमाश्रया स्मरणालंकृतिः सास्यादव्यंग्यत्वविशेषिता · यथा · अपि तुरगसमीपाद्यन्ननंनमपूरंनसहचिरकलापं
वाणालक्ष्मीचकारसपदि गमनमनस्कश्चित्रमात्मानुकीर्णोरतिविगलितबंधेकेशपाशेप्रियायाः · यथावा · प्रियानामपि कृतविस्मयांपुरस्ताद
भ्रमतः स्फुरदरविंदचारुहस्तां · उद्वीक्ष्यप्रियमिवकांचिदन्यतनोमस्मार्षीज्जलनिधिमंथनस्यशौरिः · एकत्रसदृशदर्शनान्नत्वसदृशधर्मिका
स्मृतिः इतरत्रसदृशदर्शनान्नत्वसदृशलक्ष्मीसंबंधिनोजननिधिमंथनस्यस्मृतिः उभयत्रापिसादृश्यमूलकवस्त्वन्तरस्मृतित्वमविशिष्टं · स
दृशासदृशासाधारणार्थतयातक्षरोवस्त्वन्तरयहणसमर्थवत् सौमित्रेनत्वसैव्यतांतरुणतेचंद्राश्रुरुज्जृंभतेचंद्राशोर्निशिकाकथारघुपते
वक्षोयमुन्नीततिवत्सैतद्विदिनकथंतुभवताधत्रेकुरंगंयतः क्वासिप्रेयसिहाकुरंगनयनेचक्षुनेजानकि · अत्रभुतकुरंगसंबंधिनलत्र
यनस्मरणान्नत्वसदृशशीतानयनस्मृतीस्तत्संबंधिशीतास्मृतिश्चेति किंत्वेषाव्यंग्यालंकार्यभूताच तद्यावृत्त्यर्थमव्यंग्यत्वविशेषणं · अ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वाः परितः स्फुरंति गिरयः स्फारास्तथा भोधयः स्नाने तानपि विश्वतीकिमपि नक्षान्नासिहम्यत्रमः आश्चर्यात्मुहुर्मुहुस्तनिमिनिप्रस्तोनियावद्भव
स्तावद्विश्वदिमांस्तत्तवभजोवाचस्ततोमद्विताः स्तूयमानस्तसंबंधिनोभस्तद्भुजस्यस्यतिर्नसादृश्यमूलेनिनात्रस्मरणालंकारः किंतुस्म
तेः संचारीभावस्यभूतद्विषपरतिभावांगत्वात्रेयोलंकारः सतथेतिप्रतिज्ञायविस्मयकथनप्रजां अषीनस्योतिर्मयान्सन्नसस्मारस्मर
ज्ञासनः अत्रचिंतामूलास्मृतिः विच्छित्तिविशेषाभावान्नकश्चिदलंकारः एतउभयव्यावृत्त्यर्थसादृश्यमूलेनिविशेषणां स्वमेनेभेदाभेदा
भेदसाधारणसाधर्म्यमूलाअलंकाराः प्रदर्शिताः इतिस्मरणालंकारप्रकरणम् अथाभेदप्रधानेषुप्रथमंरूपकंनिरूप्यते आ
रोपविषयस्यस्वादतिरोहितरूपिताः उपरंजकसारोप्यमाणांतद्रूपकंमतं अत्रारोपविषयस्येत्यनेनोत्प्रेक्षातिशयोक्त्योर्व्यावृत्तिः त
योरध्यवसायमूलत्वात् अतिरोहितरूपिताइत्यनेनससंदेहभ्रांतिमदयहुतीनांव्यावृत्तिः तेषुसंदेहभ्रांत्यपह्नुतेर्विषयस्यतिरोधानात् उ

79

राम:
३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

परंजकमित्यनेनसमासोक्तिपरिणामव्याहृत्तिः तयोर्हिनोपरंजकत्वविषयेत्वताद्रूप्यापादकत्वलक्षणं समासोक्तौव्यवहारमात्रसमारोपेणताद्रूप्यप्रती
तेरेवाभावात् परिणामेआरोप्यमाणास्यैवविषयताद्रूप्यापन्नविषयस्यारोप्यमाणताद्रूप्यापन्नस्याभावादित्याहुः अत्रेदंविचार्यते० आरोपाध्यवसाय
योः कीदृशंभेदमभिसंधायआरोपविषयस्येत्यनेनोत्प्रेक्षाव्याहृत्तिरुच्यते यदिविषयविषयिणोरभिन्नयोरभेदप्रतिपत्तिरारोपः विषयनिग
रणेनविषयिणास्तदभेदप्रतिपत्तिरध्यवसायइतिभेदमभिसंधायतदोत्प्रेक्षाआरोपस्तलैवस्यात् तत्रचन्द्रतंमुखंचन्द्रइतिविषयस्याप्यभिधाने
नतन्निगरणाभावात् ततश्चतत्रातिव्याप्तिरतिचारितैवस्यात् अथताद्रूप्यप्रतिपत्तिरारोपस्तदभेदप्रतिपत्तिरध्यवसायइतितयोर्भेदः
मुखचन्द्रइत्यादिरूपकेचन्द्रस्यचद्रूपंचन्द्रत्वंतेनरूपवतामात्रंमुखस्यप्रतीयतेननुप्रसिद्धचन्द्राभेदःमुखविषयायांचन्द्रइत्याद्यतिशयो
क्तौतुतदभेदस्यप्रतीयतइतिचेन्न वैपरीत्यस्यापिवक्तुंशक्यत्वात् नचवाच्यं इन्दोरपिमृगाक्षीणांमुखेंऽशतिरिच्यते निर्जरैःपीयमानोपिय:

Nepal Sanskrit University, Bālmeeki Campus, Ne

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कदाचिन्नहीयतइति· मुखचंद्रस्य प्रसिद्धचन्द्राद्यतिरेकवर्णानंतरभेदप्रतिपत्तौ न संभवतीति रूपकेतादृश्यप्रतिपत्तिरेवेति तथा सति हि संभावद्
ग्रासे हि पवनचकारैरनुहतः किरणस्तोन्तःप्रच्छन्नबलवलिपाकप्रतापिनीम् उपधाकारायंप्रहिणुनयने तर्कयमनागनाकाशेकोयंगलि
तहरिणाः शीतकिरणाः· अपरः पाकशासनइत्याद्यतिशयोक्तौ अपरश्चपाकशासनइत्याद्यपेक्षायां च रूपकवदेव प्रसिद्धचन्द्राद्यभेद
प्रतिपत्त्यसंभवेनतादृश्यप्रतिपत्तिरेवस्यादिति तयोर्लक्षणास्यातिव्याप्तिरनेनानिवारितास्यात्· अथ तत्र प्रसिद्धचन्द्राद्यभेदप्रतिपत्त्य
भावेप्युपात्तकल्पितापरचंद्राद्यभेदप्रतीतिः संभवतीतिचेत् रूपकेप्येवं कुंद्राकमित्यसंभवस्यलक्षणास्यस्यात् किंच अतिरोहित
रूपिणाइत्यनेनसंदेहभ्रांतिमतोरतिव्याप्तिवारणापिनापह्नुतेतिव्याप्तिवारणा नेदंमुखंकिंतुचन्द्रइत्यत्रमुखेमुखत्वाभावारोपस्यचंद्रत्वा
रोपस्यचाहार्यत्वेनविषयतिरोधायकत्वाभावात् आहार्यारोपस्यापितिरोधायकत्वेरूपकेपिलक्षणास्यासंभवःस्यात्· इत्येक्षायामप्या

80

राम:
द्व७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

तार्थसंभावनारूपाया अतिरोहितरूपिताइत्यनेनैवव्यावृत्तिसिद्धावारोपविषयस्येति विशेषणस्यवैयर्थ्यं चस्यात् अतिशयोक्तौ विषयस्य
निगीर्णस्यतिरोहितत्वेनतस्याभ्यनेनैवव्यावृत्तिसिद्धेः अपिन त्वत्पादनखरत्नानांपदलक्षकमार्जनं इदंश्रीखण्डलेपेनपाण्डीकरणं
विधोरितिनिदर्शनायामतिव्याप्तिः तत्रोपमेयवाक्यार्थेउपमानवाक्यार्थस्यतादूप्यारोपसद्भावात् यदिव आरोपविषयस्यपदार्थस्येति
विशेषणीयंतथाप्यलक्षकक्रतत्वात्पादनखमार्जनंश्रीखण्डलेपनकृतविधुपाण्डीकरणमितिनिदर्शनायामतिव्याप्तिः अंघ्रिदलोहरे
रूर्ध्वमुक्षिप्तोयतिनिग्रहे विधिविष्टरपद्मस्यनाज्ञदलोमुदेस्तवइतिरूपकेऽव्याप्तिश्च यत्तु सरस्वतीकण्ठाभरणोक्तलक्षणं यदोप
मानशब्दानांगौणावृत्तिव्यापाश्रयात् उपमेयेभवेद्वृत्तिस्तदातद्रूपकंविदुरिति तदप्यतिशयोक्तावतिव्याप्तं मुखंचंद्रइतिरूपकेचंद्रश
ब्दस्यमुखेगौणसारोपलक्षणाचन्द्रस्यतिशयोक्तौसाध्यवसानलक्षणोत्पालंकारिकाणामिष्टत्वात् वस्तुतस्तुतिशयोक्तावेवलक्षणानत

Nepal Sanskrit University, Bameem Campus, K

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रूपकइतिशब्दव्यवस्थापयितुम्· तथाहि· अभिधायोक्तौ विषयाभिधायिमुखादिपदप्रयोगात्चन्द्रादिपदेनैवतत्प्रतीतेर्कार्यमितितस्यतत्र लक्षणाअवश्यमास्थेया· रूपकेविषयविषयिणोः स्वस्ववाचकाभिहितयोरभेदप्रतिपत्तिः संसर्गमर्यादयैवसंभवतीतिकिमर्थंतत्र लक्षणा· अशक्यावतत्रलक्षणाभ्युपगंतुंकथं· मुखंचन्द्रइत्यत्रलक्षणायामुखेप्रवर्त्तमानंचंद्रपदंकेननिमित्तेनप्रवर्त्तेत मुखत्वेनवामुखासाधारणकांतिविशेषेणवाचंद्रत्वेनवाचंद्रासाधारणकांतिविशेषेणवामुखचन्द्रोभयानुगतसामान्येनवामुखगतचंद्रसादृश्येनवा नाद्यः मुखपदेनपौनरुक्त्यापत्तेः मुखत्वस्यशक्यासंबंधित्वेनतेतनिमित्तेनलक्षणायोगात्च· अतएवनद्वितीयः नतृतीयश्चरार्थौ· मुखादृ न्निधर्मयोस्तत्रप्रवृत्तिनिमित्तत्वायोगात् नपंचमः कान्तिमान्मुखचन्द्रइत्यत्रकांतिमत्पदेनपौनरुक्त्यापत्तेः नापिषष्ठः सादृश्यस्यग्रा ह्यप्रतिपाद्यत्वेनरूपकस्योपमापृथग्भावानुपपत्तेः अभेदप्रधानरूपकाभिनिविष्टानविरोधात्च· तस्माद्रूपकेशब्दपदाभिहितयोर्विष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

विशेषाभेदप्रतिपत्तिः संसर्गमर्यादयैवेत्यवश्यमिति लक्षणास्वीकारे दोषः यदा तु वक्त्रेन्दोर्नवसत्यं यदधरः शीतांशुरुज्जृंभते · हे चंद्रो जगतो राजन्नसदिवित्वम्महीतलइत्यादौ विषयस्य प्रसिद्धचन्द्राभेदप्रतिपत्तिर्न संभवतीति कथं विदिक्षादिपदस्य विषये लक्षणा कल्प्यते · तथापि कानिमान्मुखचन्द्रइत्यादौ काकाध्यापकादिवत्संसर्गमर्यादयैवाभेदप्रतिपत्तिसंभवेनानिक्लिष्टलक्षणाश्रयणायोगात्तत्राव्याप्तिर्न तत्रलेपायते · अपि च सेतुः शैलेस्त्वया बद्धः पूर्वजेतुं दशाननं · वैजेतुमद्यवध्नामि यशश्चन्द्रोपलैः प्रभो विराधस्त्वोतुकाविष्टं कल्पवृक्षमुदीक्षितुं तन्मे सफलमथासीत्त्रैत्रवप्यवलोकिते इत्यादौ व्यापरूपके चाव्याप्तिः अत्राद्येवर्णयभंगतिरावणावधायत्वया सेतुर्बद्धइति निर्दिष्टमानेनवस्तुनात्वमेवरामइति रूपकं व्यज्यते नचतत्र विषये गौणरामपदमस्ति · द्वितीये त्वामवलोकयता मम नेत्रेण विरंकांक्षितं क

Nepal Sanskrit University, Balmeeki Campus, K...

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यहक्षावलोकनंलक्ष्मिनिप्रतीयमानेनविशेषालंकारेणात्वमेवकल्पवृक्षइतिरूपकंव्यज्यते· तत्रकल्पवृक्षपदंप्रसिद्धकल्पवृक्षपरमेवनविषय
लक्षकमितिस्पष्टं ततःकुमुदनाथेनकामिनीगंडपांडुता· नेत्रानन्देनचंद्रेणामहेंद्रीदिगलंकृतेतिशुद्धसारोपलक्षणामूलकरूपकेचाव्या
प्तिः· तत्रत्वानन्दहेतुत्वादानंदत्वरूपणंनतोपपन्नात् यत्रुआपूर्णतमित्यादौविद्धिनिविशेषादर्शनात्शुद्धसारोपलक्षणास्थलेनक
श्चिदलंकारइति· तदयुक्तं· गौर्वाहीकइत्यादौविद्धिनिविशेषादर्शनेनगौणसारोपलक्षणास्थलेप्यलंकारत्वाभावप्रसंगात् क्वचि
द्वैचित्र्यादर्शनेपिअन्यत्रवैचित्र्यवतिस्थलेऽलंकारत्वमिहापियुक्तं· नेत्रानन्देनचंद्रेण· आपूर्णतमहोत्सवस्यविनतक्षोणीभृतां
मूर्तिमान्विश्वासोनयनोत्सवोमृगदृशांकीर्तेःप्रकाशःपरः आनन्दःकल्पिताकृतिःसुमनसांधीरश्रियोजीवितंधर्मस्यैकनिकेतनंवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

जपतेवीरःकलिंगेश्वरः इत्यादौभुजसारोपलक्षणाद्यतेपिवैचित्र्यदर्शनात् यदिचहेतुमतासहहेतोरभिधानंतभेदतोहेतुरितिमतांत
राध्वरणोनतत्रहेत्वलंकारोनरूपकमित्यभ्युपगम्येतनदाभ्यरोपविषयःस्यादितिदूर्वोदाहृतलक्षणास्यतत्रातिव्याप्तिः एवंउपमैवति
रोभूतभेदारूपकमिष्यते.रूपकंतदनेदोयउपमानोपमेययोरित्यादिलक्षणोक्तव्याप्त्यादिदोषायथासंभवमुत्तेयाः अत्रवदनः
विंबाविशिष्टेनिर्दिष्टेविषयेयद्यनिहुते उपरंजकतामेतिविषयीरूपकंतदा विंबाविशिष्टइतिविशेषणाच्चन्द्रादनखरत्नानामि
तिनिदर्शनानांनातिव्याप्तिः तत्रहिचंद्रोयथास्वतःशुभ्रत्वादनासंजनीयथावल्पस्तथानखाःस्वतोरुणत्वादनासंजनीयारुणाइति
सादृश्येनखानांचन्द्रस्यचविंबप्रतिविंबभावः अलक्तकचन्दनयोरन्यत्रस्वदर्णासंजकत्वेन ततश्चतत्रविंबभावापत्तेनखालक्तकविशि

Nepal Sanskrit University, Baltheer Campus,

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ष्टस्वरंजनेतस्त्रतिबिंबभूतचंद्रचंदनविशिष्टपाणीकरणानुपरंजकं स्वमन्यत्रापि अरणपरुदिनंकुनमित्यादिनाद्रूपाणेवनिर्दर्शनो
दाहरणोसर्वत्रबिंबभावापन्नवस्तुविशिष्टेस्वोपमेयेनत्रतिबिंबविशिष्टमुपमानमुपरंजकमितिनक्ष्याप्यतिव्याप्तिः रूपकेनुनक्ष्विद
पिबिंबत्रतिबिंबभावापन्नधर्मविशिष्टतयाविषयविषयिणोरुपादानं स्वावयवरूपकेपिविशेष्यरूपणात्पृथगेवावयवेषुरूपणां
नत्ववयवविशिष्टरूपेणाविशेष्ये अंघ्रिदलोहरेरूर्ध्वमित्यत्राप्यंघ्रिदलनालदलयोर्बिंबप्रतिबिंबविशिष्टतानतयोः प्रतीयमा
नरूपासत्वविधात्विष्टरकमलश्लिष्टत्वाद्यनुगामिधर्मेणोपमानोपमेयभावात् किंतुविधात्वविष्टरकमलश्लिष्टरूपसाधा
रणधर्मवत्त्वसंपादनार्थं विशेषणाविशिष्टतामात्रमुपमेयस्यनिर्दिष्टइतिविशेषणात्रनिर्णीतविषयायामतिशयोक्तावति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

व्याप्तिः॰ व्यापरूपकोदाहरणोर्विषयिवाचकाप्रयोगसंभवेपिविषयनिर्देशः सार्वत्रिक इतिनतत्रव्याप्तिः नेत्रानन्देनेत्यादौहेत्वलंकार
इतिमतेविषयइत्यनेनोपमेयइत्येतदर्थकेनतद्व्याहत्तिः तत्रापिरूपकमित्येकावलीकारादिमतेविषयपदंधर्मिमात्रपरंस्पष्टार्थं अनिहु
तेनिषेधास्पृष्टइतिविशेषणादयहुतौनातिव्याप्तिः॰ उपरञ्जकतामात्रार्थताङ्ग्यनिश्चयगोचरतामित्यनेनसंदेहोत्प्रेक्षासमासोक्ति
परिणामभ्रांतिमत्स्वतिव्याप्तिनिरासः॰ ससंदेहोत्प्रेक्षयोर्निश्चयस्यैवाभावात् समासोक्तौपरिणामेचतस्यताङ्ग्यागोचरत्वात्
समासोक्तौव्यवहारमात्रसमारोपात्॰ परिणामेआरोप्यमाणस्यैवविषयताङ्ग्यगोचरत्वात्॰ भ्रांतिमतिस्वतःकल्पितस्यवाघट
त्यादियर्थेतस्यत्वारसिकस्यभ्रमस्यैवनिबंधनेनतस्यानाहार्यत्वात्॰ अथांगपविशेषणाद्भेदमेवालंकारभ्रंतस्यरूपकस्यलक्षणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

मितिसर्वमुख्यं तत्रूपकंत्रिविधं निरवयवसावयवंपरंपरितंच निरवयवंकेवलंमालाचेतिद्विविधं सावयवंसमस्तवस्तुविषयमेकदेशावि
वर्त्तिचेतिद्विविधं परंपरितंश्लिष्टाश्लिष्टशब्दनिबंधनत्वेनद्विविधं सत्केवलंमाला चेतिद्वैविध्यात्तत्रविधं एवमष्टविधोरूपकालंकारः
तत्रकेवलंनिरवयवंयथा कुरंगीवांगानिलिमिनपतिगीतध्वनिषुयन्तस्वीकांतोदंतंभुतमपिपुनः प्रभ्रमयतियत् अनिद्रयंद्वान्नः
स्वपितितदहोवेद्यमिनवांपृष्टोस्याः सेकुंद्रदिमनसिजः प्रेमलतिकां मालानिस्वपवंयथा सौंदर्यस्यतरंगिणीतहरिणीनेत्रस्य
हर्षोत्तमः कान्तेः कामरागकर्मनर्मरहस्यमुल्लासनावासभूः विद्यावक्त्रगिरांविधेरनवधिश्रीणपसाक्षाक्रियाग्रामः पंचशिलीमुख
स्मललनाचूडामणीः प्रियाः समस्तवस्तुविषयसावयवंयथा ज्योत्स्नाभस्मच्छुरणधवलाविभ्रतीतारकाश्रीर्यंनर्द्वानव्यसनर

Nepal Sanskrit University, Balmeeki Campus, Ken...

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

सिकारात्रिकापानिकीयं द्वीपाद्वीपंत्रमतिदधतीचंद्रमुद्राकपालेप्यसंसिद्धांजनपरिमलंलांछनस्पछलेन. एकदेशविवर्त्तिसावयवंयथा
प्रौढमौक्तिकरुचः पयोमुचांविंदवः कुजेपुष्पवंधवः विद्युतांनभसिनाथमंडपेकुर्वतेस्मकुसुमांजलिंश्रियं. अत्रनभसोनाथमंडपत्वेनरू
पणादिगुणानर्थात्रर्त्तकीत्वंगम्यतेइतिएकदेशेरूपकस्यविशेषणावाच्यतयावर्त्तमानादिदत्तेकदेशविवर्त्ति. श्लिष्टशब्दनिबंधनंकेवलं
परंपरितंयथा. अलौकिकमहालोकप्रकाशितजगत्त्रयः स्तूयतेदेवसद्वः शमुक्तारत्नतनकैर्भवान्. अत्रत्वमेवमुक्तारत्नमित्यारोपणा
द्वर्वकसद्वंशउन्नमान्वएवसद्वंशउत्कृष्टवेणुरित्यारोपइतिरूपकद्वयमपिसंभूतपरंपरमितिपरंपरितं. वंशेतिश्लिष्टशब्दनिबंधनं
च तदेवमालापरंपरितंयथा. विद्वन्मानसहंसवैरिकमलासंकोचदीक्षागुरुर्मार्गणनीललोहितसमिन्त्वीकारवैश्वानरः सत्यश्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

नीविधानदक्षविजयप्राग्भावभीमप्रभोत्साहान्वंवरवीरवन्तरशनवैरंचनृपैः क्रियाः अभिष्टशब्दनिबंधनकेवलंपरंपरितंयथा निरवधिच
निराश्रयंचयस्थितमनिवर्त्तितकौतकप्रपंचं प्रथमभिहभगवान्सकलनाथोजयतिवनृद्दालोकवत्रिकंदः तदेवमालापरंपरितंय
था पर्यंकोराजलक्ष्माहरिनमणिमयःपौरुषाद्वैलरंगस्तंयामत्रासनाम्यन्मुरलपतियशोहंसनीलांबुवाहः भग्नप्रत्यर्थिवंशोल्ल
णाविजयकरिस्थानदानांबुपद्दःखड्गःक्ष्मासौविदल्लःसमितिविजयतेमानवाखण्डलस्य इदंवैधर्म्यंणापिदृश्यते तत्केवलंयथा
आहृत्यतोलोचनमार्गमाजोरजोन्धकारस्यविजृंभितस्य शत्रुक्षताश्वद्विपवीरजन्मावलाहरोमद्रुधिरप्रवाहः मालारूपंयथा
सौजन्यांबुमहच्छलीसुचरितालेखप्रभिन्निर्गतान्मोक्षाकृतचनृद्दशीसरलतायोगभवच्छ्रुत्वा यैरेषापिरशयाकलियुगराजा

85

राम:
४२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वलीसेविनातेषांभूलिभक्तिमात्रसुलभेसेवाकियत्कौशलं· एवमष्टौभेदाहूपकस्यप्राचीनैःप्रदर्शिताः एवंभेदाउपमायाअपिबहुशक्याः
एकत्रदर्शितेनप्रकारेणासंभवच्छलेः न्यत्राप्यत्रेतंशक्याइतिनप्रदर्शिताः तथाहि· वागर्थाविवसंपृक्तावित्यादौकेवलनिरवयवोपमाज्ञे
त्तेवनयनानन्दइत्यादौमालानिरवयवोपमा· ततःप्रतस्थेकौवेरीभास्वानिवरघुर्दिशं· शरैरुत्तैरिवोदीच्यानुद्धरिष्यन्नसानिव इत्य
त्रसमस्तवस्तुविषयसावयवोपमा· नेत्रैरिवोत्पलैःपद्मैर्मुखैरिवसुरःप्रियः· पदेपदेविभांतिस्मचक्रवाकैःस्तनैरिवेत्यत्रैकदेशा
विवर्त्तिनी· अन्यंतरागिरामपिव्यपेतवसुसंचयं· गतिकेवापरदिशादूरणांनिरकासयत्· इत्यत्राप्येकदेशविवर्त्तिनी· सर्वत्र
विशेषणोपमयाविशेष्योपमागम्यतेऽन्यत्रविशेष्योपमयाविशेषणोपमेतिभेदः· हरादयश्चक्रनिभस्यतन्वीतमालतालीं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

वनराजिनीला · आभानिवेलालवणांबुराशेर्द्वीपानिवद्वैवकलंकरेखा · इत्यत्रश्लिष्टशब्दनिबंधन केवलपरंपरितोपमा · अत्रलंबुराशेरपश्च
द्वीपोपमानधारा श्लिष्टकलंकरेखपाऽपमा चेति द्वयमपि संजातपरंपरं · यथावा · अस्त्रज्वालावलीढप्रतिबलजलधेरंतरीर्वायमाणो
सेनानाथेक्षितेस्मिन्नमपितरिगुरौ सर्वयत्नीभवतां · कर्णालंसंभ्रमेणात्यजनपसमरंसुचतार्दिक्यशंकांतातेचापद्वितीयेवहति
रणाधुरेकोभयस्यावकाशः · अत्रद्वेणास्यभौर्वेणोपमाप्रतिबलजलधेरित्यत्रोपमायाः साधिकेनुपमाद्वयमपि संजातपरंपं
रं · स्वयं राजहंसायतेराजाविद्याभेषमानसः · इत्यत्रश्लिष्टशब्दनिबंधनकेवलपरंपरितोपमा · उभयत्रापिमालापरंपरितम
नयेवरीत्यात्रेयं रेणुधांतस्परक्रोधोवालघर्मकयायतइतिवैधर्म्येणारूपकवदुपमेतिसमानं · अयंतुविशेषः समस्तवस्तुविषयरू

Nepal Sanskrit University, Bairnecki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यकं नविशिष्टरूपकं भवति विषयविषयिणोर्विम्बप्रतिबिंबधर्मविशिष्टयोस्ताद्रूप्यारोपेन निर्दर्शनाया एवावतरणात् सावयवोपमाया विशिष्टोपमांगमयति तत: प्रतस्थे कोवेराम्भास्वानिवेत्यत्र शरैरुदीच्यां दिशं प्रस्थितस्य रघोर्विशिष्टस्य किरणैरसात् शोषयितुं प्रतस्थे दिशं प्रस्थितेन विशिष्टेन रविणा साधर्म्यस्य फलितार्थतया लाभात् एवं क्वचिदुपमयान्यत्रोपमाणागम्यत्वं च तद्भावपर्यवसायि क्वचिद्विशेषणोपमया विशेष्योपमाया: बिम्बजिन्तर्वृष्टेतिराजइत्यत्र वृष्टगतसर्वनाविधिनेव तद्विशेष्यवृष्टविधे: क्वचिद्विशेष्योपमया विशेषणोपमाया: वैकृतप्रधानविधिनेव प्राकृतनदंगकलापविधे: उभयमप्येकदेशविवर्त्तिनोदाहृतं क्वचिदवयवोपमया विशिष्टोपमायागम्यत्वं भंगप्रधानगोचरप्रत्येकविधिकलापेनेव सर्वांगविशिष्टप्रधानगोचरप्रयोगविधे:. तन्न समस्तव

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्त्रविषयोपमोदाहरणोदर्शितं एकवाक्यतायामवयवोपमयाविशिष्टोपमागम्यत्वेरूपदाहरणं वाक्यभेदेपिदृश्यते हस्तद्वयभूतिमलिनोयथा
लंघयतिखलःसुजनं दर्प्यणमिवतंकुरुतेतथातथानिर्मलत्वापं अत्रावयवोपमया यथा भूतिमलिनोहस्तोदर्प्यणमधिकमधिकंघर्षयत्त
न्नरोन्नरंनिर्मलीकुरुतेतथाखलःसुजनमधिकंघर्षयन्नरोन्नरंनिर्मलमेवकुरुतइतिविशिष्टोपमागम्यते क्वचिद्विशिष्टोपमयादवय
वोपमानांगम्यत्वं विशिष्टविधिनेवविशेषणविशेष्यविधीनां यथा त्वदाननमधीराक्षसाविर्दशनदीधिति भ्रमद्भृंगमिवालक्ष्म
केशरंभातिपंकजं अत्रविशिष्टेनविशिष्टस्योपमयानदवयवभूतानांभृंगलोचनानांकेशरवृशनदीधितीनांपंकजाननयोश्चो
पमानोपमेयभावोगम्यते एवमसंख्योउपमाविकल्पाः तथा किंशलयकरैर्लतानांकरकलैः कामिनांजरांजयति नलिनीनांक

87

राम:
४४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मतमुखेर्मुखेनुमिर्योजितांमदनः इत्येवमाद्यारशनारूपकाद्यारूपकविकल्पाअप्यसंख्याः उक्तंहिकाव्यालोके अपर्यंतोविकल्पानांरूप
कोपमयोर्यतः दिग्मात्रदर्शितंधीरैरनुक्तमनुमीयतामिति इतिचित्रमीमांसायांरूपकप्रकरणं अथपरिणामः आरोप्य
माणस्यप्रकृतोपयोगित्वेपरिणामइतितल्लक्षणमुक्तं तत्रशंखपतेयामिमनोनाकूयैः शरांकरुणात्मकंजगत्राथ जन्मजरान
रणारीवनरणानरणपंतवांघ्रियुगम् निरीक्षवियुत्रयनैः पयोदोमुखंनिशायामभिसारिकायाः धारानिपातैः सहकिंत्रवांतश्रु
शोपमिश्रान्नतरंरास एतान्यवंतीश्वरपारिजातनानानिनारापतिपारणराणि संग्रन्थहंपस्यहरिद्रभूनांयशः प्रसूनान्यवतंसया
गीतिश्लोकेद्यारोप्यमाणानांतरणपतयतप्रसूनानांतरणानिरीक्षणावंतसतरूपप्रकृतकार्योपयोगेसत्यप्रकृतलक्षणाकृताऽलंकार

Nepal Sanskrit University, Bathmeer (Cambridge)

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वस्वकारेणैवरूपकमंगीकृतं आत्मानंरथिनंविद्धिशरीरंरथमेवतु बुद्धिंतुसारथिंविद्धिमनःप्रग्रहमेवचेत्यादिभुतायारोप्यमाणानांरथिरथादी
नांसोऽहनःपारमाप्नोतितद्विष्णोःपरमंपदमितिवक्ष्यमाणाध्वपारगमनरूपप्रकृतकार्योपयोगेसत्यपिभगवतावादरूपणोनानुमानिक
मपेक्षेषामितिचेन्नशरीररूपकविन्यासस्यहीतेर्दर्शयतिचेतिशारीरकसूत्रेरूपकमंगीकृतं अतस्तेषुलक्षणास्यानिव्याप्तिः एवंमित्रे
पुरत्नकिरणैः किरणैश्चिदेकोरुच्चावचैरुपगतेषुसहस्रसंख्यां दोषापिनूनमहिमांशुरसौकिलेतिव्याकोशकोकनदतांदधतेनति
नः इतिध्वनिमनि विकसदमरनारीनेत्रनीलाब्जगण्यधिवसतिसदयः संयमाधःकृतानि नतरुचिरकलापेवर्त्मतेयोमपूरेविनर
तसकुमारोद्यलचर्यश्चिपंचः इत्यपहुनौ डरोऽवाकुंभयुगेनजंभितंनचोपहारेणावयःकृतेनकिं प्रयासरिद्दुर्गमपिप्रतीर्यसानल

राम:
४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यतन्वीहृदयंविवेशयदित्यतिशयोक्तौच चक्रभ्रमराकरत्वाकुदृष्टिभिर्दूरवर्त्यमानात्वात् अत्यंतलेखनेनत्वात्तद्रूपत्वामेवमाधवंमध्ये इत्य
नुमानेनाव्याप्तिः धांतिमग्रहिमांशोर्विकाशोअपहुतावमरनारीनेत्राणांब्रह्मचर्यविनरसोऽनिशयोक्तौ कुंभपुराणस्यसरित्तरसोऽनुमानेमाध
वस्यचक्रभ्रमरोचप्रकृतकार्योपयोगित्वात् अपहुतौचयथापद्मोपमानेतथैवभवतीतितद्वत्तुन्यायेनसंयमाधः कृतामरनारीनेत्राधिष्ठानस्य
ब्रह्मचर्यविनरसोपयोगित्वं सुहृदालापेनैवप्रसादपतिष्यालुरांतरःक्लेशः कांतामुखचंद्रेराहिशाम्यतिरुचिरेराविरहजलाशयः इतिद
ष्टांतसंकीर्णापरिणामेचाव्याप्तिः तत्रारोप्यमाणास्योपमानकोपयंतर्गताप्रकृतकार्योपयोगित्वादिति अत्राहुः आरोप्यमाणास्यप्रकृता
ननोपयोगित्वेपरिणामइतिलक्षणार्थः नचैवंसुहृदालापरूपकादिष्वतिव्याप्तिः तेष्वारोप्यमाणानांतरणपनपनप्रकृतसूर्यादी

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नास्यात्मनैवनरत्वानिरीक्षणावनंसनकमलविकासनादिकार्योपयोगित्वसंभवेनतदर्थंनपुनर्विद्युद्यद्वाश्वंशादिवक्रतात्मनापश्चनपेक्षणात्
नवोक्तलक्षणास्यपरिणामेऽसंभवः यत्रापिप्रमाणांकिंचित्कार्योपयोगित्वंनिबध्यमानंस्वतन्त्रस्यनउपयोगित्वासंभवात्वक्रतात्मनापश्चिमपे
क्षतेतत्रैवपरिणामांगीकारात् यथा प्रसन्नेनदृगद्वेनवीक्षतेमदिरेक्षणेति अत्रत्वद्वस्यवीक्षणोपयोगित्वंनिबध्यते मयूरव्यंसकादिसमा
सेनोत्तरपदार्थप्राधान्यात् नचोपमितसमासाश्रयणेनपूर्वपदार्थप्राधान्यात्तद्दृशस्यवनउपयोगित्वंनिबध्यतेइत्यप्तिनिवाच्यं प्रसन्नेनेति
सामान्यधर्मप्रयोगात् उपमितंव्याघ्रादिभिःसामान्याप्रयोगइतिगदप्रयोगएवोपमितसमासानुशासनात् भ्रूस्यवीक्षणोपयोगित्वं
नस्वात्मनासंभवति अत्रःवक्रतदृशात्मनापश्चपेक्षणात्परिणामालंकारः नन्वेवंयामिमनोवाक्कायैरित्यादिष्वपितरणादिशब्दलक्षित

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जन्मनाशाद्युपयोगित्वं तरणपादीनां मंत्रिमुखाद्यात्मनैवेति तेष्वपि परिणामप्रसंगः. मैवं यस्य कार्यवाचि पदं प्रथमप्रतीतं तत्सुखार्थं निर्वर्त्तनसामर्थ्यं तदा
त्मनोपयोगित्वात्स्वात्मनः तरणादिपदस्य सुखार्थनिर्वर्त्तनसामर्थ्यस्य च तरणपादिष्वेव व्यवस्थितत्वात् तस्माऽदाहनेषु रूपकमेव ते वृत्तानि
व्याप्तिरिति नन्वेवमुक्तानि व्याप्तिपरिहारेऽपि सोऽपूर्वो रसनाविपर्ययविधिस्तत्कर्णाणोश्चापलं दृष्टिः सामर्थ्यविस्तृतत्वपरदिक्किं भूयसोक्तेन वा.
सर्वविस्मृतवानसि भ्रमरहेयद्वारगोद्याप्यसावंतः भूत्यकरोऽपि सेव्यतइति भ्रान्तः कस्यचिद्रः. इत्यप्रस्तुतप्रशंसायामतिव्याप्तिः. तत्राप्र
स्तुतवारणारसनाविपर्ययादीनां प्रस्तुतऽश्रुभुरसनाविपर्ययाद्यात्मतयैव तत्सेवात्यागलक्षणाकार्योपयोगित्वात्. नहि पश्चाद्वारणास्य
कर्णाचापलं भ्रमस्य तत्सेवात्यागे हेतुस्तथा तस्य रसनाविपर्ययः भूत्यकरणाच्च तत्र हेतुः मदः प्रसुप्ततत्सेवायामेव हेतुरिति तस्य तत्त्याग

Nepal Sanskrit University, Bajrabarahi Campus,

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हेतुत्वं हस्तपादत्वं स्वमपि यत्रेषां त्यागहेतुत्वं निवर्त्यते तद्वारणादीनामप्रकृतानां प्रयोजनं तत्स्थापनमेव निर्वाहमिति निमुद्दलापेनैव यत्रोदाहृ
तपरिणामाव्याप्तिश्च तदवस्था. तत्र चन्द्रवन्मुखस्याप्यप्रकृतस्य प्रकृतानन्वयोपयोगित्वाभावात्. उच्यते. प्रकृतान्वयेन यत्र प्रकृतशब्दो विषयमात्रपर
इति नोदाहृतपरिणामाव्याप्तिः उपयोगित्वं च प्रकृतागमककार्यं प्रतिविवक्षितं. अप्रकृतप्रशंसोदाहरणे प्रकृतस्य प्रयोजनं सेवात्यागागम
नवारणसेवात्यागप्रयोजनत्वमिति न तत्राव्याप्तिव्याप्तिः. एवं चकारोपमानामारोपविषयान्वयाक्षिप्तं प्रकृतस्योपयोगित्वात् परि
णामोदाहृतइति विद्यानाथलक्षणं प्रकृतस्येति पदस्य प्रकृतागमकस्येति व्याख्यानेन परिष्कर्तव्यं. अपंत्र परिणामो द्विविधः. सामा
नाधिकरण्येन वैयधिकरण्याभ्यां. सामानाधिकरण्येन यथा. तीर्त्वा भूतेशमौलिस्रजमपि मधुनीमालनासौ तृतीयस्तस्मै सोमित्रिमैत्रीम

Nepal Sanskrit University, Baimeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्र पक्षतवानातरंनाविकाय कामग्राह्यस्तनीभिः प्रवरयुवतिभिः कौतुकोद्रेचदक्षंकृतुदन्वीयमानःक्षणमचलमथोचित्रकूटं व्रतस्थैः अचारो
प्यमाणाआनरोपविषयभूतसौमित्रेत्रीरूपतापत्र्यागृहोपकारलक्षणाकार्योपयोगीतिपरिणामः उभयोर्विभक्त्येकान्यमानाधिकरणत्व.
वैयधिकरणेनयथा पुंत्रागजालकैर्हारान्कांचीः केसरदामभिः कर्णिकाः कर्णिकारैश्च विहर्तुं विदधुर्वने भत्रारोप्यमाणाहारादयोवि
षयभूतपुंत्रागजालकादिरूपतयैववनत्रीणोपयोगिनइतिपरिणामः विभक्तिभेदाद्वैयधिकरणत्वं इदंचवैयधिकरणंरूपकेपि.
संभवति यथा तारानायकवोखरायजगदाधारायधाराधरछायाधारकंधरायगिध्रिसंगेकभृंगारिणो नघाशेखरिणोदशाति
तकिनेनारायणोनास्त्रिणोनागैः कंकणिनेनगेनगदिनोनाथायसेयंनतिः भत्रनदृष्टशोर्विषयोर्विभक्तिरारोप्यमाणयोः

Nepal Sanskrit University, Banaras Campus, K

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शेखरतिलकयोर्नास्ति यथा द्विर्भावः पुष्पकेतोर्विविधविटपिनां पोनरुक्तं विकल्पश्चिंतारत्नस्य वीक्षानयनतनुभवोयासवस्य द्विरुक्तिः
द्वैतं देवस्य दैत्याधिपमथनकलाकेलिकारस्य कुर्वन्नानंदं कोविदानां जगति विजयते श्रीनृसिंहक्षितीन्द्रः अत्र विषयस्य राज्ञो विषयिणां पु
ष्पकेतुप्रभृतीनां च विभक्तिभेदः अथ परिणामस्य व्यापृतायां किमुदाहरणं नरसिंहधरानाथ केवयं नवर्णने अपि राजानमाक्रम्य यः
शोयस्य विजृंभते इति विद्याधरेणोदाहृतं अत्र राजपदेन चंद्रे विषयेनिर्दिष्टे तत्राप्यारोप्यमाणस्य रूपस्याक्रमणरूपकार्योपयो
गिनः प्रतीतेः परिणामोव्यज्यते इति तदयुक्तं अत्र त्वारोप्यमाणस्य रूपस्याक्रमणेनाक्रमणोपयोगो न चंद्रात्मना विद्याधरेणापि
विषयिणः स्वरूपेणाकार्योपयोगेनऽपयोगापविजयिणो विषयात्मना परिणामापेक्षायां नैव परिणामोंगीकृतः यदाह तेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रिरामसंद्विविधंकथयंन्यारोप्यमाणविषयतयापरिणामतियचविषयीपक्रतनकार्योपयोगायेतिविद्यानाथेनदृष्टान्तं एवशास्त्रनिवसायोराजपाद
निषेधया करणकिंकुमकूलेषुवासस्तंशमयेत्कथमिति तास्यत्रप्रागुक्तदोषात्तभंगः एवचरणसेवायांप्रस्तुतायामारोप्यमाणायाश्चन्द्रकि
रणसेवायानृपचरणसेवात्मनयैवतापशांतिहेतुत्वात् तापशब्दस्यसौरतापसाधारणेपिप्रकृतेराज्यभ्रंशजनितताप्यस्यैवविवक्षित
त्वात्तत्रिवर्त्तनेचचन्द्रकिरणसेवायाःस्वतोसामर्थ्यात्तथापिप्राचीनानांमतस्यैतदुदाहरणं तेहिराजपादनिषेवयेत्यस्यप्रकरण
नियंत्रितत्वात् अप्रकृतायांचन्द्रकिरणसेवायांशब्दशब्दशक्तिमूलोव्यंजनाव्यापारइतिमन्यते वस्तुतस्तुप्रकृतेप्यर्थेशब्दानामभि
धेयव्यापारइत्यस्माभिःश्लेषप्रकरणेव्यवस्थापयिष्यमाणत्वादितिराजपादनिषेवयेत्यत्रचन्द्रकिरणसेवायामप्यभिधेयव्यापा

Nepal Sanskrit University, Bameer Campus, Kat[illegible]

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रः अतः प्रकृतप्रकृतद्वयता दूष्यप्रतीतेः श्लेषभिन्निकाभेदाप्रदर्शापकृतकानिशयोक्त्यादिष्विव संसर्गविधयैवलाभात्स्यप्रकृतकार्योपयो
गितापालतीपपालाभात्तनक्तापिव्यंजनव्यापारापेक्षेतिनेदं परिणामध्वनेरुदाहरणं. इदं च दूषणं पूर्वोदाहरणेपि तुल्यं. इदं तूदाहरणं
चिरादिसहस्रेतापंचित्रचिंतापरित्यज. नन्वस्तिशीतलः शौरेः पादाब्जनखचंद्रमाः. अत्र चिरतापात्रैव्रतिहरिपादाब्जनखचंद्रसंज्ञावप्र
दर्शनेन तदेवनिषेधस्तत्रिषेधनादर्थतावः शांतिनेष्यतीति परिणामोव्यज्यते. एवं रूपकवैलक्षण्येन परिणामोनिरूपितः न
त्ररूपकेप्रकृतमप्रकृतरूपापन्नंभवति. परिणामेत्वप्रकृतंप्रकृतरूपापन्नंभवतीतिवैलक्षण्येनेतदपुपजीव्यचक्रवर्त्तिनान्यथै
वतयोर्वैलक्षण्यंवर्णितं. मुखचंद्रइतिरूपके मुखंमहारजतरूपेणापदवदारोप्यमाणाचंद्ररूपेणास्थगितस्वरूपंभवति. मुखचंद्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गाताय: शाम्यतीति परिणामेन तु सुखमनाह्लादि स्वरूपमेव भवति· चंद्रस्य मुखात्मनैव विरहनाप्रशांतिहेतुत्वादिति· उक्तं च· विषयाकार
मारोप्य विषयस्य गतं यदा रूपकत्वं तदा तत्र रंजनेन सम्बन्धः· प्रदातृविषयो रूपान्तरस्वभावप्रच्युतो भवेत्· उपयुक्तो न दाकारः परिणा
मस्तदा मतइति· अत्रेदं विचारणीयं· रूपके विषयस्य स्वगतनंनतावन्निरोहितरूपत्वं रंजनत्वमेव पाश्चक्रिस्वरूपस्यैवाहार्यारोपेणाविष
यस्य तिरोधानासंभवात्· शारीरके वयस्वसौ न पतितमुद्गीथमुपासीतेत्यत्रोद्गीथस्यादित्यदृष्टिविषयत्वांगीकारो रंजनदृष्टि
विषयशक्तिस्वरूपमिवोद्गीथक्रियास्वरूपतिरोधीयेतेत्याशंक्याहार्यदृष्टेरतिरोधायकत्वस्योक्तत्वात् नापि विषयस्योपसर्जन
त्वं परिणामेपि तुल्यत्वाऽभयत्राप्युत्तरपदार्थप्रधानस्य प्रसरयंसकादिसमासस्याविरोधात्· अतस्त्वविषयविशेषितत्वंस्य

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गनमिन्यपि निरस्तं विजयिनो विशेष्यत्वात्. तस्मात्स्वगतास्वगतवैलक्षण्यवचो निरालम्बनमिति विषयालम्बनीयपोगेनैव परिणामस्वरूपकाद्वैल
क्षण्यं समर्थनीयमित्यलं विस्तरेण. इति चित्रमीमांसायां परिणामप्रकरणम्. अथ संदेहः सास्यादप्रकृतार्थस्य याथीरनवधा
रणं प्रकृतार्थाश्रयानज्ञैः संसंदेहः सइष्यते. त्रिविधश्चायं संसंदेहः शुद्धो निश्चयगर्भो निश्चयांतश्च. क्रमेणायथा आनीयद्विषतांधनानि
विपिनेराजन्यचूतमरतेनेद्यालोक्यविनिर्मलं हिमजलाखंडं करंडं पुनः. किंवायं किमुपेक्षणं किमुधनं किंक्षेपणीयापुरं किंवादैवत
मित्यनिश्चितधियोमदाः पुलिंदजनाः. अयमार्जुनः किंसरवनुरगैः सप्तभिरिनः कृशानुः किंसर्वाः प्रसरति दिशो नैषनियतं कृतांतः
किंसाक्षात्सहिषवहनोसाविनिचिरसमालोक्याजौत्वांविदधतिविकल्पान्मतिभ्रमः. किंतावत्सरसिसरोजमेतदारादहोविसुखम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वभासनेपुवत्याः संग्राम्यक्षरमिति निश्चिवायकश्चिद्विद्वो कैर्वकसहवासिनांपरोक्षैः इतिवदंति अत्रेदंविचारणीयं साम्यादिति किंअत्राद्वेतो
द्वैसतीतिवस्फलत्वेनहेतुत्वविवक्षयापंचमी उतस्वतोहेतुत्वविवक्षया आद्येऽपक्रतसाम्याभिव्यक्तिफलकत्वमर्थः स्यान्नथासम्यानीयद्वि
षताभिसुदाहरणोऽव्याप्तिः नहितत्रकिमकरंडकस्यवाद्यादिसादृश्याभिव्यक्तौकविसंरंभः किंतुद्विषसुरंईदृशीमवस्थामापन्नमिति
राज्ञःप्रतापातिशयाभिव्यक्तौद्वितीयेसाम्यादित्यनेनकिंतेकमेवाप्रकृतसाम्यंयावत्संदेहस्तोपुस्थितिहेतुत्वेनविवक्षितं उतैक
मनेकंवेत्यनियमः आद्येअयंमार्गणाः किंमित्याद्युदाहरणेऽव्याप्तिः नहितत्रकिंलक्ष्मीरुर्वशीवेयंरंभावामेनकाथवेयंत्रलक्ष्मी
त्वादिविकल्पेषुनिश्चायितसौंदर्यसाम्यवदेकमेवसाम्यमिहमार्गणेऽनेकादिविकल्पेषुहेतुः किंतुप्रतापेनजातोत्कर्षत्वसाम्यंमार्गणेऽनेक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विकल्पे उपाधर्मत्वसाम्यं कुशानुत्वविकल्पेक्षणोनसकलहर्त्वसाम्यं कुलांतत्वविकल्पेचहेतुः द्वितीये दुहनमयशिरः कलिंगवद्रास
मरमुखेकरहाटवेदनर्वेतिविकल्पालंकारेऽनिष्टाप्तिः अत्रदिग्विजयप्रवृत्तेनबलवतारातासमरेप्रशक्तेपथाकलिंगनृपतिः स
माक्रांतोबलवताकांक्षत्रघ्नशानांश्रियं भयेनवैनसींहत्रिनभौजंगींकदाचनेतिनीतिमनुसृत्यासदिग्विजिनराज्यलक्ष्मीभ्रंश
परिहारकामः शिरोनमितवान् तथावाशिरोनमय यथाकरहाटनृपतिर्जयेनलभ्यतेलक्ष्मीर्नरशोनसुरांगनेतिनीतिमनुस
त्ययुद्धकामोधनुर्नमितवान् तथावाधनुर्नमयेतिसमयोचिताशोपदेशेनत्रप्रजाचरितदृष्टांतप्रापितानवस्थितार्थसत्वात्
नचतत्रभोकेतादृशीनिबंधनतास्तीतिनातिव्याप्तिरितिवाच्यं तत्रिबंधनस्यापिलक्षणांतर्गतिविवक्षायांनीवनयहशोनप्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गृहीत्वा पुनरुन्नताः किं कनिष्ठाः किं मुज्येष्ठाः घटीरंत्रस्पार्जनाइत्यादिषु संदेहविषयनिबंधनगम्यसंदेहालंकारेष्वव्याप्तिप्रसंगात्. उ
त्प्रेक्षायां वाच्यगम्यभेदवदिहापि द्विविधोदाहरणादर्शनेन वाच्यगम्यभेदेन द्वैविध्यस्यांगीकर्तव्यत्वात्. अपि च नवधारणेति किमुच्य
ते अनिश्चयात्मकत्वमिति चेत्. तथा सति बालेंदुवक्त्रादिपदविकाशभावादित्यादावुदाहरिष्यमाणायामप्रकृतसाम्यनिमित्तनादात्म्यस
भावनारूप्यायामुत्प्रेक्षायामतिव्याप्तिः. संभावनायाऽनुत्कटकोटिसंदेहरूपत्वात्. विरुद्धानेककोटिवगाहित्वं तदिति चेत्. तथा
पि मुखचंद्र इत्यादिरूपकेऽतिव्याप्तिः विरोधेन परस्परनिक्षेपकतया विवक्षानेककोटिवगाहित्वं विवक्षितमिति चेत्. तथाप्यंकेके
पि शशांकि रे इत्यादावुदाहरिष्यमाणायामप्रकृतावतिव्याप्तिः. संदेहविकल्पयोर्वाकारादिनेवनत्रापि तत्तन्मनस्तोपव्यासेनपर

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वत्र निक्षेपसिद्धेः अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नुकांतप्रभः शृंगारैकरसः स्वयं नुमदनो मासो नुपुष्पाकरः वेदाभ्यासजडः कथं नु विष
यव्यावृत्तकौतूहलो निर्माणं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिरिति मे संदेहो दाहरतो चाप्रियः तत्र चंद्रादीनां संदेहधर्मिणामे
वानेकत्वप्रकारत्वं सर्वत्र वर्णनीयवनितास्वरूपत्वमेकमेव न्यनेककोटिकत्वाभावात् तत्र साम्यनिमित्तत्वाभावान्न संदेहः इतो ग
तासाकूगतानजानेऽहं गता मे हृदयं गतावेति संदेहो न संभाव्यते इति वाच्यं वर्णनीयनायिकायाः कांत्या चन्द्रसाम्यं सौरभसौकु
मार्याभ्यां पुष्पसाम्यं च निमित्तीकृत्य किमस्यां कांतिनिधानमूनश्चन्द्रः स्वकांतिसंपदा सृष्टोऽतो पुष्पसमयः स्वकीयपुष्पसंपदेति
संदेहनिबंधनात् शृंगारैकरसः स्वयं नुमदन इत्यंशस्य शृंगारविभ्रमबाहुल्यमात्रपर्यवसायित्वेन किंचित्साम्यनिमित्तत्वाभावेपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चंद्रवसंतधर्मिकांशयोस्तत्रिमित्तत्वातिवारणात् एवंचप्रकृताश्रयेत्वेनस्यप्रसङ्गंदाहृतसंदेहस्यवर्तनीयत्वाधिकानाश्रयत्वेनाभिधा
त्रिरितिचेत् अत्रब्रूमः बुद्धिःसर्वात्मनान्योन्यक्षेपिनानार्थसंश्रया लाघवमूलावार्थस्यक्तसंदेहालंकृतिर्मता यत्रस्यान्योन्यप्रतिक्षेप
कविरुद्धनानार्थालंबनत्वंविकल्पस्याप्यस्ति तथापितदर्थानांसर्वात्मनापरस्परप्रतिक्षेपकत्वंनास्ति किंतुपक्षेतत्प्राप्तिमनिरु
ध्यस्वप्राप्तिपक्षस्वस्वपरिपंथिप्राप्तिप्रतिक्षेपकत्वं नहिव्रीहिभिर्यवैर्वायष्टव्यमितिविकल्पोपदेशेव्रीहयोयवान्यवाश्चव्री
हीन्सर्वात्मनायागात्प्रतिक्षिपंति तथासतिशास्त्रस्यानिर्णायकत्वेनानुष्ठापकत्वेनप्रामाण्यप्रसंगात् किंतुस्वस्वानुष्ठा
नपक्षएव अतएवव्रीहिभिर्यवैर्वायष्टव्यमितिसंदेहेनएकस्यांप्रतिव्रीहिभिर्यवैर्वायष्टव्यमितिकल्पेप्रसंगसमाकारमेकवाक्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निर्णायकं प्रत्यक्षमूलसंदेहनिवर्त्तकमनुष्ठापकं च दृश्यते प्रत्यक्षवाक्ये वाकारः सर्वात्मना पक्षांतरप्रतिक्षेपार्थः उभयवाक्ये पक्षेतत्प्रतिक्षेपार्थश्चेति
विशेषसंज्ञावान् स्वं विकल्पालंकारोदाहरणोपि द्विविधस्यापि नीतिशास्त्रस्य प्रामाण्यात् उपदिष्टफलेच्छानुसारेणोभयमपि पक्षे उ
पादेयं युक्तमिति निरोधनुर्नमनयोर्न सर्वात्मना परस्परप्रतिक्षेपकत्वमिति विकल्पालंकारेनातिव्याप्तिः अपरयोदाहरणे सर्वात्मना प
रस्परप्रतिक्षेपस्य चेपि वाकारार्थस्य स्पर्शाभावात्रातिव्याप्तिः अत्र हि केचिदन्यइति मतान्तरत्वोपन्यासेन पक्षाणां परस्परप्रतिक्षेपलाभः
नन्वाकारार्थस्य स्पर्शोस्ति तत्रेक्षायामपि नातिव्याप्तिः तत्र हि अमुकटकोटिकेसंशयेकोटौ समबलत्वाभावेन वाकारार्थस्य स्पर्शाभावात्
अस्याः सर्वविधाचिसुदाहरणोपरस्परप्रतिक्षेपकनानाकोटिसमाश्रयत्वाभावेपि तथाभूतनानाधर्मिरूपार्थसमाश्रयत्वसत्वात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्याप्तिरिति सर्वमनवद्यं · संदेहालंकारध्वनिर्यथा · अस्मत्कुलकूटस्थवक्षस्थलाचार्यकृते वरदराजवसंतोत्सवे · कांचिकांचनगौरांगीं वीक्ष्य सा
क्षादिवश्रियं वरदः संशयापन्नो वक्षस्थलमवैक्षत · अत्र संशयस्य शब्दोपात्तत्वेपि तावन्मात्रस्यानलंकारत्वात् नदलंकारत्वप्रयोज
कस्य वक्षःस्थलेस्थितैव लक्ष्मीरनेन वर्णितेत्यपि प्रतीतिरित्येवं संशयाकारस्य वक्षःस्थलमवैक्षतेत्यनेन व्यंग्यत्वात् संदेहालंकारध्व
निरत्रेति · यथा दर्पणोच्छ्वासपरिभोगदर्शनीयेष्टतप्रणायिनो निवेदयः · वीक्ष्य बिंबमज बिंबमात्मनः कानिकान्यपि च कारतज्जयेत्य
त्र कानि कानीति सामान्यतो निर्दिष्टानुभावविशेषप्रतीत्यर्थं तज्जाशब्दप्रयोगेपि तस्याः स्वविभावानुभावाभ्यां रसानुगुणमिति कि
रूपोध्वनिः · यद्यपि संशयापन्नइत्यनेन लक्ष्मीः पुरोदृष्टा या श्वमध्येकस्या रूपमधिकमिति संशयाविष्टइति वा · त्रिः समाधिरूपक

Nepal Sanskrit University, Bansbari Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वामिमानिनीलक्ष्मीः पुरतस्तांदृष्ट्वाकथंवर्त्तेतइतिसंशयापन्नइतिवा· इयंवक्षसिकुचनिवेशनीयेतिसंशयापन्नइतिवावदयः संशयाकारावक्षः
स्थलमवैक्षतेत्यनेनसंगृह्यः संभवतिनथापिसर्वेषामपिसंदेहानांसादृश्यमूलकत्वाद्यतिरेकमूलसंदेहस्याप्यत्रसंभवेपिकथंचि
त्सादृश्यमूलकत्वात्संदेहालंकारश्चस्यउदाहरणात्वमितिप्रकृतमेव। इतिसंदेहालंकारश्चकरणं· अथभ्रांतिमान्·
कविसंमतसादृश्याद्विषयेपिहितात्मनि· आरोप्यमाणात्मभवोयत्रसभ्रांतिमान्मतः· पिहितात्मनीत्यनेनारोप्यमाणात्मभवस्यचा
रसिकंकविप्रतिभयाकल्पनंविवक्षितं· तस्यैवविषयपिधानमात्रार्थात्· अतोरूपकादीनांव्यावृत्तिः· उदाहरणं· कपालेमार्ता
रः पयइतिकरालेटिप्पाद्विनलहरिद्रवेनाच्छिसमितिकरीसंकलयति· रनांतेजत्यस्यानूहरतिवनिताप्यंभुकमितिप्रभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मत्रभ्वंशेजगदिदमहोहोभ्रमयति· अत्रलेहनादिप्रवृत्तिपर्यंतमोक्षेःस्वारसिकस्वभ्रमः कविप्रतिभयाचंद्रिकोत्कर्षद्योतनायनि
वहः क्वचिद्वांतेरुत्तरोत्तरंपल्लवेनचमत्कारः· वल्लालक्षोणिपालत्वदरहितनगरेसंचरंतीकिरातीकीर्णान्यासायरत्नाप्रुहतर
खदिरांगारसंघाकुलांगी· कृत्वाभ्रखंडखंडंतरुपरिमुकुलीभूतनेत्राधमंत्रीस्वाधामोदानुधावन्मकधुकरनिकरेक्षुमशंकां
करोति· क्वचिद्भिन्नकर्णकोत्तरोत्तरंभ्रांतिनिबंधनेनचमत्कारः· शिंजानेमंजरीतिस्तनकलशयुगंचुंबितंचंचरीकैस्तत्रासो
ल्लासलीलाःकिशलयमनसापारायःकीरदृष्टाः· तत्रोपाशालपंत्यःपिकनिनदधियानाडिताडिताःकाकलोकैरिन्त्यंचो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

लेन्द्रसिंहत्वदरिमगदशांनाप्यरणंशरणं· क्वचिदन्योन्यविषयभ्रांतिनिबंधनेनचमत्कारः· यथा· पलाशकुसुमभ्रांत्याभुक्तगोपतनयतिः सोयिंबूफलभ्रांत्यानमलिंधर्नुमिच्छति· विस्फूर्त्तिमत्यांतेकीर्त्तौविधिवैकुंठशंकरः· आरोहंशयितुंवस्त्रलाकांक्षंतिमहीतले· इत्यत्रभ्रांतिमदलंकारोयंगः· साद्यपाठ्यमूलौसंदेहविश्वमौसंदेहभ्रांतिमदलंकारप्रयोजकौनभवतः· यथा· अमुष्यवीरस्यजयायसाहसीशरासनस्याविशिखैस्सनाथयन्· निनज्जयामासयशांसिसंशयेसमरक्षितिलोकीविजयार्जितान्यपि· दामोदरकराघातचूर्णिताशेषवक्षसा· दृष्टंचागूरमल्लेनशतचंद्रंनभस्तलं· आद्येऽर्जयविजयोद्योगसाहसप्रयुक्तः कीर्त्तिभ्रंशः संदेहः· द्वितीयेगाढमर्मप्रहारकृतंचप्रविभ्रमइति· इतिभ्रांतिमत्त्वकरणं· अथोत्प्रेक्षालंकारः· निमित्तभेदादेकस्यवस्तुनोयदनेकधा· उत्प्रेक्षणमनेकेनतत्

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लेखं प्रवक्ष्यते यत्र नानाविधधर्मयोगेपेकं वस्तु तत्र धर्मयोगरूपनिमित्तभेदादनेकेन ग्रहीत्रानेकधोल्लिख्यते स उल्लेखः कीर्त्तिगंगाहिमक्षमाभृ
दोजः सूर्योदयाचलः शत्रुसेनाविमंथाद्रिर्गुणरत्नौघरोहणाद्रिरिति मालारूपके एकस्य राज्ञो यशस्वित्वादिधर्मयोगरूपनिमित्तभेदात्तुषार
द्रित्वाद्यनेकप्रकारेणोल्लेखनमस्तीति तत्रातिव्याप्तिनिरासाय अनेकेनेत्युक्तं तत्र ग्रहीतृभेदनिबंधनं भवत्यनेकधोल्लेखनमिति नातिव्या
प्तिः विद्याविक्रमसौंदर्यतपसां निधिस्तागतं अपश्यन्विजयश्चिरुधाः भूरत्नस्त्रिषोवृद्धाश्वकौतुकादित्यत्र एकस्य वर्णस्य विद्या
द्यनेकधर्मयोगरूपनिमित्तभेदादनेकेन ग्रहीत्रोल्लेखनमस्तीति तत्रातिव्याप्तिवारणाय अनेकधेत्युक्तं तत्र कौतुकाख्यस्वरूपालोकनमा
त्रनिबंधनमानेकधोल्लेखनमिति तथा वृत्तिः सिंजानैर्मंजरीतिस्तनकलशयुगं चुंबितं वक्रकेरी सुरक्ताशोकमनेककर्णकधांतियरंप

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गयांसनादीनां मंजरीसादृश्यादिनिमित्तभेदादनेकेन चंचरीकादीनां संतरीत्यनेकप्रकारेणोल्लेखनमस्तीति तत्रातिव्याप्तिवारणाय एक
स्मवस्तुनइसुक्तं कीर्त्तौ विस्फूर्त्तिमत्यां नेमृणालक्षीरहंसिनः द्वयेपिनागास्तत्र तिजिह्वनोल्लोलनं मुहुरिति भ्रांतिमदाहरणेएकस्या
एवकीर्त्तेरनेकेन कुंजरभुजंगरूपेणाग्रहीत्रामृणालक्षीररूपत्वानेकप्रकारेणोल्लेखनमस्तीति तत्रातिव्याप्तिनिरासायनिमित्तभे
दादिसुक्तं तत्रकीर्त्तिगतंधावल्यमनेकमुल्लेखनद्वयेपिनिमित्तं. यद्यपिगजभुजगानांस्वस्वप्रियाहारलोभरूपभेदोप्यस्ति. तथापिनि
मित्तभेदादित्यनेनएकनिमित्तविरहेविवक्षितइतिनव्याप्तिः. तस्यसंख्यासत्वेनिमित्तभेदादितिस्वरूपकथनमात्रं. एवम
पि. यदि. कांत्या चंद्रविडः केचिन्सौरभेणांगुजंपरे. वक्त्रेन दवयंधूमस्तपसैकंगनंद्वयमिति भ्रमबहवोदाहरणादिशेषेतिव्याप्तिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुंदरातपनीमनेनोल्लेखनंनिषेधास्पृष्टत्वेनविशेषणीयं तत्राद्योल्लेखनद्वयंपरमतत्तोपन्यासमामर्थ्यात्गम्यमाननिषेधमितिना
तिव्याप्तिः स्त्रीभिः कामोर्थिभिः स्वैरुः कालः शत्रुभिरेक्षितः अत्रचानेकधोल्लेखनेरुच्यर्थित्वभयादिकंपथायोगंप्रयोजकं रुचिर
मिरतिः अर्थित्वंतिप्सा द्विविधश्चायमुल्लेखः भ्रुवोऽलंकारान्तरसंकीर्णाश्च तत्रभ्रुवोयथा जगत्त्रातेतिहृद्याभिः श्रीकांतइतियौवनैः
यथास्थितश्चवालाभिर्दृष्टः शौरिः सकौतुकं भत्रयस्तथाभीतंभक्तंगजंत्वरयात्रापतेम्मसोपमादिपुरुषइतिवृद्धाभिः संसाराद्भीत्या
तदभयार्थिनीभिः कृष्णः पुरंप्रविशन्दृष्टः पलथाचंचलत्वेनप्रसिद्धापालक्ष्म्याभपिकातोपचारवेदस्थेननित्यवल्लभःसोयंदिव्य
पुवेतिपुवतिभिः सोत्कंठाभिर्दृष्टः बालाभिर्बालस्वभावान्यथास्थितपुरुषवेषपुत्रोदृष्टइतिसर्वत्रवस्तुसतानानारूपेणोल्ले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

स्वादयंभुद्रः यथाबाहर्धचरितेभ्रीकण्ठजनपदवर्णनेयत्तपोवनमितिमुनिभिः कामायतनमितिवेश्याभिः संगीतशालेतिनाम्नकैर्यमनगरमि
तिशत्रुभिश्चिंतामणिरित्यर्थिभिः वीरक्षेत्रमितिशस्त्रोपजीविभिः गुरुकुलमितिविद्यार्थिभिर्गन्धर्वनगरमितिगायकैर्विश्वकर्मनगर
मितिविज्ञानिभिर्तीर्थभूमिरितिवैदेहकैर्दुर्गस्थानमितिवंदिभिः साधुसमागमइतिसद्भिर्वज्रपंजरमितिशरणागतैर्विटगोष्ठीतिवि
दग्धैः सुकृतपरिणामइतिपथिकैरसुरविवरमितिवादिकैः शक्राभ्रमइतिशमिभिरप्सरःपुरमितिकामिभिः महोत्सवसमाज
इतिचारणैर्वसुधारेतिचविषैरगस्यत अत्रतपोवनादिभूपिष्टत्वात्तपोवनत्वाद्युल्लेखः भुद्रः अत्रैवयमनगरत्वाद्युल्लेखःसंकी
र्णः तत्रयदियमनगरत्वादीनामुपरंजकतामात्रेणानयत्तदारूपकसंकरः यदितादूप्यानुभवगोचरतयातदाभ्रांतिमत्संकरः

100

राम:
४७

Nepal Sanskrit University, Balmeeki Campus, Kat

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अयंचोल्लेखोवर्णपगुणोकर्षस्यापनायाचेतनकर्तृकोपिनिबध्यते यथा तत्रैवहर्षवर्णनेनिः स्नेहइतिधनैरनाश्रयणीयनिर्दोषैर्निग्रहः
चिरिनीस्त्रियेऽरूपसर्पइतिकतिनानीरसइतिव्यसनैर्भीरुरित्यपयशसाऽर्थरुविन्नष्टनिरिनिविन्नभुवास्त्रीयरइतिसरस्वत्याषणाइतिप
रकलत्रैः काष्ठमुनिरितियतिभिर्मूर्खइतिवेश्याभिर्नयइतिमुग्धाभिः कर्मकरइतिविप्रैरसहायइतिशास्त्रयोधैरेकमप्यनेकधाष्टसमा
गमितिभ्रांतिमदलंकारादयोप्येवमचेतनकर्तृकानिबध्यंते मित्रेषुरत्नकिरणोः किरणोश्चिवेश्चोरुद्भावचैरुपगतेषुसहस्रसंख्यां
दोषापिनूनमहिमांभुरसौकिलेतिव्याकोशकोकनदतांदधतेनलिन्यः इत्याद्यो मधुलुब्धामधुकरास्तृषितास्चचकोरकाः सुगंधि
कांतिसंपत्रमनुधावंतितेमुखमित्यत्रोल्लेखोव्यंग्यः विद्याविक्रमसौंदर्यैतिभ्रोकेविद्यारीनांस्वरूपावलोकनकौतुकमात्रेनिमि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्नतपायदिनविश्रांतिः किंतु विद्वन्नाप्युल्लेखवद्वनोकनकौतुकनिमित्तनायांपर्यवसानंतदत्रापुल्लेखनगतानेकधात्वविच्छित्तिविशेषस्य
गम्यत्वाऽल्लेखालंकारोव्यापः परिव्राट्कामुकश्चनामेकस्यानेव योषिति कुलापः कामिनीभक्ष्यमिति निस्तोविकल्पनाः इत्यत्राप्युल्लेखते
इतिलक्षणस्यनातिव्याप्तिः अथापरऽल्लेखप्रकारः · एहीन्नभेदाभावेपिविषयाश्रयभेदतः एकस्यानेकधोल्लेखमप्युल्लेखंप्रच
क्षते · तत्रविषयभेदादनेकधोल्लेखः शुद्धः संकीर्णाश्च · शुद्धोयथा अकुशंकुचयोः कुशविलग्नेविपुलेचक्षुषिविस्तृतंनितंबे ·
अधरेऽरुणमाविरलक्षितेकरुणाशालिकपालिभागधेयं · गुरुर्वचसिष्टधरुस्त्रसिविशालोमनसिजनकस्तपसि · सुमित्रस्तेजसि
संमनोरहसिबुधः सदस्यर्जुनोपशमि · भीष्मोधनुषि · इत्यादौ श्लेषसंकीर्णाः · हंसमयीवगतिपुपरपुष्टमयीवालापेषुचक्रवाक

Nepal Sanskrit University, Balmeeki Campus, Kath...

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मपीवपरद्रेमणी-प्रावृतमपीवपयोधरोन्नतोकमलमयीकोशसंग्रहे वकुसुममयीवफलादाने चित्पादावुन्मेक्षासंकीर्णाः पयोधरोन्नता
वित्यादौविषयांशेभेतेषसंकीर्णाश्च युधिष्ठिरसमः सत्यवत्सीत्पादावुपमासंकीर्णाइत्याद्युन्नेयं ·अधिकरणाभेदेवानेकयोल्लेखोय
था·वर्द्धिल्लोरूपरिक्षणारविरम्बच्छत्रंवलिध्वंसिनोरत्नंमूर्द्धिललाटसीम्निनिलकंकर्णान्तिकेकुण्डलं·भंसेचक्रसुरः स्थलेमणीवरोना
भौसरोजासनोपस्थांघ्रोकटकस्त्रिविक्रमगतेःपाणाद्पायात्सवः· अत्ररूपकसंकीर्णाः ·भगवत्ललाटमध्यकर्णान्तादितत्तद्वयवा
भिमुखस्थितत्रहीतभेदनिमित्तोल्लेखसंकीर्णाश्च· एकस्यैवदृष्टुर्लवाटमध्येकर्णान्तिकेचरविदर्शनासंभवात्, यस्यवह्निमयोहृद
येषुजलमयोलोचनपुटेषुमारुतमयः स्वस्तिनेषुक्षमामयोगोष्ठाकाशमयः भूत्यनासुपंचमहाभूतमयोमूर्त्तइवाद्दश्यत निह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न प्रतिसामंतानः पुरेषु प्रतापः · अत्र वह्निजलादिशब्दरहितप्रतापवाष्पादिभिरर्थाः प्रतापकार्याणां प्रतापस्य वा भेदकथनहेतवः अलंकारः इति तत्संकरः सतो नरेरूपकसंकरः कस्तूरीतिलकं निभालफलके देव्या मुखांभोरुहे लोलं वंतितमालवालमुकुलोत्तंसं तिमौलिं प्रति · या कर्णोविक चोत्पलं तिकुचयोरंसे च कालागुरुस्थासं तिप्रथयंत्तालवशिवश्रीकराटकराटत्विषः · अत्रोपमासंकीर्णाः · केचिन्नूतनाधिकरणोक्तिप्रा कस्तूरीतिलकादिना दात्म्यसंभावनापोऽपमार्थविहितोपि क्रियावत्त्वेऽत्रेक्षायां पर्यवस्यतीति उपमोपक्रमोत्रेक्षयमित्याहुः · तन्म तेऽत्रेक्षासंकीर्णाः · एवमलंकारांतरसंकरोप्युन्नेयः इत्युल्लेखप्रकरणं अथापह्नुतिः प्रकृतस्य निषेधेन यदन्यत्वप्रकल्पनं साम्यादपह्नुतिर्वाक्यभेदाभेदवती द्विधा · अन्यप्रकल्पनमात्रं रूपके विषयनिषेधमात्रं नाहं हूतीवरननोरंगतापोनिभास्कर इत्या

102

राम: ५९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

क्षेपेऽभयमपि साम्यविशेषणारहितं नपंचविशिखः कामः किंचसंख्यशिलीमुखः इत्यनिशयोक्तौ चानित्याप्रमिति विशिष्टोपादानं न
चैवमपि नपमंमुखमेवेदमिति तत्वारव्यानोपमायांविषयेपमत्वनिषेधस्यमुखत्वप्रकल्पनस्यचसत्वादनित्याप्तिः प्रकल्पनपदस्यारोप
परत्वात् निषिद्धविषयंसाम्यादस्यारोपइतिनक्तात्प्रत्ययेनलक्षणानोक्तं वक्ष्यमाणोदाहरणेआरोपपूर्वकापह्नवेऽव्याप्तिप्रसंगात् स
तंचसाक्षात्निषेधकतन्नादिप्रयोगेपरपक्षत्वाद्युपन्यासेनिषेधस्यार्थाद्गम्यत्वेचवाक्यभेदेनप्रवर्त्तने विषयासत्यत्वप्रतिपादकस्वप्नानि
भकपटव्याजादिशब्दप्रयोगेविषयासत्यत्वपर्यवसायिरूपवपुर्नामभंगादिशब्दप्रयोगेचतद्भेदेन तत्रवाक्यभेदेऽपह्नवपूर्वक
आरोपः आरोपपूर्वकापह्नवश्चेतिद्वैविध्यं क्रमेणोदाहरणानि अत्राप्रागल्भ्यपरिणतरुचः शैलतनयेकतंकोनेवायंविलस

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

निशाशांकस्य वपुषि अनुष्ठेयं मन्ये विगलदमृतस्यंदशिशिरे रनिद्यांताशेनेरजनिरमणीगाढसुरसि यथावा नेदंनभोमंडलमंबुराशिर्नेमाश्व
तारानवफेनपुंजाः नायंशशीकुमुदिनीतः फणीशेनायंकलंकः शयितोहरारिः पूर्वत्रनिरवयवापहुतिः अत्रसावयवेतिभेदः अंकेपिशशंकि
रेजलनिधेः पंकंपरेमेनिरेसारंगकलितेचित्रसंनादिरेभ्रूछायमेच्छमरेइमेयद्यतितेत्रनीलशकलप्रसंदीदृशनेतन्मांसंनिशिपीत
मंथनमसंकुक्षिस्थमाचक्ष्महे इत्यत्रापिमपह्नवपूर्वकआरोपः अपह्नवस्तुपरपक्षोपन्यासादर्थसिद्धः विकसदमरनारीनेत्रनीला
ब्जघनान्धिवसतिसदायः संपन्नाधः कृतानि ननु रुचिरकलापेवर्त्तनेयोमयूरेविनरनुसकुमारोद्रुतवर्यभ्रियंवः अत्रारोपपू
र्वकोपह्नवः शब्दः मंथानभ्रमिधरमूलशिलासहस्रसंघट्टनव्रणकिणाः स्फुरतीनुमध्ये छायामृगः शेशकइत्यतिपामराणां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लोकेगतानुगतिकः प्रथितः प्रवादः अत्रारोपपूर्वकोपह्नवः सत्यामरवचनत्वोपन्यासार्थमिह एतानि वाक्यभेदेऽदाहरणानि एक
वाक्यतायां तु वनसत्रिक्रियदेनत्यश्यवैरं स्मरस्य प्रियविरहकृशे शशिकामिलोकेन तथाहि उपवनसहकारोद्भासिभृंगकुलेन प्रतिवि
शिखमनेनोद्दंकितं कालकूटं अमुष्मिन्नावरापात्तसरसिजनूनं मनदृशः स्मरः शर्वभुजंगः कथं जघनभारे निपतितः यदंगांगारांगा
प्रशमपिशुनानाभिकुहरे शिखाधूमस्येयं यदिरामनिरोमावलिवपुः पूर्वत्र नसभंगाशिसहकारारपपिजसकालकूटाः शराः
इत्यसंत्यत्वाभिधापिछलशब्दवशात्रनीयते उत्तरत्र नेयं रोमावलिः किंतु धूमशिखेति असत्यत्वपर्यवसायिवपुः शब्दवलात्रनी
यते केचित्तु सादृश्यव्यक्तये पह्नववदपह्नवायसादृश्यमप्यपह्नुत्यलंकारं वदंति यथाहुः सादृश्यव्यक्तये पञ्चापह्नवो सावपह्नु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

तिः अपह्नवायसादृश्यपदार्थस्तेसाप्यपह्नुतिरिति उदाहरंतिच आह्लाद्यादावसंदेहमनकवपंवक्रमासम्पवक्रेकराढेलग्नः सुकराठः प्रस
रतिकुचयोर्दन्नगाढांगांगः वक्षाशक्तिर्नितंवेपमानिचरणायोर्यः सनाहकप्रियोमेवालेलज्जानिरस्तानहिनहिशरलेचोलकः किंत्रपाकृत
अत्रविवक्षितंप्रियमपह्नुत्यचोलकत्वारोपः तदर्थंचप्रियस्यचोलसदृशधर्मोपन्यासः अत्रेदमपह्नुतिकथनंव्याजोक्त्यलंकारंपृथगनं
गीकुर्वंतामुद्भटादीनांमतमनुसृत्यसेतुबंधित्रवस्तुनिगूहनंव्याजोक्तिरितिव्याजोक्त्यलंकारंपृथगिच्छंतिः तेषामिहापिव्याजोक्ति
रेवनापह्नुतिरितिरुद्रटादयः दर्शितः अपह्नुतेः साधर्म्यमूलत्वनियमनाहत्यकिंचिदपह्नुत्यकस्यचिद्यदर्शनमात्रंमपह्नुतिरि
तिलक्षणंचोदाहृतः अपह्नुतिरपह्नुत्यकिंचिदन्यार्थसूचनं जपंचेषुःस्मरस्यसरसंपत्रिणामिति चंदनंचंद्रिकामंदोगंधवाह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रुदक्षिणाः स्वयमपि मरीस्तृष्टिः शीतादिलपरान्त्रति अमृतस्पंदिकिरणाश्चन्द्रमानमनोमतः अन्यस्वायमर्कान्मा विषानिष्पंदिदीधि
तिः साधर्म्यमूलात्वपह्नुतिरूपसापह्नुतिरितिनेनयह्ना तद्गलेखेकौतूहलतरलतचीविरचिते विषायेकाचक्रंरवयतिसुपर्णा
सुतमपि अथत्विद्यत्पाणिस्त्वरितमपमज्येतदपराकरेपोष्यंचापंमकरसुपरिष्टाच्चलिखति इत्यादावपह्नुतिध्वनिरुदाहर्तव्यः
अत्रहिचक्रसुपर्णालेखनेननायंसाधारणाःपुरुषः किंतुपुण्डरीक्षइतिकयाचिद्व्यंजितं अन्यथाहृतस्याप्येतादृशरूपंनसं
वतीत्याशयेननायंपुण्डरीकाक्षोपिकिंतुमन्मथइतितदभयमयमन्यपुष्पसायकमकरध्वजलेखनेनव्यंजितं इतिचित्रमी
मांसायामपह्नुतिप्रकरणम् अथोत्प्रेक्षालंकारः यत्रान्यधर्मसंबंधादन्यत्वेनोपनर्कितं प्रकृतंहिभवेत्साक्षात्तत्रोत्प्रेक्षाप्रच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

क्षते यथा वालेन्दुवक्त्राणां विकाशभावाद्भ्रमः पलाशाद्यनिलोहितानि सद्योवसंतेन समागतानां नवक्षतानीव वनस्थलीनां अत्रप्रकृतानि पलाशमु
कुलानि अप्रकृतनवक्षतधर्मवक्त्रलोहित्यसंबंधान्नवक्षतत्वेनोपतर्कितानि तर्कः संभावनामात्रं न त्ववधारणं तदीयधर्मोहितत्वादात्म्यसंभा
वनामात्रहेतुः तथाप्रिपक्षधर्मतावल्लिंगवदवधारणाहेतुः नचात्र इवशब्दस्य शाब्दरूपपरत्वमिति उपमाशंकाकार्या उपमायाय त्रक्वचित्थि
तैरपि नवक्षतैः सहवक्त्रांशमपतयावसंतनायकसमागतवनस्थलीसंबंधित्वविशेषताकल्पनानपेक्षत्वात् पलाशमुकुलानां नवक्षतता
दात्म्यसंभावनायामेवतथाविशेषतास्योपयुक्तत्वादेवमन्यत्रापियत्राप्रकृततादात्म्यसंभावनोपयुक्तविशेषताकल्पनात्रत्रसर्वत्रसर्व
त्राप्युत्प्रेक्षावगंतव्या यथा उवाहयातनुलताभंगतीरोमवल्लरी पश्चाद्विसृक्कादेमन्यद्विंबितामिववेणिकां उपमायत्रक्वचित्थितया

105

राम:
६२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पिवैशिकणावक्रंशकेपेतिनत्रानुपयुक्ता वेमत्यासुरोभागश्रतिविविनत्वरूपविशेषणाकल्पनाशत्यसंभावनार्था यत्रसंभावनोपयुक्त
विशेषणाकल्पनारहितमुपमानंनिबध्यते तत्रपरमिवशब्दःसादृश्यपरश्चोपमालंकारः अत्रमेवविभागमभिधेत्यचक्रवर्तिनोक्तं यदाय
मुपमानांशोलोकतःसिद्धिमच्छतीत्यादि दर्शितापीवशब्दस्योत्प्रेक्षाव्यंजकत्वमुक्तम् मन्येशंकेध्रुवंधायोद्धनमित्येवमादिभिःउत्प्रे
क्षाव्यंजकैरिवशब्दोपिनादृश्यतेति अत्रादिशब्देनतर्कयामिसंभावयामिजानेऽन्यत्रक्षेस्यादित्येवमादीनांसंग्रहः अत्रचक्रवर्ति
कामृगाणामंडाकंधराणामखिलमादाय यदिपुनरहंविधिःस्यांखलजिह्वायांनिवेशयिष्यामि यद्यजस्रोभवेद्धरिर्यद्यशीतंभवे
ज्जलं मन्येदृढव्रतोरामस्तदास्याल्पसत्यवाक् इत्यादिश्रुतिव्याप्तिवारणायधर्मसंबंधादिसूक्तं तेषुहियद्यर्थोक्तौचकल्पनमित्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निश्चयोऽलंकारविषयेषु संभावनं यदीत्थं स्यादित्यूहोऽन्यस्मिन्विषये इति संभावनालंकारविषयेषु वानिर्निमित्तमेव तथा तथोपतर्कणं तथापि
सर्वातिशायिसौन्दर्यशंके सत्यवतोऽत्वं येन सामग्रीशावाक्षीगायत्रीतरतीक्ष्णेत्यादिष्वतिव्याप्तिः स्यादिति तद्वारणाय अधर्मसंबंधादिसूक्तं
तत्र गायत्रीहृदयतरतीभावकारकत्वादिस्यादिनास्वधर्मेणैव वितर्कणमिति नातिव्याप्तिः विरक्तसंध्यापरुषं पुरस्तात् यथा रजः पार्थिवमुज्झिही
ते शंके हृत्तकथितप्रवृत्तिः प्रसूनतोमांभरतः ससैन्यः इत्यत्रातिव्याप्तिवारणाय सत्त्वेनेति विशेषणं तत्र ससैन्यस्य प्रसूनस्यान्यत्रापि
दृष्टस्य भरतेरजोभरोऽमनस्य संबंधेन निमित्तेन भरतप्रसूनत्वेन वस्तुसद्भूपेणैवोपतर्कितः नत्वन्यत्वेनेति नातिव्याप्तिः नरसिंह
महीपालविमस्तांमकरध्वजसंमार्गणास्तवसंजाताः कथं सुमनसोऽन्यथा इत्यत्रातिव्याप्तिवारणायोपतर्कितमिति सूक्तं तत्रानुमानालंका

106

सम:
६३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रविषयेसुमनोमार्गणात्वेनसम्मथत्वमवधृतंनसंभावनामात्रपरं इंदुर्लिप्तइवांजनेनजडिताहृष्टिर्मृगीणामिवपद्मा
नाहसिमेवविडुमलताशणमेवहेमप्रभा कार्कर्ष्यंकलयाचकोकिलवधूकंठेष्विवप्रस्फुरतंशीतायाःपुरतश्चहेतहरिणांवर्हाःसगर्हाइवेत्यत्रा
निष्पाप्रिवारणायप्रकृतमिश्रकं तत्रतिरतिशयसौंदर्यशीतावदनादिसन्निधानेनतद्वदनाद्युपमानस्यधिनिकर्षायादकेनयशस्योपमानेधि
क्षादिप्रकृतेध्वंजनलेपादिनिकर्षसंभावनाक्रियतइतिनानिष्पाप्रिः नन्वेवमपिअस्मद्विक्रमचेष्टितानिनिखिलत्रैलोक्यहेलाजयप्र
ह्वीभूतसुरासुराणीभवतोभ्रमेःसुताभ्रणवनीयत्यौद्वेषकषायितेनमनसात्रिथामयिष्यास्यतिस्त्रीणांप्रेमयद्भुतरोत्तरगुणाग्रामस्य
हाचंचलं इत्यत्रचांचल्यसहचरितत्वेनान्यत्रदृष्टस्यस्त्रीत्वस्यसंबंधेननिमित्तेनवस्तुतःपत्येकस्थिरचित्तादेवीसीताचंचलत्वेनोपतर्किता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नन्वत्रोत्प्रेक्षालंकारः रावणाङ्गनानक्षिप्तसंघटनानुकूलविचारमात्रस्य निबन्धत्वेन विच्छित्तिविशेषाभावात् नन्वाम्रधर्मसंबंधादिन्यधर्मठपमा
यामिव सहृदयहृदयाह्लादविवक्षितः ननु साधारणधर्ममात्रं तथा चनोक्तव्याप्तिः स्त्रीत्वादेश्चाचेत्यादिसंभावनामात्रप्रयोजकत्वेपि
सहृदयहृदयाह्लादिसाधारणधर्माभावेनोपमालंकारप्रयोजकत्वाभावादिति वाच्यं तथापि स्तनाभिरामस्तवकानूनसीतेति वल्ल
रीसंभावयन्नरघुपतिर्धावति स्म दिक्षु पेत्यत्रातिव्याप्तेरवारणात् नचाहार्यत्वं तर्के विशेषणं इत्वनाहार्यासंभावनेति वाच्यं तथासति
शंकेहन्मत्कथितप्रवृत्तिरिति संभावनायाअप्यनाहार्यत्वेन घ्यावृत्यर्थस्यान्यत्वेनेत्यस्यवैयर्थ्यप्रसंगादिति चेत् मैवं भन्यत्वेनेत्यस्यान्य
त्वेनावगतपरतयातस्यैवाहार्यत्वविशेषणपर्यवसायित्वात् ननु तथापि नैतल्लक्षणमव्याप्तेः तथाहि यत्रस्वमात्रधर्मादन्यमात्रध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मीद्वाकिंचिद्दुन्नेक्षमनेतत्रान्यधर्मसंवंधादितिलक्षणाशाभावादव्याप्तिः यथा अंगुलीभिरिवकेशसंचयं संत्रिपतन्तिमिरंमरीचिभिः कुड्मलीकृतसरोजलोचनंचुम्बतीवरजनीमुखंशशी भूपतेरगणिपदमूनितमस्विनीषुन्योन्त्रीषुचप्रविरलानिनतःप्रतीमः संध्यानलेनभशमंवरमूषिकायामावर्तितैरुडुभिरेवकृतोयमिन्दुः इत्यत्रस्वाद्योदाहरणेअंगुलीसदृशिभिर्मरीचिभिः केशसंचयसदृशस्यतिमिरस्यग्रहणात्वमात्रधर्मादेवशशिनभ्रुवनमुन्नेक्षितं द्वितीयेतारविरलत्वाविरलत्वरूपेणात्यमात्रधर्मेणाचन्द्रस्यसंध्यानलमध्यगांवरमूषिकाववर्तितताराणिकरनिर्मितत्वमुन्नेक्षितं किंचहेतुफलधर्मस्वरूपोन्नेक्षास्वन्यत्वेनेतिलक्षणाशाभावात् यथा सेषास्थतीयत्रविचिचतानांश्रेष्ठमयाभूपुरमेकमूर्ध्वा अदृश्यतत्वच्चरणारविन्दविश्लेषदुःखादिवबद्धमौनमितिहेतुन्नेक्षोदाहरणेनूपुरगतेनदुःखिसाधा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रणोनमोनिवेननिमित्तेननन्नपुरेनतद्देनुभूतनदुः खमेवधर्मनयोत्रेक्ष्यतेननदुः खिनादात्म्यं दुः खशब्दस्योपरिमनुगाघभ्रवणात् स्वंवोलस्यपद्मि
निपलायितस्यभालतवंकंगरकिनोवनांगाः अद्यापिकिंवानुभविष्यतीतिआपाटपन्नदृष्टमिवाक्षराणि इतिफलोत्रेक्षोदाहरणोदुमग
नेनललाटाक्षरदर्शनवृत्तपुरुषसाधारणोनललाटपाटनेननिमित्तेनदुःखाणांतत्फलंललाटाक्षरदर्शनमुद्देश्यमिनिधर्मनयोत्रे
क्ष्यते ननुललाटाक्षरदर्शनवृत्तधर्मितादात्म्यं दृष्टमित्यस्यधर्मिपर्यन्तताभावात् तथा पिनष्टीवनरंगाग्रैः समुद्रः फेनचन्दनं तरा
यकरैरिस्फुलिंगनीवदिगंगना इतिधर्मस्वरूपोत्रेक्षोदाहरणोसमुद्रस्यचंदनघर्षणाद्विलाद्रांतस्यानीयेनटेहलस्यानीयतरंगा
ग्रैः फेनचंदनपेषकत्वेनद्राक्षाकस्यकरैर्दिगंगनादिधवलीकरणोनचप्रतीयमानेननिमित्तेनतत्कर्तृकपेषणालेपनमात्रमुत्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षपतेनतुतयोः पेषणालेपनकर्तृतादात्म्यं पिनष्टिलिंपतीत्याख्यातयोः कर्तृवाचकत्वेपिभावप्रधानमाख्यातमितिन्यायेनकर्तृप्रधा
नभूतक्रियोपसर्जनस्यात्मत्राचयासंभवात् अतस्वलिंपतीवतमोंगानिवर्षतीवांजनंनभइत्युत्प्रेक्षामुदाहृतवतादण्डिनोदाह
रणयोरिवशब्दाश्रयणाल्लेपनवर्षणाकर्तृभ्यांतमोनभसोरुपमानाशंक्य कर्तायद्युपमानंस्यान्नभूतोक्तौक्रियापदे स्वक्रियासा
धनव्यापारमपेक्षितमितिरूपितम् इत्रानुष्टवेंचनवानिदीर्घैर्जंघैश्चभेस्वष्टवतरुदीये शेषांगनिर्माणविधौविधातुर्ला
वण्यपत्याद्यवासपत्नः इत्यत्रनिरतिशयलावण्यशालिजंघास्वष्टृनुमितेननिरतिशयलावण्यकोशाश्रयेननिमित्तेनविधातुः शेषां
गनिर्माणोपयुक्तलावण्योत्पादनेयत्नमात्रमुत्प्रेक्षतेनतुतथाभूतपत्नवत्तादात्म्यमितिस्पष्टमेव अपिचाप्रकृतधर्मिकोत्प्रेक्षायांप्रकृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नमित्यंशाभावादव्याप्तिः. यथा घनसारमिवेन्दुमंडलं दमयंतीवदनापदेशसांकृतमध्यविलं विलोक्यते घृतगौरत्वनीरत्वनीलिम. अत्रकृतमध्यविल
मितिपदार्थहेतुककाव्यलिंगापेक्षयातिशयोक्त्या घृतमध्यरंध्राकाशेनैल्यत्वेनाध्यवसितोयः कलंकस्तद्वत्वेन निमित्तेन कलंकाध्यवसितघृ
तमध्यरंध्राकाशनैल्यत्वनिमित्तोत्प्रेक्षितकृतमध्यविलत्वेन निमित्तेन वाचन्द्रमंडलं दमयंतीवदननिर्माणाय घृतसारत्वेनोत्प्रेक्षितं.
ननु प्रकृतं दमयंतीवदनमेवोक्तप्रकाराघृतेन्दुसाराशनिर्मितत्वेनोत्प्रेक्षितं यद्वालेन्दुकलोच्चयाद्युपचितैः सारैरिवोत्पादितं तत्पश्ये
यमनंगमंगतदृहस्येपितस्यास्त्रं इत्यत्रेवतथाशब्दाचयाभावात् ननु यथाशब्दतोन्वयालाभेपिप्रासंगाशतंभोस्यतामित्यत्र
प्रधानसमितंघ्रऽपर्जनेक्रियान्वयपर्यवसानं. संख्यायाभोजनान्वयायोगपत्वात् तथेहापिप्रधानमिन्दुमण्डलमनिलंघ्योपसर्जनेदम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यंतीवदनेइंदुमतांनाहृतसारांशनिर्मितत्वोत्प्रेक्षापर्यवसानंस्यात् अप्रकृतस्यावर्णनीयत्वादितिचेन्न अप्रकृतवर्णनस्याप्यप्रकृतप्रशंसा
रूपेणाप्रकृतातिशयाधानार्थतयाऽन्वेतुंयोग्यत्वात् नचवाच्यमिंदुस्निग्धइवेत्यप्रकृतप्रशंसोदाहरणान्तरेवात्रापिसंभावनामात्रमेवनो
त्प्रेक्षेति तत्रसहृदयहृदयाह्लादिनिमित्ताभावेनोत्प्रेक्षासामग्रीपरिपूर्णभावादुत्प्रेक्षायाअसंभवेप्यत्रतत्संभवादप्रकृतप्रशंसयासं
कीर्णोपपत्तेः तस्मादव्याप्तत्वात्रेदंलक्षणंयुक्तमितिचेत् तत्रब्रूमः नतावदृतसारमित्यादावव्याप्तिः प्रकृतशब्दस्यविषयत्वाभिमत
मात्रपरत्वात् नचैवमिंदुस्निग्धइवेत्यादावतिव्याप्तिः तत्रसीतावदनसंनिधानेवक्तृतोन्यधर्मत्वेसत्यपिइंदुगतांजनलिप्तत्वसंभाव
नापाप्तन्यधर्मत्वस्याप्रयोजकत्वात् धर्मस्यसहृदयहृदयाह्लादिनोविवक्षितत्वाच्च अन्यत्वेनेत्यस्यान्येनप्रकारेणोत्पर्थइतिनहेतु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

फलधर्मस्वरूपोऽपेक्षात्वव्याप्तिः यत्रधर्मिणि धर्म्यन्तरतादात्म्येनोपेक्ष्यते तत्र धर्म्यन्तरमन्यः प्रकारः यत्र तु कश्चिद्धर्मस्तत्किंचिन्नातिहेतुतया
फलतया स्वरूपेणापोपेक्ष्यते तत्र तस्य स्वधर्मोऽन्यः प्रकार इति सर्वत्राप्यवगतेः यद्वा हेतुफलधर्मस्वरूपोपेक्षोदाहरणोक्तपितादात्मे-
नैवोपेक्षा तथाहि सेवाप्यलीयत्र विचिन्त्यतात्वं चोलस्य पद्मीतपलापितस्येत्यादिहेतुफलोपेक्षोदाहरणायोक्तावद्विष्टेषु दुःख
लतापक्षरदर्शनादिधर्मो हेतुतया फलतया वा नोपेक्ष्यते किंतु तत्पुरुषादिधर्मिकं यत्रिश्चलत्वकाष्ठकसंश्लेषादिनिमित्तकमौ
नव्यापारोदिकं तदेव दुःखहेतुकमौनतलापक्षरदर्शनार्थं व्यापारोदितादात्म्येनोपेक्ष्यते अवश्यं च द्विविधस्यापि मौनादे
स्तादात्म्येनाध्यवसायश्चास्त्येव अन्यथा निश्चलत्वादिहेतुकस्वाभाविकमौनादौ दुःखादेर्हेतुत्वादिनोपेक्षणासमंजसं स्यात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अंगीकृतं चसैषास्थतीत्यादौ उः खादिर्धर्मस्य मौनादिहेतुतया नूपुरादिगतत्वेनोत्प्रेक्ष्यत इति वदन्नाप्यलंकारसर्वस्वकृताद्विविधस्य
मौनादेरभेदाध्यवसानं हेतूत्प्रेक्षायां यस्य प्रकृतसंबंधिनो धर्मस्य हेतुरुत्प्रेक्ष्यते स धर्मो ध्यवसायवशादभिन्न उत्प्रेक्षानिमित्तत्वेनाभिप्रेय
तइत्यादिनद्वचनादावश्यकं चान्यत्रापि क्वचित् क्वचिद्धेतूत्प्रेक्षोदाहरणे निमित्तांशो नादात्म्याध्यवसायाश्रयणं यथा उन्मेषं यो
ममनसहृतेजातिवैरीनिशायामिंदोरिन्दीवरदलदृशातस्य सौन्दर्यदर्पः नीतः शांतिं सभमनयावक्त्रकान्त्यैतिहर्षोलग्नामस्येतति
तनुतेपादयोः पद्मलक्ष्मीः अत्र हेतुतया हर्षोत्प्रेक्षांप्रतितन्मुखत्वाभिमतपादयोः पद्मलक्ष्म्यालगनं निमित्तं वाच्यं तत्र सर्वथैवाभि
न्नं अतस्तत्र पादयोर्यः स्वाभाविकः शोभासंबंधः स एव पद्मलक्ष्मीलगनत्वेनाध्यवसितो निमित्तमिति समर्थनीयं एवं निमित्तांशो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नादात्याप्यवसानावश्यंभावेनत्रैवोत्प्रेक्षाविश्रांतिरस्तु· नचनत्रनिमित्तान्तरमपेक्ष्यंस्यादितिवाच्यं· निर्मूलत्वहेतुकमौनस्य दुःखहेतुकमौनत्वे
नोत्प्रेक्षायांचरणारविन्दविभ्रेषकालभवत्वंनिमित्तं· कण्टकसंभ्रेषहेतुकव्यापारनस्पलताटलिपिदर्शनार्थव्यापारत्वेनोत्प्रेक्षायां
महाराजोप्येवंकष्टमनुभवति· इतःपरमपिकिंपदनुभाव्यमनेनेतिजिज्ञासोत्थापकपलायनकालभवत्वंनिमित्तंमित्यादेःस्पष्टत्वा
त· अपनेवपक्षोदशिनोभिमतः· यदाह· अन्यथैवेप्सितावृत्तिश्चेतनस्येतरस्यवा· अन्यथोत्प्रेक्षणेयत्रतामुत्प्रेक्षांप्रचक्षते· मध्यंदि
नार्कसंतप्तःसरसीयाहनेगजः· मन्येमार्त्तण्डसंतप्तानिपद्मान्युद्धर्तुमुद्यतः· स्नातुंपातुंविसाग्रंकरिणोजलगाहनं· तद्वैरनिष्क्र
णापेयेतिकविनोत्प्रेक्षवर्णितेइति· अत्रसंतापनिवृत्त्यर्थत्वेनान्यथैवेप्सिताकरिणश्चेतनस्यजलावगाहनरूपावृत्तिरन्यथात

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वैरनिष्क्रमणार्थजलावगाहनत्वेनोत्प्रेक्ष्यतइति स्वकृतलक्षणानुसारेणोपयोजितं काव्यप्रकाशिकारकारस्याप्ययमेवपक्षोभिमतस्तेनहि
संभावनमथोत्प्रेक्षाप्रकृतस्य समेनयदिसुपमानेनोपमेयस्य तादात्म्यसंभावनमुत्प्रेक्षालक्षणमभिधायस्मेषयोममनसहतइति
तत्रोदाहरणांकृतम्. ततश्चस्वकृतलक्षणानुरोधेनस्वाभाविकीपादशोभैवस्ववैरिजयप्रभवहर्षलग्नपद्मलक्ष्मीत्वेनोत्प्रेक्ष्यतइत्य
भिमतमिति स्फुटमेव. तथापिनष्टीवतरंगाप्रेरितत्वादिधर्मस्वरूपोत्प्रेक्षोदाहरणोक्तापिप्रेरणादिरेवपद्मादिरूपत्वेनोत्प्रे-
क्ष्यते. नचप्रेरणादेर्विषयस्यानुपादानंदोषः. अतिशयोक्तावितदुपपत्तेः. उत्प्रेक्षायामध्यवसायगर्भतयातत्रविषयनिगरणस्यो
चितत्वात्. नचप्रेरणादेर्विषयत्वेननिमित्तत्वाभावेनिमित्तांतरमन्वेष्यंस्यादिति वाच्यं. प्रेरणास्यपेषणारूपतयोत्प्रेक्षायांप्रांतगत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पेनवन्दनपुंनीभवनंनिमित्ते·करयापनस्वदिगंगनालेपनत्वेनोत्प्रेक्षापनद्रवतीकरणंनिमित्तमिनिनिमित्तान्तरस्यनागरूकत्वात्· तिप
तीवनतोऽङ्गानिवर्षतीराज्जनन्तभइत्यादोव्यापनादिनेपनादिरूपनयासंभाविनमितिवदनाकाव्यप्रकाशिकाकारेणापिधर्मस्वरू
पोत्प्रेक्षोदाहरणोक्तादात्मोत्प्रेक्षणापक्षएवाश्रितः· एवंहुंवतीवरजनीमुखशशीत्यादावपिरजन्यावदनत्वेनाध्यवसितं·पदारं
भाग्यमुखंनस्वशशिनभ्वसंबंधभुंवनत्वेनोत्प्रेक्षते· इत्यतपूर्वंवेत्यत्रापन्नपूर्वकेशोभांगनिर्माणोपन्नपूर्वकत्वनादात्म्योत्प्रेक्षेत्या
दूसं· अन्यधर्मानुगामितयैवनविवक्षितः· किंतुउपमाणसाधारणधर्मइवविम्बप्रतिविम्बभावादिभिः सर्वैरपिप्रकारैर्विव
क्षितः· तथात्रयथा· आवर्जिताकिंचिदिवस्तनाभ्यांवासोवसानातरुणार्करागं· सुजातपुष्पस्तवकावनम्रासंचारिणीपल्ल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वितालतेवेत्यत्रविम्बप्रतिबिम्बभावकृताभेदाध्यवसायेनतारूपकुंजारूढांविलासकमलाकुलाम्· मूर्त्तामिवमनोनस्यत्रैलोक्यवि
जयश्रियमित्यत्रसमासभेदाश्रयणाकृताभेदाध्यवसायेनवधर्मस्यप्रकृतसाधारणधर्मसंबंधः· तथाअंगुलीभिरिवेत्यत्रा
नपभेदकृताभेदाध्यवसायेनधर्मस्यप्रकृताप्रकृतसाधारणधर्मसंबंधः सुसंपादइतिनतत्राव्याप्तिः· नापिभूरपस्त
रागीत्यत्राव्याप्तिः· तत्रोपात्तधर्मातिरिक्तधर्मांतरसंबंधस्यनिमित्तत्वात्· तत्रहिचंद्ररूपविषयगतसंध्यानलमध्यगाच
रमूर्धिकावर्तितताराकिरनिर्मितत्वोत्प्रेक्षायांतारागतेनतत्रशत्रिषुविरलत्वाविरलत्वरूपेणोपात्तधर्मेणानिमित्तेन
धर्मस्यचक्रगतस्यतद्विरलत्वाविरलत्वाभ्यविधायिहृद्विकासशालित्वस्याक्षेपः· अयंचात्रापरोतिशेषः· अन्यधर्मसंबंधादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यपदार्थो धर्मस्तत्रेक्षासु विषयेव धर्मो त्रेक्षासु तद्विषयिणो धर्मस्याश्रयः एवं स्थिते यत्र तद्व्यतिरिक्तनिमित्तधर्मस्तत्र सर्वत्रापि यो धर्मो न्यपदार्थस्य वि
षयस्य संबंधितया संभावनापदवीमारोहति तत्र तथाभूतो न्वेष्यः तत्र वर्षणीयांजनं नभ इत्यत्र नभोगतत्वेन वर्षणक्रियोत्रेक्षेति मक्षेन नभसो
भूपर्यंतगाढतरीलिमप्राप्तत्वमंजनवर्णकसाधारणनिमित्तं नभसो व्यापनेन नभः कर्तृकांजनवर्षणक्रिया तोत्रेक्षेति पक्षेतु सकलवल्लभा
मुखमलिनीकरणादि एवं वेलेवरागसागरस्येत्यादौ संक्षोभकारित्वादिगम्यं निमित्तं मृगनीयं यत्र तु निमित्तं तथा धर्मस्योपादानेन स
न्यपितसंबंधो विषयस्यान्यपदार्थस्य वांजसा नयनीयतेन तत्र कुत्रचित् निमित्तं भूतधर्मादन्यस्य कस्यचिद्धर्मस्य तत्रा रूप्यसंपादनेन तत्सं
बंधः समर्थनीयः कुत्रचिद्विषयस्य चान्यपदार्थस्य यत्र धर्मा श्रयत्वा रूप्यसंपादनेन कुत्रचित् मिलितेन तेनोभयेन कुत्रचिदुपात्तधर्मकु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नधर्मोनराक्षेपेणानंत्रधर्मोनरस्यनिमित्तनाकूप्यसंपादनंनुपमायांधर्मस्यसाधारणसंपादनमिवबिंबप्रतिबिंबभावादिभिः प्रकारैस्तेनप्र
दर्शिताः एवंविषयस्यास्यपदार्थस्यबाधर्माश्रयताकूप्यसंपादनंश्लेषादिभंगपानत्रविषयस्यश्लेषेणाधर्माश्रयताकूप्यसंपादनंयथा
अस्यांमुनीनामपिमोहमुहेभगुर्महानयत्कुचशैलशीलीनानारदाहादिमुखंश्रितोहर्वासोमहाभारतसर्गोगः अत्रभग्वादिनिरू
पविषयतदमपंतीगोचरमोहोत्प्रेक्षायांपदेवतत्कुचपरिशीलनादिनिमित्तंनतद्विषयगतं किंतुतदादिगतं तस्यभग्वादिशब्द
श्लेषेणविषयगतनाविर्वाहः अपह्नुत्यथा किंशकव्यपदेशेनतरुमारुह्यसर्वतः दग्धादग्धामरणानीयइपतीवविभावसुः
अत्रदावानरूपविषयगतदग्धादग्धवनप्रदेशदर्शनक्रियोत्प्रेक्षायांतरुसमारोहणंनिमित्तं तदपिनविषयगतं किंतुकिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रुकपुष्पानं तत्रापि यद्यपि सुखं सनारोहणानाति तथापि नदीपतहसमाश्रयणमेवनदारोहणत्वेनाध्यवसितं ततश्च तत्रापहुत्याविषयस्य
किंशुकपुष्पताद्रूप्यसंपादनेनधर्मसंबंधनिर्वाहः अन्यपदार्थस्यश्लेषेणाधर्माश्रयताद्रूप्यसंपादनंपथा अस्यादौ हृदशालिन्यामुखमापांगा
रप्रसन्नसत्यंराजेभिन्नेयथ यद्भवंभोजुमिच्छति अत्रमुखस्यचद्रत्वोत्प्रेक्षायांभवंभोजुमभिलाषेनिमित्तं नद्विषयगतमपिनान्यपदार्थ
भूतंचद्रगतं अतस्तत्रराजशब्दश्लेषेणचंद्रस्यधर्माश्रयताद्रूप्यसंपादनेनधर्मस्यतदीयतानिवहिः धर्मान्तरस्यनिमित्तधर्मता
द्रूप्यसंपादनंविषयस्यतद्धर्माश्रयताद्रूप्यसंपादनंचेत्युभयमेलनंयथा आकृष्टिवेगविगलद्भुजगेन्द्रभोगनिर्मोकपट्टपरिवेष्टनया
पुराशोः मंथयथाबुपशमार्थमिवाश्रयस्यमंदाकिनीचिरमवेष्टतपादमूलं अत्रमंदाकिनीरूपविषयगतपयोधिमंथयथाबुप

114

राम:
७१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शमरूपफलोत्प्रेक्षायांयत्रिमित्तंचरणामूलवेष्टनंतत्रादात्म्यसंपादनप्रत्यंतपर्वतवेष्टनस्यभ्रेषेणाविषयस्यतत्राद्रूप्यसंदनमपह्नुत्या
वेतिमिलितेनोभयेनविषयस्यान्यधर्मसंबंधनिर्वाहः उपात्तधर्मेणाधर्मान्तराक्षेपदर्शितएव.तस्मादन्यधर्मसंबंधादपिसर्वोत्प्रेक्षाउ
गतमितिनक्षाप्यव्याप्तमितिसर्वेसमंजसं अलंकारसर्वस्वकृतेत्थमस्याविभागःप्रदर्शितः. वाच्याप्रतीयमानाचेतिताद्वउत्प्रेक्षा
द्विविधा इवादिशब्दप्रयोगेवाच्या तदप्रयोगेप्रतीयमाना. तत्रवाच्यानांगुणक्रियाद्रव्याणामप्रकृतानामध्यवसेयत्वेनचत
र्विधा. तेषांचप्रत्येकंभावाभावाभिमानिरूपतयाद्वैविध्येनाष्टविधा. तेषुनिमित्तस्यगुणक्रियारूपत्वेनषोडशभेदाः निमित्त
स्यपुनरुपादानानुपादानाभ्यांद्वात्रिंशत्प्रकाराः तेषुपुनः प्रत्येकंस्वरूपहेतुफलोत्प्रेक्षारूपत्वेनषट्षष्टिर्भेदाः तत्रद्रव्यस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वरूपोत्प्रेक्षणामेवेति हेतुफलोत्प्रेक्षाणतोनिपातनीयाः ततः षोडशभेदास्तूनाः जात्यादीनामपि हेतुफलोत्प्रेक्षयोर्निमित्तत्वानुपादानं संभ
वति ततश्च त्रिंशति भेदास्तूनाः तथा च स्वरूपोत्प्रेक्षाऽवैकल्पेन द्वात्रिंशद्भेदाः हेतुफलोत्प्रेक्षेत्यपेक्षया द्वादशभेदेऽपि षट्पंचाशद्भेदा
पोत्प्रेक्षा प्रतीयमानोत्प्रेक्षाणामप्येवमेव गणना तत्र स्वरूपोत्प्रेक्षायामपि निमित्तोपादानं संभवतीति भेदः ततश्च तत्र स्वरूपो
त्प्रेक्षा षोडशभेदा हेतुफलोत्प्रेक्षे पूर्ववद्द्वादशभेदे इति चत्वारिंशद्भेदा गम्योत्प्रेक्षा एवमेव मिलित्वा षण्णवतिभेदोत्प्रेक्षेति
विद्यानाथेन पुनर्द्रव्यस्य हेतुफलोत्प्रेक्षणामप्यंगीकृत्यानुपात्तनिमित्तेषु गम्यस्य निमित्तस्य गुणक्रियारूपनिमित्तत्वेन भेदगणनं
अज्ञातपुत्रनामकदयाकल्पनं चारूत्वावहमिति तन्मतान्यथा विभागो दर्शितः वाच्यायां स्वरूपोत्प्रेक्षा चतुर्विंशतिभेदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथवा न निमित्तायां गुणक्रियारूपभेदगणनाभावेन भेदाष्टकहानात् हेतुफलोन्मेक्षे प्रत्येकं षोडशविधे द्रव्योन्मेक्षागोचराणां भावाभावाभिमा
नेन गुणक्रियानिमित्तत्वेन चतुर्णां भेदानामधिकत्वात् एवं षट्पंचाशद्भेदवाच्योन्मेक्षा प्रतीयमानायां पुनः स्वरूपोन्मेक्षाप्यिषोडशप्रकारा तत्र
विभिन्नानुपादानासंभवेन तत्रिवंधनेभेदाष्टहानात् ततश्चाष्टचत्वारिंशद्भेदा प्रतीयमानोन्मेक्षा एवं मिलित्वा चतुरुत्तरशतभेदोन्मे
क्षेति अथोदाहरणानि दिङ्मात्रेणाग्रे प्रदर्श्यन्ते तद्यथा गुणानिमित्तजातिभानस्वरूपोन्मेक्षा यथा सवः पायादिन्दुर्नवविलसताको
टिकुटिलः स्मरारेर्योत्स्नर्ज्वलनकपिशोमातिनिहितः स्रवन्मन्दाकिन्याः प्रतिदिवसमिक्षेनपयसा कपालेनोन्मुक्तः स्फटिकधवले
नांकुरइव अत्राकुरशब्दस्य जातिशब्दत्वाज्जातिरुत्प्रेक्ष्यते उपात्तकौटिल्यगुणो निमित्तं एवमुपात्तक्रियानिमित्ताप्यिजातिभाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वरूपोत्प्रेक्षोदाहर्त्तव्या · उपात्तक्रियानिमित्तागुणात्स्वरूपोत्प्रेक्षा यथा · निवेशितनखावकयगदीसपेलग्नंतदीयाधरसीम्निसिक्यकं · राजतत्रै
वनितस्तनमुकुंमधूनिनिर्धूपमुखासधर्मिणी · अत्रोत्तुंगगतमुत्प्रेक्ष्यते · उपात्तालगनक्रियानिमित्तं · स्वमुपात्तगुणानिमित्तापिगुणाभा
वस्वरूपोत्प्रेक्षोदाहर्त्तव्या · उपात्तगुणानिमित्तक्रियाभावस्वरूपोत्प्रेक्षा यथा · अथसांध्यसांद्रकिरणारुणितेतरिहेतिहृतिमिथुनंपतनो ।
पथगत्यपातविरहार्त्तिदलद्धृदयस्तनासृगनुलिप्तमिव · अत्रहृदिरागुलेपनक्रियोत्प्रेक्ष्यते · उपात्तप्राप्तापगुणो निमित्तं स्वमु
पात्तक्रियानिमित्तापिक्रियाभावस्वरूपोत्प्रेक्षोदाहर्त्तव्या · उपात्तक्रियानिमित्तस्वभावस्वरूपोत्प्रेक्षा यथा · एकैकमुद्भूतगुणांशु
तद्रूपतांचहिचान्यमन्यमुपगम्यपरित्यजन्तीं · स्वंजगाहजगदर्चितपादपादपद्मापद्मामिवाशुतभजान्तरविच्युतांसा · अत्रपद्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यास्कतयाप्रव्यत्वाद्द्रव्यत्वमुपेक्ष्यते उपात्तमुपगम्यपरित्यक्तक्रियानिमित्तं स्वमुपात्तगुणानिमित्तद्रव्यभावस्वरूपोपेक्षोदाहर्त्तव्या स्वभावा
भिमानेषुजात्यादिषुउपात्तनिमित्ताअष्टौभेदाःसंपन्नाः अनुपात्तनिमित्तजातिभावस्वरूपोपेक्षायथा वर्षातपानावरणांचिरायकाष्टौघमा
लंव्यसमुत्थितेषु नैकेषुतारकवकेषिवेहविकम्बरीभूतमवैमिचंद्रं अत्रकवजातिरुपेक्ष्यते अनुपात्तोधावल्पवर्त्तलत्वादिर्गुणोनि
मित्तं अनुपात्तनिमित्तगुणस्वरूपोपेक्षायथा अयमाभातिराजेत्रैविजिताखिलशात्रवः अनुजीविषुसर्वेषुप्रसादइवमूर्त्तिमान्
अत्रप्रसादोगुणउपेक्ष्यते अनुपात्तोवहुप्रदत्वसुखनिषेसेव्यत्वादिर्निमित्तं अनुपात्तनिमित्तक्रियाभावोपेक्षायथा लिंपतीवतमोङ्गा
निवर्षतीवांजनंनभः असत्पुरुषसेवेवदृष्टिर्निष्फलतांगता अत्रक्रियोपेक्ष्यते अनुपात्तंव्यापनादिनिमित्तं अनुपात्तनिमित्तद्रव्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भावोत्प्रेक्षयथा देहस्यादर्पणोयस्यपश्यति प्रतिमामुखा अस्यार्द्धीभ्यामिवोत्पन्नमर्द्धनारीश्वरान्तरं अत्रार्द्धीभ्यामिवोत्पन्नार्द्धनारीश्वरान्तरद्रव्य
मुत्प्रेक्ष्यते प्रतिबिंबानंबिंबव्यतिलभागस्त्रीपुरुषाकारस्तालित्वमुपात्तनिमित्तं अर्द्धनारीश्वरोत्प्रेक्षायामपिवस्तुनोर्द्धनारीश्वरत्वैक
त्वाद्भावोत्प्रेक्षात्वमविरुद्धं यथावा विललासजलाशयोदरेकुचनघोरनुबिंबितेवया परिखाकपटस्फुटस्फुटरस्त्रितिबिंबानवलंबि
तांबुनि अत्रदेवपुरीद्रव्यमुत्प्रेक्ष्यते सौभाग्यातिशयः कुतिनपुरागतोनुपात्तोनिमित्तं एवंचतुर्विधानुपात्तनिमित्तोदाहृता।
अस्यानिमित्तस्यगुणक्रियारूपभेदमालोच्यअष्टविधत्वमूहनीयं एवंजात्याद्युत्प्रेक्षाभावाभिमानवत्यः षोडशसंपत्राः अथ
वाविद्यानाथोक्तप्रकारेणानुपात्तनिमित्तगुणक्रियाभेदेनचिंतनीयः अनुपात्तेनिमित्तेनद्यवस्थायाअसंभवात् यथा वितला

117

राम:
७४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सजलासजलाशयोदरेइत्यत्रनिरतिशयसौभाग्यवत्त्वगुणोनिमित्तमित्यपिवक्तुंशक्यं· निरतिशयसौभाग्यभागित्वंक्रियानिमित्तमित्यपि·
अतोद्वादशैवभेदाः· अथाभावाभिमानवत्यः स्वरूपोत्प्रेक्षाः· उपात्तगुणानिमित्तजातिगुणक्रियाणामभावोत्प्रेक्षायथा· अकुंकुमक्षाइ
मिवांगमेतदयावकारुणमिवाधरंते· अनंजनोल्लेखमिवाक्षियुग्मंस्वाभाविकैरेवगुणैरुदीक्षे· अत्रकुंकुमरजोयावकराणांजनो·
ल्लेखनरूपाणांजातिगुणक्रियाणामभावाउत्प्रेक्ष्यंते· उपात्ताः स्वाभाविकगोतरस्तानीलवर्णानिमित्तंएतासुक्रियानिमित्तमप्युप
हार्यं· उपात्तक्रियानिमित्तद्रव्याभावोत्प्रेक्षायथा· भुवित्वन्मुखमालोक्यपूर्णाचन्द्रमिवोदितं· अत्रचन्द्रमिवपश्यामिदिवंशोभाविवर्ज
नात्· अत्रचन्द्रस्यद्रव्यस्याभावउत्प्रेक्ष्यते· उपात्तावर्जनक्रियानिमित्तं· एवमुपात्तगुणनिमित्तापिद्रव्याभावोत्प्रेक्षोपहार्या· एतावे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वश्लोकौ · इदं विशालाक्षि विभावयामि पदद्वयं मन्मथसामिति चतुर्थपादयोः पाठेऽपि नानिमित्तजात्यायभावोत्प्रेक्षाणामुदाहरणे · एवमभावा
भिमानवत्योपि स्वरूपोत्प्रेक्षाः पूर्वोक्तरीत्या षोडशद्वादशचेति द्वात्रिंशच्चतुर्विंशतिर्वा स्वरूपोत्प्रेक्षाभेदादर्शितप्रायाः · एतासु विषयिणः
क्वचिन्नादात्म्येनाध्यवसायः · यथा · सदः पायादिंदुरित्यत्र · क्वचित्तु संसर्गितया · यथा · निवेशितं यावकरागदीप्तये इत्यत्रौत्सुक्यस्येत्ययमपि
भेदो ज्ञेयः · अथ हेतूत्प्रेक्षाऽपि नानिमित्तजातिहेतूत्प्रेक्षा यथा · तनुरेषा शादकदृशस्तनीयसी शनकैरवापत्रारकाणपाणुतां
उदरान्तरस्थितिमुपेयुषो हरेः करयांचजन्यकिरणैरिवोज्ज्वलैः · अत्र किरणजातिः पाणिस्तनप्रतिहेतुत्वेनोत्प्रेक्षते · सरूपपातिउमानि
मित्तं · स्वक्रियानिमित्तापि जातिहेतूत्प्रेक्षाऽहनीयाः · क्रियानिमित्तगुणहेतूत्प्रेक्षा यथा · वहन्तो वहुशो वलक्षतां धनरुग्णक्षमवुद्रते

११९

राम:
७५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

खगः सनलस्यकरंयथोपुनः सरसः कोकनदभ्रमादिव अत्रनलकरशक्तिक्रियांप्रतिकोकनदभ्रमोहेतुत्वेनोत्प्रेक्ष्यते सैवशक्तिक्रियानिमित्तं
उत्तरत्रापिहेतूत्प्रेक्षायांसर्वत्रफलमेवनिमित्तं एवंगुणानिमित्तापिगुणाहेतूत्प्रेक्षाद्रष्टव्या गुणानिमित्ता क्रियाहेतूत्प्रेक्षायथा विव
स्वतानापिषनेवमिश्राः स्वगोसहस्रेणासमंजनानां गावोपिनेत्रापरनामधेयास्तेनेदमांधंखलुनांधकारे अत्रांधगुणांप्रतिगवांनयन
क्रियाहेतुत्वेनोत्प्रेक्ष्यते एवंक्रियानिमित्तापिक्रियाहेतूत्प्रेक्षोदाहार्या क्रियानिमित्तद्रव्यहेतूत्प्रेक्षायथा हृदयंपरिपूतमेवनित्यं
दुषसस्यविशुद्धकर्मभाजः विपदापगयेवविश्वमूर्तेः प्रवहंत्यावसतोंतरंत्रिपथात् अत्रपवनक्रियांप्रतिगंगाद्रव्यंहेतुत्वेनोत्प्रे
क्ष्यते एवंगुणानिमित्तापिहेतूत्प्रेक्षोदाहार्या इत्थंभावाभिमानवत्योहेतूत्प्रेक्षाउदाहृताः अथाभावाभिमानवत्यः यत्रोरदेर्दिवावे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नोरभावादिवसप्रभुः भूमौप्रतापयन्नक्षीस्तृष्णान्तंततोथिते तस्मिन्नस्तंगतेभानौविधुस्तस्यपदेक्रियात् इत्यनारदतोनूनंनीलत्वंगुरुहाकरः
वीणावादनसंरंभाच्चकंपेदक्षिणाननः अदृष्टेवेतरंतस्यांकलवीभोगतिरोहितं अत्राद्यश्लोकेरविचन्द्रयोर्जातिद्रव्ययोरभावोहेतुत्वेनोत्प्रेक्ष्ये
ते द्वितीयतृतीयश्लोकयोस्तदरदर्शनयोर्गुणक्रियोरभावौ सृष्टिमीलनकंपक्रियाकलानिमित्तानि एवंगुणानिमित्ताअप्यभावहेतूत्प्रे
क्षाउदाहार्याः एवंषोडशभेदाहेतूत्प्रेक्षादर्शिताः अथफलोत्प्रेक्षाः सौधेषुयत्रमृगभासुमृगेक्षणानांज्योत्स्नापहासचतुरासुविश
त्वरीषु चन्द्रस्तदर्थमिवरात्रिषुवंभ्रमीतिदुर्वकरवसरणान्यधिजालवर्गं नवनिर्वर्णपयस्तरांसरोवर्णायतादृशी तत्कोशगेहा
न्निर्गम्यतीर्थेषुवासतिक्रुवं रथस्थितानांपरिवर्त्तनायपुरानतानामिववाहनानां इत्यत्रिभूमौतुरगोत्रमानादिशिप्रतस्थेर

राम:
७६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विरुन्नरस्यां· दुग्धार्णवसहस्रायकैलासाचलकोटये· नूनंप्रतापरुद्रेणायशोदिक्षुप्रसाप्तिं· एषुभ्रोकेषुक्रमेणामुखप्रभागोखर्णापरि
वर्त्तनउष्णार्णवकैलासहस्राणिजातिगणाक्रियाद्रव्याणिफलत्वेनोत्प्रेक्ष्यंते· भ्रमणातीर्थवासप्रस्थानप्रसारणाक्रियानिमित्तानि·
एवंगणानिमित्ताअप्सरसहार्याः· अभावाभिमानवन्त्यःफलोत्प्रेक्षायथा· खदाननेनसादृश्यंप्राप्तुकामोनिशाकरः· कलंकपंका·
भावायनूनंमज्जतिसागरे· अरराणवासाज्जितवांधवासुमृगीद्यवैरार्थमिवाशरराणः· कालिंगदेशेश्वरवैरिनार्थः पराङ्मुखा
नोचनविभ्रमेषु· हेमाद्रिकुंजेषुविहारभाजः स्त्रियांगनाः कल्पितचंद्रकार्यान्· श्रीवीररुद्रस्ययशोविलासान्नागायन्त्यसंख्य·
सुमिवांधकारं· वीररुद्रनरेन्द्रस्यनयप्रस्थानसंभवं· रजः पिहितदिग्गोलंनिराकाशमिवोत्थितं· एषुभ्रोकेषुपंकवैरध्यशीना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

काशानांसभावाः फलत्वेनोत्प्रेक्ष्यंते. मज्जनादयोनिमित्तानि. तेषुपराङ्मुखत्वमेकोगुणः अन्याः क्रियाः इत्यंगुणक्रियानिमित्तभेदाउक्ता
र्थाः. एवंफलोत्प्रेक्षाः षोडशप्रदर्शिताः इतिवाक्योत्प्रेक्षावर्गः अथगम्योत्प्रेक्षादिज्ञापकोदाह्रियते नभसिमहसांध्यांतध्वां
क्षप्रभारागपत्रिरागमिहविहरतोऽपेनपातांरवेरवलोकयत. शशविशसनत्रासादाशाकामगाच्चरमांशशीनदधिगमनात्रारापा
रावतेदडीयत. अत्रसूर्यरागविलक्षणांधांतकाकप्रभापराङ्मुखेनरूपाणांकिरणानांविहरणोननिमित्तेनसूर्यस्यस्थेनपातवनीस्त
गयाविहारक्रियोत्प्रेक्ष्यतेइतिक्रियास्वरूपोत्प्रेक्षानावदेका. तस्माच्छ्रुतिनस्त्रासः. तस्यदिगंतरगमनंप्रतिहेतुत्वेनोत्प्रेक्ष्यत
इतिहेतूत्प्रेक्षाया. ततस्तदवगमस्तारापारावतानांमुहुर्यनत्वेनाश्रवसितं. तस्यामेअस्त्ररणंप्रतिहेतुत्वेनोत्प्रेक्ष्यतेइत्यपरावत

Nepal Sanskrit University, Baimeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हेतुत्वेक्षा सर्वाश्चैतागम्याः इत्याद्यभावात् एवमन्याअपि स्वयमेव वोद्याः न्यूनमादिशब्दविरहेणापूर्वोक्तप्रकाराणामुत्रेतुंशक्यत्वात् प्राप
ज्ञः प्राप्तदारुणानामेव श्लोकानां न्यूनमादिशब्दविधानेन गम्योत्प्रेक्षोदाहरणात्वसंभवाच्च गम्योत्प्रेक्षाः पृथक्शाकल्पेन नोदाहृताः इदं
तु चिन्त्यते गम्योत्प्रेक्षासु जातिद्रव्यस्वरूपोत्प्रेक्षे संभवतो नवेति संभवत इति पक्षे रुचयोत्प्रमितस्य भास्वतः सवलिताय त्रिराध्वयाः
ॐ श्रीगणेशायनमः॥ ॥ अम्भुरुहमधुपमुखितपद्मापंकजातजनिपंकजिनीयम्। वृद्धतोकिलजडापिचयस्मात्साकरांतदिभाजनमासः॥१॥
श्रीगुरूनपितरौचापिनत्वाभास्करशंकरौ॥ छन्दरत्नाकरेसेतुयथाविधिविरच्यते॥२॥ अथारम्भेयमर्थमधिकृत्यप्रवर्त्ततेतत्रयोजक
मितिगौतमसूत्रोक्तेः प्रयोजनंत्रिवर्गप्रमाणरूपंमंगलंनिबन्धनंचप्रयोजनेश्लोकत्रयेणाह। सुखसन्तानेति। सुखंनिर्विघ्नं
थसंभावितजन्यं चिंतामणिकारस्यविघ्नध्वंसजन्यंकृतस्य सन्तानः परंपरा तत्सिद्ध्यर्थंत्रांकरांनत्वेतिसंबंधः। सर्वंसुखंब्रह्मानंदः संतान
पुत्रपौत्रादियोतेः सिद्धिरिति। सच्छास्त्राव्याख्यानेप्रकृतानुपयोगादुपेक्षम्। अत्रश्लोकेयमकंत्रयालंकारः। शंकरंत्रयस्यदृष्टिः। य
दुक्तम्। अर्थेप्रत्यर्थभिन्नानांत्रयाणांसापुनः श्रुतिः। यमकमिति॥१॥ वेदार्थेति। मनेहमिति। वेदार्थश्चत्रोवेदास्त्रयीचेतिद्वन्द्वः॥
श्री॥ सुखसन्तानसिद्ध्यर्थंनत्वाब्रह्माच्युतार्चितं॥ गौरीविनायकोपेतंवृंकरं [illegible] लोकशंकरं॥१॥ वेदार्थश्चोवसा
स्त्रः वैपैकोभट्टिजोत्तमः॥ तस्यपुत्रोत्रिलकेदारः शिवपादार्चनेरतः॥२॥ तेनेदंक्रियतेछंदोलक्ष्यलक्षणसंयुतम्
छन्दरत्नाकरंनामबालानांसुखसिद्धये॥३॥ पिंगलादिभिराचार्यैर्यदुक्तंलौकिकंद्विधा॥ मात्रावर्णविभेदेनछंदस्तदि
हकथ्यते॥४॥ अध्यायनिबद्धस्यछंदसोऽस्यपरिस्फुटम्॥ प्रमाणमपिविज्ञेयंसूत्रिंशदधिकंशतम्॥५॥१३६॥
द्विजोत्तमइति। द्विजेषूत्तमइतिविग्रहः॥ लक्ष्येति। लक्ष्यंचलक्षणंचेतिद्वन्द्वः। ताभ्यांसंयुतंयुक्तमस्यतुसूत्रेलक्ष्यलक्षणयोरभिन्नत्वाच्छन्दोनेयुक्तमितिवि
धाय्यमुक्तंतन्न। पदार्थयोरभेदेपिपदार्थतावच्छेदकभेदेपिद्वन्द्वस्यप्रमाणप्रमेयतादावत्रचद्वन्द्वोदर्शनात्। यद्वा। लक्ष्यंचतच्चलक्षणंचेतिकर्म
धारयोक्तं। ईदृशंछन्दरत्नाकरनामछंदः छंदःप्रतिपादकोग्रंथः क्रियतेइत्यर्थः॥२॥३॥ अथस्वकृतेप्रमाणाशङ्कांनिराकरोति। पिंगलादिति॥ राम:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

।ऽ।आदिःऽऽ।। चतुर्लघुरिति। एवामुपयोगः आर्यादिलक्षणोद्दिष्टीयाध्यापेभविष्यति। मनुसुधादौ व्याख्यातं सर्वत्रान्ते मध्ये आदौ च गुरुर्यत्रांतेऽपि तत्
छिन्नम्। शेषावकुशीहीरिति पाणिनिसूत्रेणेन शेषपदेन विकल्पतः हिशब्दस्य महत्त्वाभिप्रायादिमहाभाष्यवार्तिकादिग्रंथेन च सह विरोधात्। अतस्तत्रैव
गुरित्यत्र विशाणागवामयमिति मीमांसकोक्तविग्रहोपि न श्रद्धेयः। यत्र तर्ह्यते आदिस्थेनादिग्रन्थेन कर्मधारयं कुर्वतः। सूत्रकारस्तु महान्प्रवादः सर्वगुरुगणाया
नुपपत्तेः। किंच। आद्यन्तपदस्योभयोः सहः। मात्रा प्रकारक मविरोधादिति षष्ठे स्फुटीकरिष्यते। अथ गुरुलघुस्वरूपमाह। मानुस्वार इति। यथा तत्रैव
सर्वपेत्यादावनुस्वारान्तो रकारोगुरुः। श्रियः पतिरित्यादौ विसर्गान्तः शुक्लपरः संयोगपरो यथा। नरुणामर्थपत्रसकरकारः। वकराद्यजनान्तोपि यथा
तनवात्मन्मथविभ्रमो भवत्। इति। यत्तु भट्टाः शुक्लपर इति। व्यञ्जनोपध्मानीयजिह्वामूलीयपराणामपलक्षणानामिति वाचस्पतिः तत्र व्यञ्जनांशेऽपलक्षणत्वमास्तां जिह्वामू
लीयाद्यंशेतु संयोगपरत्वेवास्तीति कथं तदिति। चिन्त्यम्। अयोगवाहानामर्थवत्त्वप्रसङ्गात्। जिह्वामूलीयोपध्मानीयौ हलूत्वेन कर्मपवर्गयोरनार्ये रासंयुक्त
सानुस्वारो विसर्गान्तो ह्रीर्योयुक्तपरश्चयः।। वापादान्तेत्वसौ गवक्रोज्ञेयोऽन्योमात्रकोलघुः।। ९।। सात्। यथोक्तं हयवरट्
श्लोकानन्तराः संयोगइति संयोगसंज्ञेति। एवं गुरुस्वारमहरांगोवलीवर्द्दन्यायेन। एवं विसर्गस्यापीति ध्येयम्। एवं ह्रस्वगुरुत्वमुक्तम्। तद्रांसर्षपत्राकमित्यत्रे
वत्राकात्परोऽकारः। पादान्तइति। पादश्चेद्दसमोग्राह्यः तदन्यत्र लघोर्गुरुत्वं वैकल्पिकम्। तेन गुरुत्वाज्जातौ तु वंशस्थमुदीरितम् जराविति वंशस्थलक्षणाम् ज
गन्निवासो वसुदेवसद्मनीत्यत्र संगतं भवति। अन्यथा सद्मनीति कारस्य लघुत्वेन भगणानवत्वं स्यात्। क्वचित्तु लघुतैव। तेन जरौ समानिका गतौ इत्यादौ
समानिकादिलक्षणासमन्वयः। विषमपादान्त्यलघोर्गुरुत्वं तु स्वारपरत्वं विनानगुरुत्वम्। अतएव सद्मनेकाव्यप्रकाशे [illegible] कृतोक्तम्। विकसितसह
कारभारहारिपरिमलपुञ्जितऽञ्जितद्विरेफरुतिः। अत्र परिमलपदस्य [illegible] वर्णस्य गुरुत्वार्थमुदितइति पाठो युक्त इति। कव
यस्तु। विषमपादान्तस्यापि गुरोः स्थानेलघुत्वमपि ज्ञातमिति। यथादिवाकाद्दक्षतियोगहासुइत्यादि। अथ गुरोः प्रकारैरेव नसंशयायमाह
वक्रइति। यथाऽन्योगुरोरन्यमात्रकोलघुर्ज्ञेयः सतु मज्जुलोव्यः।। ८।। श्री।। ऽऽ।।।

र्द्ध यथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वृ॰र॰क॰ अथ गुरोरपि क्वचिल्लघुत्वमाह। पादादाविति। पादादौ यः संयोगः स क्रमसंज्ञस्मिन् नत्यरतः। पूर्वस्य गुरोरपि वर्णस्य लघुता स्यात्। अस्ये
ति। लघुत्वस्येत्यर्थः॥१०॥ तरुणमिति। अत्र अल्पव्ययेन सुन्दरीति तृतीयपादान्ये कारो ग्राम्येति संयोगपरत्वाद् गुरोरस्याया
स्तृतीयपादस्य द्वादशमात्रता प्रकल्प्यते ऽतस्तस्य लघुत्वमुच्यते। यदुक्तं श्रुतबोधे। यस्याः पादे प्रथमे द्वादशमात्रा
तथा तृतीयेपि। अष्टादश द्वितीये चतुर्थके पञ्चदशार्येति। वस्तुतस्तु। सूत्रादिग्रन्थपर्यालोकेन यथा पादव्यव
स्थानलभ्यते। यदुक्तश्चायं। स्वानुस्वारोपहितो द्विरुच्यते संयोगादिः स क्रमवृद्धिश्च प्रातिस्वाख्यादावपादादाव

पादादाविह वर्णस्य संयोगः क्रमसंज्ञकः॥ पुरस्थितेन नेतेन स्यात्र्यघुतापि क्वचिद्गुरोः॥ १०॥
इदमस्योदाहरणम्॥ तरुणं सर्षपशाकं नवोदनं पिच्छिलानि दधीनि॥ अल्पव्ययेन सुन्दरि ग्राम्यजनो
नाभिरुचमश्नाति॥ ११॥ क्रमसंज्ञायाऽभ्युपगमात्। कस्यचिद्संयुतपरस्वरो गुरुराह होर इति प्राकृतपे
ङ्गलशास्त्रान्यतः कुत्रापि इत्यभिधानात्। यासनाभिहृदमज्जनमाश्रुप्रस्थितमिव सनग्रहरापेति माघादौ नाभी
तिकारस्य हेति संयोगपरस्यापि लघुताया औचित्यात्। अन्यच्च। त्यागतानो भरो रिति सूत्रासंगतेरिति दिक्। सर राम:
खतीकराठाभरकारस्तु। यदातीव प्रलयेन संयोगादेर्गौरवं न छन्दोभङ्गः मप्याह:। एतदादोयाय सूत्रयइत्याह। ए ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तेनछन्दोभङ्गभियापूर्वोक्तं माघश्लोकेहदशाहृ मपनीयनदत्राहृ: पठनीयइतिदुर्घटरीतिकारोक्तमनादेयम्॥ ११॥ अथो
ति। अथयोऽनुष्टुभिःख्यातमित्यादौ वयद्वानामितित्रोयः। चतुर्थीशाइतिश्लोकस्येतिशेषः। आर्योदिषुवक्षमा
णायायतेःस्वरूपमाह। विच्छेदेति। यथावक्ष्यति। षष्ठेहितीयलादित्यादि॥ १२॥ संज्ञान्तरमाह। युक्तममिति। यु
गितिसमपादस्यसंज्ञा। यथावक्ष्यत्यनुष्टुप्प्रकरणे। युजोर्जनसरिहतुरित्यादि। १२। अयुगिति। विषमपादस्यसंज्ञा

अधिभूतस्साहीनांज्ञेयासंज्ञाचलोकतः॥ ज्ञेयःपादश्चतुर्थोत्रोयतिर्विच्छेदसंज्ञका॥ १२॥
युक्तमंविषमंचायुक्तस्थानंसद्भिर्निगद्यते॥ सममर्द्धसमंवृत्तंविषमंचतथापरम्॥ १३॥
यथातत्रैववक्ष्यति॥ चपलाचक्रमयुजोरित्यादि॥ चकारात्समपर्यायोयुग्मशब्दोविषमपर्यायस्त्रोजःशब्दश्च
ज्ञेयः। यथावक्ष्यतिवेतालीयप्रकरणे। यदासमावोजयुग्मकावित्यादि। समभिति। यथातृतीयाध्यायेवक्ष्य
ति। गुःश्रीरित्यादि॥ अर्द्धसममिति॥ यथाचतुर्थेवक्ष्यति। विषमेयदिसोऽसलगावित्यादि। अत्रदुतमध्यादि
तिभट्टोक्तव्याख्याचिंत्यम्। उपचित्रस्यत्यागेबीजाभावात्। विषमंचेति। यथापञ्चमेवक्ष्यति। मुखपादोरुभि
रित्यादि॥ १३॥ एषांमात्राणांस्वरूपंश्लोकत्रयेणाह। अङ्घ्रयोयस्येत्यादिना। यस्यचत्वारःपादास्तुल्यास्त
त्समम्। यस्यप्रथमस्यप्रथमतृतीययोर्द्वितीयचतुर्थयोश्चपादयोःसाम्यंतदर्द्धसमंयस्यचत्वारोपिपादाविल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षराणास्तद्विषममित्यर्थः ॥ १४ ॥ १५ ॥ १६ ॥ एकाक्षरमारभ्य षड्विंशत्यन्तमेकाक्षरवृद्धितैः पादैः समं वृत्तं छन्दो
याध्यायेष्वेकदृष्टव्यम् ॥ १७ ॥ तद्ऊर्ध्वमिति । तद्ऊर्ध्वं षड्विंशात्पूर्ध्वम् । चंडवृष्ट्यादिति । आदिनाव्यालजीमूतादय

त्रङ्घ्रयस्यचत्वारस्तुल्यलक्षणलक्षिताः । तच्छन्दः शास्त्रतत्त्वज्ञाः समं वृत्तं प्रचक्षते ॥ १४ ॥ प्रथमाङ्घ्रिसमो यस्य तृतीयश्च रणाभवेत् ॥ द्वितीयस्तुर्यवद्वृत्तं तदर्द्धसममुच्यते ॥ १५ ॥ यस्य पादचतुष्केपि लक्षाभिन्नं रस्परम् ॥ तदाहुर्विषमं वृत्तं छन्दःशास्त्रविशारदाः ॥ १६ ॥ आरभ्यैकाक्षरात्पादादेकैकाक्षरवृद्धितैः ॥ एष कछन्दो भवेत्पादैर्यावत्षड्विंशतिगतम् ॥ १७ ॥ तदूर्ध्वं चंडवृष्ट्यादिदण्डकाः परिकीर्त्तिताः ॥ श्लोकगाथास्त्रिभिः षड्विंशत्वरोश्चोपलक्षिताः ॥ १८ ॥ उक्तात्युक्तातथा मध्या प्रतिष्ठान्यासपूर्विका ॥ गायत्र्युष्णिगनुष्टुप्च बृहतीपङ्क्तिरेव च ॥ १९ ॥ त्रिष्टुप्च जगतीचैव तथातिजगतीमता ॥ शक्वरीसातिशर्वाद्यास्पादस्यन्यष्टीमतः स्मृते ॥ २० ॥ धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः ॥ विकृतिः संकृतिश्चापि तथाभिकृतिरुत्कृतिः ॥ २१ ॥ इत्युक्ता श्छन्दसां संज्ञाक्रमत्रोवच्मि सांप्रतम् ॥ लक्षणासर्ववृत्तानां मात्रावृत्तानुपूर्वकम् ॥ २२ ॥ इति सत्तरत्नाकरे छन्दः

इति सुधाकृत्रिश्रन्या ------ गस्य निर्बीजत्वात् । प्रथमिति । ततस्त्रिभिः षड्विंशत्वरोरुपलक्षितानां गाथानां प्रकरूपत्रोपमित्यर्थः एकाक्षरादिषड्विंशत्यन्तानां छन्दसां क्रमेणासंज्ञाः श्लोकत्रयेणाह । उक्तेत्यादिना ॥ १९ । २० । २१ । इत्युक्तारति । द्वितीयमात्रावृत्तमुक्त्वा सर्ववृत्तानां लक्षणं साम्प्रतं तृतीयादौ वच्मि । वक्ष्यामि । वर्त्तमानसामीप्ये वर्त्तमानवद्वा लट् ॥ २२ ॥ इति श्रीमदग्निहोत्रकृतौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मगणस्यचतस्रः४ अष्टमस्यानीयगुरोर्द्वे इति संयोजनात्सप्तविंशतिमात्राः शिष्टमार्योत्तरार्द्धलक्षणं पर्यवसन्नम्। अस्मिंश्चेदं
चरमे इत्याद्युत्तरार्द्धे अक्षोयं नलघ्वेत्यादिपूर्वपद्योत्तरार्द्धे चेति स्वयं संगमनीयम्। भेदाआर्यादिवृत्तेषु भूयांसः संति यद्यपि
तथाप्यनुपमुक्त्वा नहुवेकिलतानिह। आर्यालक्षणम्॥२॥ अथ पथ्यायाः लक्षणमाह। त्रिष्विति। यस्याद्वयोरप्य
र्द्धयोस्त्रिष्वंकेषु चतुर्मात्रागणेषु। पादो विरामोहस्पतेसा पथ्येति। केवलं यतिकृतं आर्यातो वैलक्षण्यम्। यथा त्रि
ष्वंशकेषु पादस्त्यस्यान्नेपतिः पथ्यतिनामतस्याः इत्यत्रोत्तरार्द्धे। ३। अथ विपुलामाह। उल्लंघ्येति। उल्लंघ्य गणात्रयमादि
ममिति। गणात्रयमुल्लंघ्य-आदिमभित्पत्रविरामगतो जगणो यस्याद्वयोरप्यर्द्धयोर्द्वितीयचतुर्थयोः स्यातां सा विपुलार्या।
त्रिष्वंशकेषु पादो दलयोरायेषु हस्पतेयस्याः। पथ्यतिनामतस्याः छन्दोविद्भिः समाख्यातम्॥३॥ उल्लंघ्य
गणात्रयमादिमंत्रा कलयोर्द्वयोर्भवति पादः। यस्याः सा पिंगलनागो विपुलामिति समाख्याति॥४॥ उभया
र्द्धयोर्जकारो द्वितीयतुर्यौगमध्यगो यस्याः॥ चपलेति नामतस्याः अकीर्त्तितं नागराजेन॥५॥ ॥ ॥ श्रीः

यथा पूर्वार्द्धे द्वयोर्ज इति द्वितीयो जगणः। द्वितीय इति चतुर्थोपि। एवमुत्तरार्द्धे तिनामेति द्वितीयो जगणः अकीर्त्ति
तमिति चतुर्थश्च॥५॥ अथ मुखचपला। आद्यमिति। यस्याः आद्यमर्द्धं चपलालक्षणाविशिष्टम्। यादृशेऽपरार्द्धे। पू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रव

र्वजलक्ष्मा। आर्योत्तरार्द्धसामान्यलक्षणोपेतनसप्तविंशतिमात्रारूपेणाविशिष्टासाद्वपला। अन्वर्थाचेयंसंज्ञा प्रवेपूर्वार्द्धेच
पलालक्षणवत्वात्। एवमुत्तरार्द्धेचपलालक्षणवत्त्वाज्जघनचपलाया अपि। ६। अतएवाह। प्रागिति प्रथमार्द्धे आर्यापूर्वा
र्द्धलक्षणम्। प्रथमेतरेहि [redacted] तीयचपलालक्षणंयस्याः साजघनचपला प्रथमामितरद्यस्मादितिबहुव्रीहिः। ७। इत्या
र्यालक्षणम्। दिपूर्वार्द्धलक्षणं भवेत्तापिंगलागीतिमुक्तवान्। कथमपीति। पूर्वोक्तलक्षणेतिपक्षयोरन्यतरपक्षेणापीत्यर्थः
अथगीतिः आर्याप्रथमेति। यस्माः पूर्वोक्तद्वितीयार्द्धेपिलक्ष्मेतदिति॥ यतुसुधायां षड्जगणाचतुर्लघुगणान्यतमप्रकारे
णेतिव्याख्यातंतदशुद्धम्। षड्जगणाचतुर्लघुपक्षयोरेकस्यनिर्द्धारणीयत्वात्। अन्यतमशब्दोहिवक्ताविषयकनिर्द्धारे

आद्यंवलंसमस्तंभजेतलक्ष्मचपलागतंयस्याः। आर्यापूर्वजलक्ष्मा प्रवचपलासोदिताप्रमिना॥ ६॥ प्राक्प्र
तिपादितमर्द्धेप्रथमेप्रथमेतरेतुचपलायाः। लक्ष्मा त्रयेतसोक्ताविशुद्धधीभिर्जघनचपला॥ ७॥ इत्या र्यीलक्षणम्॥
आर्याप्रथमदलोक्तयदिकथमपिलक्षणं भवेदुभयोः। दलयोः कतपुगतिश्चोभांगीतिंगीतिर्वाभुजगेन्द्राः। ११।
आर्याद्वितीयकेर्द्धेयद्वदितंलक्षणंतत्स्यात्। यद्युभयोरपिदलयोरुपगीतिंकाश्यपोमुनिर्ब्रूते। १२। आर्यायाकलहितयं
यत्पयरचितंभवेद्यस्याः। सोगीतिः किलकथिताद्वयन्तंशभेदसंयुक्ता। १३। गायत्रीजपते। षड्जाम्। यस्यसौर्यायकेयटे
न आन्यतरान्यतमशब्दावक्तान्नोस्वभावाद्विवक्तविषयेवर्तेतेइति। अथोपगीतिः आर्याद्वितीयकमिति इहभवतिषष्ठोक्तइत्या

निर्द्धारणे

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ पद्यद्वयेनार्यालक्षयति। लक्ष्मेतदित्यादिना। यत्र चतुर्मात्राः सप्तगणाः संभवन्ति। एकेन गुरुणा अष्टमस्थानीयेन सहि
ताश्च। एतत् आर्यायाः प्रथमार्द्धनियतं लक्ष्यलक्षणज्ञेयम्। एवं हि सप्तगणानामष्टाविंशतिमात्राः २८। अष्टमस्थानीय
गुरोर्लघुमात्रे इति संयोजनात् त्रिंशन्मात्रा ३० वैशिष्ट्यमार्यायाः प्रथमार्द्धलक्षणपर्यवसन्नम्। तत्किमविशेषेणानेत्याह।
भवतीनेहेति। इह प्रथमार्द्धे। विषमे विषमस्थाने प्रथमतृतीयपञ्चमसप्तमार्यायां द्विगुर्वादिवन्मध्यगुरु चतुर्मात्रो
त्पन्नोपि जोजगणो न भवति। समे त्वनियतः। कतर्हि नियतः स्यादत आह। षष्ठ इति। षष्ठात्पूरणाः षष्ठ। वा अथवा। षष्ठो
नलघुर्देयो। नश्चलघुश्चनलघू। नगणश्चिलघुः एकस्तरेणलघुश्चेति चतुर्लघुरूपो गणः षष्ठो देय इत्यावत्। तथा च

लक्ष्मेतत्सप्तगणागोपेता भवति नेह विषमे जः। षष्ठो यनलघ्वा प्रथमार्द्धे नियतमार्यायाः॥ ९॥

जगणश्चतुर्लघ्वन्यतरस्तु षष्ठ इति नियमः फलितः। यथा लेवत्रैक्षणासमन्वयः। लक्ष्मे इति द्विगुरुरूपश्चतुर्मात्रस्तु एको गण
णः। एवं तत्स इति द्वितीयगणः। सप्तगणाश्चैत्यन्यगुरुस्तृतीयः। गोपेरिति द्विगुरुश्चतुर्थः। ताभव इत्यादिगुरुः पंचमः। ति
नेहेति मध्यगुरुः षष्ठः। विषमे इत्यन्यगुरुः सप्तमः। जं इति चान्तिगुरुरिति संयोजनात् त्रिंशन्मात्राः संन्ति प्रथमार्द्धे। नालि
वज्जोगणस्थाने विषमः। न च व्यंजनं चार्द्धमात्रकमित्युक्ते व्यंजनद्वयसंयोगस्य मात्रात्मकत्वात् त्रक्ष्मेत्यादौ मात्रा
धिक्यात् त्रिंशन्मात्रारूपलक्षणासंगतिरिति वाच्यम्। अर्धमात्राणामवगणालिनव्यंजनसंयोगानामतथात्वात् न

तस्यद्वेमात्रेइति ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लघूचेत्स्यादाहरणमनुद्वितीयपद्यप्रथमार्द्धेत्रियम्। अत्रजगोजमिति। षष्ठस्थानेजगणाइतिसुधोक्तव्याख्यानम
नोदयम्। प्रथमायाःषष्ठ्यर्थेलक्षणापत्तेः तच्चनलघ्वेत्पत्रनघ्नोलघुरितिसूत्रेणाह तन्नलघ्वइतिद्विवच
नानुपपत्तेः। ७। एवमार्यापूर्वार्द्धेलक्षयित्वाद्वितीयेनपद्येनयतिनियममुत्तरार्द्धलक्षणमाह। षष्ठेद्वितीय
यलादिति। अत्रप्रथमेइत्यनुवर्त्तते। षष्ठेषष्ठस्थानेलेनगणोयुक्तेलघौ। चतुर्लघावितियावत्। लतेसति चतुर्ल
घुसंबंधीवोलघुस्तस्मात्प्रथमेपूर्वस्मिन्प्रथमलघौ। यतिसविछेदपदस्यनियमःसमाप्तिः। परके इति। सप्तम
षष्ठेद्वितीयलात्परकेलेसुखलाच्चयतिपदनियमः॥ धर्मेऽर्धेपंचमकेतस्मादिहभवतिषष्ठोलः॥२
स्थानेलेसति सुखलात् आदिलघोः प्रथमेषष्ठगणान्तेसमाप्तिरित्यर्थः। यथात्रैव। षष्ठेद्वितीयलात्परकेले
सुखलाच्चेत्पत्रषष्ठचतुर्लघुप्रयुक्तायतिः सयतीत्यत्रतु सप्तमलघुप्रयुक्ता। अथोत्तरार्द्धेयतिनियममाह॥ च
रमे इति। अन्तिमेर्द्धेपंचमस्थानेलेसति तस्मात्त्रयोःपूर्वस्मिन्चतुर्थगणान्तेयतिः यथा। चरमेर्द्धेपंचमकेतस्मादिस
ति। अथोत्तरार्द्धलक्षणमाह। इहभवतिषष्ठोलइति। इहआर्यायांउत्तरार्द्धे। षष्ठगणस्थानापन्नएकोलघुरेवदेया
नतुचतुर्मात्रोगणाः शेषंपूर्वार्द्धवत्। एवंहिपंचगणानांविंशतिमात्राः २० षष्ठगणस्थानीयलघोरेका। सप्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योत्तरार्द्धलक्षणाप्यस्याहयोरर्द्धयोः स्यात्तेषिगीतिः॥ २॥ अथोद्गीतिः॥ आर्यासकलेति। यस्याऽर्द्धद्वितयं हितयमप्यर्द्धम्। यत्र्येनरचितम्। आर्योत्तरार्द्धलक्षणाकपूर्वार्द्धं तत्रवीर्द्धलक्षणाकोत्तरार्द्धं स्यात्। सोद्गीतिः॥ तद्वदिति। पथ्यायीवदितिभावः। यत्पंक्तिभेदसंयुक्तेति। त्रिष्वंशकेष्विमाश्रुक्तलक्षणासंयुक्तेत्यर्थः॥ ३॥ अथार्यागीतिः॥ आर्यापूर्वार्द्धमिति। त्रिंशन्मात्रारूपं पूर्वार्द्धं निधने अन्ते। एकेनगुरुणायुक्तं। द्वात्रिंशन्मात्रा विशिष्टं पूर्वार्द्धमितियावत्। यदायं स्यात्। उत्तरार्द्धमपिनिरविरलंतद्वत्। द्वात्रिंशन्मात्राविशिष्टमित्यर्थः। आर्यागीतिः॥ तथाचोक्तं सूत्रकारेण। अर्द्धेवसुगणाआर्यागीतिरिति। अत्रसूत्रे अर्द्धइतिवसुगणोइतिचयथया

आर्यापूर्वार्द्धं यदिगुरुणैकेनाधिकेननिधनेयुक्तम्॥ इतरत्तद्वन्निरविरलंदलंयदीयमुदितैवमार्यागीतिः॥ ४॥

द्विवचनान्तमितिसूत्रादावुक्तत्वा। ईदूदेद्द्विवचनंप्रगृह्यमिति प्रगृह्यत्वात्प्रगृह्यभावापत्त्या। अयादेशायुनापत्तेः। तस्मात्तत्रत्रमित्थंव्याख्यातं। आद्यार्द्धेद्वितीयेचाष्टगणेसत्यार्यागीतिरिति। एतेनपूर्वार्द्धेद्वात्रिंशन्मात्रा। उत्तरार्द्धेत्वेकानत्रिंशन्मात्रा। आर्यागीतौ भवन्तीतिमन्यमानासुस्रुशादयोपिनिरस्ताः। मधुकरविरुतानमिताक्षरपंक्तीविभ्रतोस्यविरुतानमिताः। परिपाकपिशंगलतारजसारोधश्चकाशिपिशंगलतेतिमायोक्तार्यागीत्युदाहृतिविरोधाच्च॥ ४॥ इतिगीतिप्रकरणम्॥ ॥ अथवैतालीयं॥ ॥ अथविषमेइति। वैतालीयेछन्दसि। विषमपादेप्रथमतृतीयरूपेषट्कलाः षडमात्रादायाः। तासाम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नोचरसौ। रश्च लश्च रलौ॥ अथ लघुरगणः॥ अन्ये लघ्वश्च। ततो गुरुश्चेति। समे पादे द्वितीयचतुर्थ स्वल्पेन्तु अष्टौ
कला इत्याः। ताश्च निरन्तरा नो स्युः॥ नो इति निषेधार्थकः। अग्रमग्रहिता अग्रो नदया इत्यर्थः। प्रासमष्टकलानाम
तोयवमपादव इगणो हि घुगुरु चेत्य॥ अत्र अ समसंख्यकला सुमध्य। समा कला द्वितीयादिकापराश्रिता तृतीयादि
श्रिता न भवन्ति द्वितीयातृतीयाभ्यामेको गुरुर्न कर्त्तव्य इत्यर्थः। एवं चतुर्थपञ्चमाभ्यामपि स्वल्पमात्राभ्यां च। नाहं वेत्ता लि
यलक्षणम्। अस्ति चेदमत्रैव षड्विषमे इति। विषमपादे यरामात्राश्चत्वारो मनो ऽष्टौ समे इति रगणास्तदन्ते च कला इति लघु
गुरू। नास्ति च द्वितीयतृतीयाभ्यां चतुर्थपञ्चमाभ्यां च मात्राभ्यामेको गुरुः किन्तु द्वे प्रथमाद्वितीयाभ्यां पञ्चमषष्ठीभ्या
मिति गीतिप्रकरणम्॥ षड्विषमे ष्टौ समे कला ताश्च समे स्युर्नो निरन्तराः॥ न षमात्रपराश्रिता कला येना
लीयेन्तो लो गुरुः॥ १॥ पर्यन्ते र्यो ति यैवक्षो यं स्वोपच्छन्दसि कं सुधीभिरुक्तम्॥ २॥ ॥ मक्ति। एवं तृतीयाप
देहस्वम। अथ द्वितीये समपादे ताश्च समे स्युरित्यष्टौ मात्राः सन्ति। तदन्ते च नो निरन्तरा रगणास्तदन्ते तरा इति
लघुगुरू। मात्राश्च शुद्धा अष्टौ लयो वो न सन्ति किन्तु गुरुमिश्रिताः। नापि द्वितीयादिमात्रान्ततीयाद्याश्रिता स्ति।
र्वं चतुष्पादेप्यस्वम्॥ १॥ अथोपच्छन्दसिकथम॥ पर्यन्ते इति। अवसाने विषमपादे यरामात्रास्तदन्ते रगणापग
णो यत्र तदोपच्छन्दसिकम्। तयेवक्षो नमिति। यद्यपि विषमपादान्ते लघो र्न गुरुत्वमिति प्रागुक्तम् तथापि कविश्रमय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रसिद्धारसादिकाव्यविषयंतन्नलेताइत्राविजयमितिभावः॥२॥ अथापातलिका। आपातलिकेति। विष
मेषणमात्राः समेऽष्टावित्यादिपूर्ववत्। स्यांस्तु विशेषः। तासामन्ते भगणोद्वौगुरूचेति। अन्यद्धि मत्रतकाग
ध्यंजनांतस्यापिह्रस्वस्यगुरुतायाः प्रागुक्तत्वादुरैर्वन्यताऽस्ष्या॥३॥ अथदक्षिणांतिका। तृतीयेति।
यस्यवैतालीयस्यचतुर्षुपादेषुद्वितीयोलघुस्तृतीयेनलघुनायुक्तः स्यात्। प्रथमोलघुर्द्वितीयोगुरुरेवस्या

आपातलिकाकथितेयंभाजुरुकावथपूर्ववदस्यत्॥३॥ तृतीयमुकदक्षिणांतिकासमस्त
पादेषुद्वितीयलः॥४॥ उदीच्यवृत्तिर्द्वितीयलः सक्तोग्रेणाभवेद्युग्मयोः॥५॥ पूर्वेणाप्रतोथप
श्चमः प्राच्यवृत्तिरुदितेतियुग्मयोः॥६॥ यदासमावोजयुग्मकोपूर्वयोर्भवतितत्प्रवृत्तकम्॥७॥

इतियावत्। साक्षिणांतिका॥४॥ अथोदीच्यवृत्तिः। उदीच्येति। यत्राप्रयुग्मयोर्विषमयोरेवपादयोः। अग्रे
णात्तृतीयेनयुक्तश्चद्वितीयोलघुः स्यात्तदैतालीयमुदीच्यवृत्तिसंज्ञंज्ञेयम्॥५॥ अथप्राच्यवृत्तिः। पूर्वे
णेति। चतुर्थेनयुक्तश्चेत्त्रयुः समपादयोः स्यात्तदैतालीयंप्राच्यवृत्तिः॥६॥ अथप्रवृत्तकम्। यदासमावि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वृ॰र॰टी॰ ८

ति।२वयोरुदीच्यप्राच्यवृत्तयोः समौ ताद्वयौ॰ओजयुग्मकौ विषमसमपादौ। विषमपादुदीच्यवृत्तेः समपादः प्राच्यवृ
त्तेरिति यथासंख्येनान्वयः। क्रमश्चदेवसामान्यादिति तात्पर्यन्यायादिति भावः। तत्प्रवृत्तकं॰नाम॥७॥ अथापरा
न्तिका। अस्येति। प्रवृत्तकस्य समपादे प्राच्यवृत्तिलक्षणो यो सर्वपादे रचिता साऽपरान्तिका॥८॥ अथ चारु
हासिनी। अयुग्मेति। यत्प्रवृत्तकस्य विषमपादे प्राच्यवृत्तिलक्षणो केरचिता सा चारुहासिनी भाम॥९॥

अस्य युग्मरचितापरान्तिका॥८॥ अयुग्मपाद्यचारुहासिनी॥९॥ इति वैतालीयप्रकरणम्॥

वक्त्रं नाद्यान्नसौ स्यातामन्त्यौ यौ जुष्टभिर्व्यातम्॥२॥ युजोर्यैर्जनसरिद्भिर्नः पथ्यावक्त्रं प्रकीर्तितम्॥२॥

इति वैतालीयम्॥ अथानुष्टुप्प्रकरणम्॥ वक्त्रमिति॥ अनुष्टुभि॰ त्रिषाक्षरे छन्दसि॥ आद्याद्दक्षराद्ग्रे नगणो
नदेयो नापि सगणः॥ किंतु मगणादयो देयाः॥ किंच। अन्त्रेश्चतुर्थाद्दक्षराद्ग्रे यो गणो देयः॥ तद्ग्रे चान्यस्त
कोवर्णो ज्ञेयः। ईदृशमनुष्टुच्छन्दो वक्त्रमित्युच्यते॥ यथा चैव। इत्याद्याद्दक्षराद्ग्रे न नाद्या दिति सर्वगुरु
र्भगणो क्षिनन्तनगणा सगणो॥ द्या दिति चतुर्थाद्दक्षराद्ग्रे नसौ स्या॰ इत्यस्ति प्रथमलगणः। एवं द्वितीयपादे पि द्र
ष्टव्यम्॥१॥

राम॰ ८

366

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथवक्रस्यभेदानाह॥ युजोरिति॥ युगितिसमपादस्यसंज्ञेत्युक्तम्। आद्ययुजोःसमपादयोःसरिद्भर्नुश्चतुर्थादक्षरादये
जेनजगराश्चयोगेण। विषमपादयोर्यगणोनचपथ्यावक्रंपकीर्त्तितम्। अत्रचिरंवक्रवत्। एवमग्रे॥ २॥ ओजयो
रिति॥ विषमपादयोः। वारिधेश्चतुर्थादक्षरादयेजेनजेगराश्चयोगेण। समपादयोर्यगणोनचविपरीतपथ्यावक्रं
नाम॥ ३॥ चपलेति॥ विषमपादयोश्चतुर्थादक्षरादये नगराश्चयोगेण। समपादयोर्यगणोनचपलावक्रंनाम

ओज अयुजोर्जेनवारिधेस्तदेवविपरीतादि॥ ३॥ चपलावक्रमयुजोर्नकारश्चेत्पयोराद्रिः॥ ४॥
यस्यांलःसप्तमोयुग्मेसायुग्मविपुलामता॥ ५॥ सेतवस्यात्रिलेष्वपि॥ ६॥ रामः॥

॥४॥ अथविषुग्मेपक्ता॥ यस्यामिति॥ समपादयोर्यस्यांसप्तमोलघुःस्यात्। शेषंवक्रवत्सायुग्मचपलानाम॥
।यद्यपीदंयुजोरित्यादिपथ्यावक्रेप्यस्तितथापुपचेयसंकरत्वाद्दोषः॥ एवंपिंगलमतेनविपुलोक्ता॥ ५॥
अथसेतवमुनिमतेनाह॥ सेतवस्येति॥ चतुर्ष्वपियत्रसप्तमोलघुःस्यात्साविपुलेतिसेतवस्यमतमि॥
त्यर्थः॥ यतुचतुर्थाज्जगरोनेवसेतवविपुलेतिनिरापदः॥ यथामामकंलक्षणम्। स्यात्सप्तमोयत्रलघुश्चतुर्षु॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चतुरश्रोऽसाविपुलोक्ताऽसुमतिभिः सेवतस्यमतेनेत्यु इति ॥ ६ ॥ अथ विपुलाभेदानाह ॥ मेदौ चतुश्चरणोऽपि च
तुर्थाद्वगणप्रयोगेणाभविपुलास्यात् ॥ अतएवैकेनैव चरणेनेत्यलक्षिता । यत्तु सुहृच्चरणोनोक्तम् । विषमपाद
योर्भगणप्रयोगेणाभविपुलेतितन्न ॥ श्रोतोचेतिसामान्यतश्चतुर्थाद्वगणेनाभविपुलायाः सूत्रकारेणलक्षि
तत्वात् । विषमपादयोरित्यत्रमानाभावात् । यदपिश्रोतोचेत्यत्रचपलाऽयुजोरितिसूत्राद्युगग्रहणमनुवर्त्ततइ
तिवृत्तिकारेणोक्तं तदपिन । सर्वतः सेतः सेतवस्येतिसूत्रात्सन्निहितस्य सर्वपदस्यैवानुवृत्तेर्युक्तत्वात् । विपुलाप
भेर्नाम्नितोभाद्विपुला ॥ ७ ॥ इत्थमस्मारश्चतुर्थात् ॥ ८ ॥ नोस्वधेश्चेन्नविपुला ॥ ९ ॥
गलः सप्तमइतिसूत्रेणोपगग्रहणेन व्यवहितपदानुवृत्तिनास्तीतिसूत्रोक्तताज्ञापितत्वात् । एतेनचपलावक्रमित्या
घनुवर्त्ततेइतियत्सूत्रं तन्नोक्तं तदप्यपास्तम् । यदपितेनोदाहृतं विद्यालक्षिकामगजकुंभाभविपुलमानी
त्यादि । तदपिन । तस्यसेतवोक्तविपुलालक्षिणाक्रान्तत्वाभविपुलालक्षणत्वाभावात् । एवंहि वेटवेटवेश्वरश्वत्वरेत्यादिम
हाकविप्रयोगाभपिनास्माकंप्रतिकूलाः । एवंरनतविपुलाश्चपिविज्ञेयाः ॥ ७ ॥ इत्थमिति । चतुश्चरणोऽपिचतुर्थाद्दक्षराद्
गणप्रयोगश्चेन्नदन्यौ विपुलास्यादित्यर्थः ॥ ८ ॥ नोस्वधेरिति ॥ चतुर्थाच्चतुर्थान्नगणश्चेन्नदानविपुलानाम ॥ ९ ॥ रामः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

8959

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रामः

माली वनमाली माली नोऽवनमाली ॥ माली नो वनमाली माली नोऽवनमाली ॥ ॥

॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनागादृशैवेतेक्ष्वलक्ष्मणवान्यमिति संग्रहश्लोकोऽपि। अथ चकाव्ये क्वचिद्यमकं क्वचिदनुप्रासश्चित्रलक्षेलक्षणाकामर्थेनिनजोजनीयमिति
किंकमदलैरव्यारयंचक्तमिहम॥ काव्यार्थमाह॥ विधुरिति। विधोश्चन्द्रस्यसुस्मरूपंवदनंयस्याः सानशाराधा आलिंपंतिसेवंविधोश्चन्द्रहर
लहकुचलाः शीतावासिभनाः गिरोवाणीः आकिरद्भिस्तारयंतिस्मा विधोः श्रीवत्सलांछनस्य [illegible] गिरोऽकिरदिति वा कीदृशीरिति उक्ता
ना पुनः कीदृशी आपीडिता। न विद्यतेपीडितायस्याः सकाशात्पीडिता अतिपीडितेत्यर्थः। उत्तमेऽनुत्तमंयस्यादीतिवत् एतद्रूपः शिवः

विधुसुहृद्विरहानलपीडिता विधुसुहृत्तरलानिलपीडिता॥ विधुसुहृद्दनालिमपीडिता विधुसुहृत्सुगिरोऽकिरदीरिता॥२

यद्वा एनविस्तनाद्यविलहाणपीडिता पुनः कीदृशी विधुरवयः सहचिर्मलयोनायकः श्रीकृष्णस्तद्वीरहानलपीडिता। विधुः श्रीवत्सलांछने
नयमणायद्वा विधुसुहृत् कंदर्पस्य संबंधीयोविरहानलस्तेनपीडिता। पुनः कीदृशी। विधुश्चंद्रः सुहृत्सहायोयस्यसतादृशेनतरलेनचंचलेना
निलेनमलयानिलेनपीडिता। तरलंचंचलंवीगेहारमध्यमणावपीति विश्वः। विधुसुहृदाकाशेनतरलेनिएथक्पदत्वा॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[illegible]

रामः

उदयते दयते दयते शशी सखि कैरवकैरवकैरिति मिराकरैः॥ दिशमिमां चरमां चरमां शुभं कमलकोमललोलविलोचनम्॥ कुमुदबंधुरबंधुरबंधुरः सतनुतेतनुतेतनुतेनतः॥ हिमकरो हिमतो हिमतो नतो किमिमां मासदृशं दृशविधौ॥२॥

चेति विश्वः। पावकेचतीक्ष्णे चेति विश्वः। दुःखजनकत्वेन दाहजनकत्वेन [illegible] अर्थः॥ ७ नः [illegible] कैरवकैरवकैरवक

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कमित्तः प्राप्तः अनुनेतः। नुनेत्तो ऽनुनेत्तो यो नुनेत्तो ऽसनुनेत्तो यो नुनेत्तो ऽसनुनेत्तो यो नुनेत्तो ऽस

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कमलिनीनां अयं कमलिन्यः तथा इदयिनीनां दयिते न भर्त्रा मुनिता विरहिताः करैः किरणैः स्पृष्टं हृतिरा दुःखात् काणाः दयं यथा कमलानि विकसितानि पुष्पाणि कमलानि
वाकुलताः विकचपुष्पकाणाः कमयुक्ताः सरसा श्रीणी हृता श्रीणी हृता श्रीणी हृता

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मोहमीहमा। अन्येतु रहालवनिमाविरहोत्तम्यमानाप्रतिरवीः एव कं नयति प्रापयति सा नवीः संतापकेत्यर्थः। कीदृशीनवनीः नवं धानं निर्देशो
नवनवत्वं नयति सा तथा नवमेत्यर्थः। कीदृशी अवनी आरक्षमाणा। मानीति शेषः। पुनः कीदृशी नवनी पवनी मानी नयानी पवनी पवनी तद्वीत घ्नन्ती। पुनः की
दृशी अलिकुलालिकुलाअलिमंकुः स्थानमात्रः गलाति स्वीकुर्वन्ती नेऽलिकुलाः कोकिलास्तेषां मालयः श्रेणयस्ताः सांकुला निसम्भृतायस्यां सा तथा। पुनः की
दृशी अलिकुलेभ्रमासमूहेराकुलाव्याप्ताअलिकुलाकुला। पुनः कीदृशी अलिमाऽहः कुसुमसर्यस्यमेवमाचरयास्यः सा तथा अलिस्यामालयान कोचित्य
र्थः महिमाहिमेत्यर्थः सक्तेएवेतिव्याचक्षते॥१०॥ वकुलमिति॥ ॥ हेअलिस्त्वंतेवकुलंप्रतिग्रश्नुतगत्यागहेत्यर्थः कीदृशं वकुलं। पराणिपराणा
र्थविश्वंतेपस्मिन्तत्तथा। पुनः कीदृशं मधुमकरंदः पराणाः पुष्पधूलयश्चतत्रपराअंगेपुरःरेपुपरस्तेनोदृशाधुपराणपराश्चेऽलयश्चेतेतथाते कुलं वा
प्राप्तमियावत्पर्यंतेपरापतेतत्तः मधुंचपराणाश्चतान्पिबंतितेमधुपराणपास्तान्राश्चेतेपराणपराश्चेतेतथातादृशाश्चेऽलयश्चेतेराकुलंमा पुनः कीदृशं

अयिसालवनीनवनीरनीरनवनीनवनीपवनीमनी॥ अलिकुलालिकुलालिकुलाकुलाप्रतिहिमामहिमामहिमाहिमा॥१०
वकुलमाकुलमालिपराणिनंमधुपराणपराणपराणिभिः। विशदशारदशारदशारदशाकलंककलंककलंकितम्॥११॥
विशदोनिर्मलोयःस्वारदशारदिभिर्थश्चइतिपावत्शारदभावप्रधानानिर्देशेनशारत्वंशारत्वंचदृशातिस्तादृशोयस्मिन्सतादृशः। सैसुखं आरमतिशयेन
दृतिसपारदः एषोदशादित्वेनानुस्वारलोपः। विशदशारदशाकलंकलंकितम्। पुनः कीदृशं कलंकं कस्यचंद्रस्य कलंकेनलेपेनवकलंकितंप्राप्त
लमित्यर्थः। अनेनप्रतिहसखीनदृष्टदृश्यमानंवकुलंवकुलेपुष्पंत्वंपश्येत्याहिशेषः। कीदृशंविसंदृशारदशारदे। विगतंशोकुसुमंयस्याः सतीवकुलाविशारदाशारदे
वातेविशारदशारदेतिविलिखितादृशारदशारदम्। शमासमंतादृशानिश्रादत्तेसाशारदशारदाचासौदृशाचसातथातांगत्वादृशारदशारदे
थाविशारदशारदेचतावकुलशारदशारदेचतत्तथाविरहिजनदुःखदमातिविरहिजनदुःखदंचेत्यर्थः। पुनः कीदृशंशाकलंककलंकशाकलंकस्यचंद्रस्य
कलेककलाकांतिर्यस्यतत्तथा। पुनः कीदृशंकलंकितंकेनवापुनाकलंकितंदेषंसदोल्यमानोकोऽस्यालानिस्तार्केचित्यमरः। इतिव्याचक्षते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नवमिति। हे अशोके शोकं घति खंडयति सा कोकदनं तथा शोकदुःखं मृत्वा सखीं राधां प्रति वदति तस्याः सन्तु हे अशोके सखीत्वेन तनमशोकं तत्र
मकेवृक्षे समाश्रयति निश्चिकवेत्तिनी भवा कीदृशमशोकं। नाविद्यते शोको यत्र तत्तथा तथा चेत्समाश्रयणे नत्यशोका पनयनो भविष्यतीति भावः।
नः कीदृशं। 8 रभिनयासो मेणारभिताः रभसयुक्ता येगवन्तो हर्षवन्तो वायेअलयः तेषां रतेन क्रीडितेनादे प्रहरतस्तो यत्रतत्तथा। रभारभसकृतिना
मधातो। रिनप्रत्ययांतस्य रभिताकृतिरुपारभसोवे गहर्षयोरितिविश्वः। एवा। रभिताः सोरभयुक्ताः आसमंता द्रुमा येषां वासजातो येषां तेतथा येअलय
स्तस्तेन आरसंमाकृतिमाश्रयमहाश्रितभवामा यालक्ष्मीश्राश्रयो लक्ष्मीपतिरित्यर्थः। आगतः वर्तमानसमि ■ ण्यवर्त्तमानदेति आगतआश्रयत्र
तिभावः। कः कामिव। आलिनी भ्रमरीपातिसआलिनी योभ्रमरः कमलिनीमिव॥१२॥ सखीवचनश्रवणोपलातवेदाराधावदति। हसीति हे सखीत्व
हिनामहितकारिणी असि। शंकयापित्वहितकारिणीत्वं तथापित्वं तत्वेन मीज्ञानासीत्यतआह हनामतामाशिहित्वेनमयाज्ञाताऽसि। मतासिमता छे
तिपाठे अशेत्व कृष्णमतपरिच्छेदनकर्तृत्वं मतमसिमतयस्यास्तथापरिच्छेदकर्तृत्वं इत्यर्थः। नवमशोकमशोकपुष्पमशोकं शोकाभावप्रदत्वात्कंना
नवमशोकमशोकमशोकं हे रभिता रभिताल्लिरालम्॥ सखीं समाश्रय माश्रमाश्रय कमलिनी मलिनी यद्वा गतः॥१२
सखि हिता सिहिता सिमता त्थमानवमशोकमशोकमशोकं हे॥ तद्दिमामवमामवमामभीवज्जलिनिवनीरदनीरदम्॥१३॥ रम

विद्यतशोको यत्र आविचारणी धर्मिति मामा कृष्णवीषिकाधा किंनेवंवशोष्यतएवत्वमसिमताऽसिवत्वयकृवद्विसकत्वेनमता धिरोहीवकत्वे
नशोकदमशोकमशोकदमिति चंद्रया लपवकृवद्विसकत्वमिति भावः। तोहस्मिन्विषये मामवक्षऽमानाग्रहित्यतिशेषः। लघिज्ञ अवग
तोमाचलक्ष्मीश्रावमा ■ ना या अममामममतिलंबधृत्यता। आकिंचनामलिनामिति जीवना कीदृशीं। नयोनीरंजलंदधातिता दृशायोनीरसम
वस्लमासजेलजलदनीलमित्यर्थः। अन्येकृसवित्वेहिता सिकीदृशीमता मान्या। पुनः कीदृशी। आसिमाती। आसिवत्वकृवन्मतंयस्यास्तथा यतः शोक
शोकरहितमाथवुबोधि। पूर्वश्लोके शोकंश्रयेणुक्तः। कीदृशी। अशोकदामस्यविशेषः शोकं ददातिस्वामनदृत्यर्थात्तातथा शोकदशोकाश्रयेणावन्यत्वेन
तवासिमतत्वंस्पष्टमिति भावः। तदामिसत्वुहेत्वयु कः कामतंजिहीनेगतेहस्तकामप्राय कमित्यर्थः। ताहशीहीविजऽस्वमाहश्याजी। धिमामवयाही
कीदृशी। अमानविद्यतेमाशोभायस्यास्तथाभूतां। कीदृशीहरिनधानीनीरदानांमेघानांनितंशोभांदतीप्राप्तिसतवनीरदजमिषयप्रामामिषयंदतेया
चक्षणे॥१५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किंमुवाचेत्याह॥ मलयजमिति॥ हे हे तन्वसहचरी सखी एषा तनो श्रीः उनुः स्वल्पे मलयजं चन्दनं नेत्रे निषेधयति। नलिनीतन्वाम्नी सीयो नलिनी दलं तनुते मुनय
ना अत्यर्थनाम्नी सखी उनलं संलापं घातिवंदयति ताहृन्नलदं उशीरं तनुते तादृपिनयं पिसासी दति हृपिलाभवति वधुना वधुसमूहे सम्मदा श्रेसी दति।
दृष्टा पुनः किमुवाचेत्याह॥ ॥समुदितइति॥ हे वरदे लक्ष्मीलक्ष्याः वरलक्ष्मीकांतासाधाहिमकरे समुदिते सति उक्षणे नयने उमुदिते उत्फुल्ले
तियावत् एनिजाश्रोनि। कीदृशी अमुदिता अप्रहृष्टा धात्रा अर्थे चक्रुत्यपरं पिकवेकोकिलाश्चेन समुदिते सातनकरे मकरे अमुदिते इति। अ
गुल्पादिनापि दधातीति भावः। कीदृशे हिमकरे मकरश्रेनी कर्कराशेन स्य मकरस्य मिनो मकरध्वजस्य कारके इत्यर्थः। तस्यापि जलवृद्धिकारक इत्यर्थः। की
दृशी अवस्था अवत्रा हितिरवः लेयं यस्याः सा तथा। पुनः कीदृशी हरिणलांछनश्चन्द्रस्तस्य लांछनं पादुत्वं तत्कथनं चिह्नं यस्या सा हरिणलांछना इत्यर्थः।
यद्वा हरिणलांछनं चंद्रलांछनं यस्य तादृशः शिवः लांछनं यस्याः सा तथा। सर्वदा हि। यद्वा कमलाणमीनस्य यारे नार्थस्य किं इत्यवज्ञातिश्चोदृत्ते सा तथा

इतिसाधीगदितागदिता हिलानयनएमवरायवरायवा॥ इतिगिरं कलपा कलपा कलापदुगिरं मिदुतामृदुतादिना॥१४॥
मलयजं तनुते तनुते तनौ सहचरी नलिनी नलिनी दलं॥ मुनयना नलदं नलदं च सा तदपि सी दति सी दति वंधुना॥१५॥
समुदिते मुदिते मुदिते क्षणे हिमकरे मकरे नकरे नकरे॥ पिकवेवरवेवेति सो हरिणलांछनलांछना॥१६॥ रामः

वक्रोक्तिवाद्रिनीत्यर्थः॥ पुनः किमुवाचेत्याह॥ ॥नपरुतइति॥ हे अयोगरुत। अयसे लोहं प्रागः पर्वतस्तद्रूपं यस्या सा तथा तस्या संबो
धने हे लोहपर्वतइति कठोरः कर्णतेतयसहसखी सहचरी तथा वियोगविरहं वेर्गरुडस्य योगं अन्यत्रगमनसाधनाभूतमितिवन सहते किं
नु अयोगमस्यतवविरहार्यगंनविद्यते योगो यस्मादित्ययोगः। अत्यंतयोगस्तवासहते। असहेति संबोधनं वा हे असहतत्वं मे कलहासहिष्णो।
वियोगं वियोगमिति पाठे वेर्गरुडस्य योगे यस्य सतथा। तस्य संबोधने हे गरुडवाहना अयं गरुत अयोगं वियोगं हरतितत अयोगरुत। नाहं शक्ता
इतिव्याख्येयं। अत्रत्वभाषानोत्यध्याहार्यते या च भाषा न तातरुणी सपदि किरतत्यजन्। यत्रान्यस्यामभिरमसे तां परिहरतित्यर्थः। मरुणी किर
नुनामइतिनिश्चयेनतवनी विजनतनी वीजातं वर्त्तमानं मिति यावत्। सखी मणी किरतनयनी विमाक्षविद्यात्वित्यर्थः। कीदृशं मणिनेव अप
यावदभक्तमुपारक्षा॥ अथेति॥ अथेत्यनंतरं वनजानां जलजानां दामपंक्तिस्तस्या जातं पद्मदामजालातज्जायादृष्टत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाहरिलयाकलयातन्नाम्यासस्वासहसुभांकुरीएधांप्रतिथ्रमाचे। कीदृशया। कलया कलयंकुरंलातिसाकलातयाकलया
विशेषेणकांत्याउपलक्षितया। सारघांतश्रागात्तमगः पर्वतगिरिवर्धनः पश्चात्तोयेनतेनथा अतिवृद्धोः अतिवृद्धिप्रियालासनसोम्यं चयक्तांक्रं येछ
ज्ञेनपोः स्थितप्राप्तिनिश्चयः। मन्प्रीतिः प्रमदोहपश्चत्पमाः। कीदृशांनवतीवं अतिसोम्यप्रेमकलहजकोपाधनयेनतप्रेमागेनचत्यक्तांक्रमा वामित्य
र्थः॥१७॥

नसहतेसहतेसहतेसखीनवियोगमयोमयोगहत्॥सपदिलातरुणीसरणीमणीकिंतुनामवयंनवनीविजम्॥१७॥राम॥
रामचन्द्रकविनाकविनाहःपुरुत्तमसुतेनसुतेन॥राधिकाहृदयशोकदमासीद्राधिकाहृदयशोकदमारात्॥१८॥राम॥
अथतयाकलयाकलयाशुभांवनदेशेमजदामजद्दिष्टिमान्॥तीरगात्तमगात्तमगाच्चसाहृदमनीवुमनीवुदिशोदितमा

रामचंद्रेति॥राधिकायाःहृदयशोकप्रातिवेश्यलिलतहृदा अहःकाव्यंकविनापेरितेनरामचंद्रकविनाआसीत्तेनकृतामित्यर्थः। को
दृशेनपुरुषोत्तमसुतोजनार्दनस्तस्यसुतःश्रेष्ठःप्रेष्ठोमित्यर्थः। श्रारात्समीपेश्रुतमात्रमितिभावः। राधिकाहृदयेयस्यसतथाशोकस्यइतियावत्
।तत्रयःशोकलहप्राप्तिनिषेधनंदुःखंतत्प्रातिवेश्यतितत्तथाहृदम्॥१८॥कदेयसमाप्यत्वपीडितश्रीशिशोमणोः।तनयस्यनिदेशेनभट्टनारायणो
भुधः॥२०॥रामाविनोदकाव्यस्यव्याख्यानेस्वधियाव्यधात्।पोपकाःशोधयन्तुतत्पदत्॥१२॥रामकृष्णरामकृष्ण॥ ॥छ॥ ॥रामा॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

8753

दुर्गा

श्रीगणेशायनमः॥ छन्दसांलक्षणंयेनश्रुतमात्रेणबुध्यते॥ तत्रहंसंप्रवक्ष्यामिश्रुतबोधम
विस्तरात्॥ संयुक्ताद्यंदीर्घ-सानुस्वारंविसर्गसंमिश्रं॥ विज्ञेयमक्षरंगुरु पादान्तस्थंविक
ल्पेन॥ यस्याः पादेप्रथमेद्वादशमात्रास्तथातृतीयेपि॥ अष्टादशद्वितीये-चतुर्थकेपञ्च
दशसार्य्या॥ आर्य्योत्तरार्द्धतुल्यं-प्रथमार्द्धमपिप्रयुक्तंचेत्॥ कामिनितामुपगीतिं-प्रका
शयन्तेमहाकवयः॥ आर्य्यापूर्वार्द्धसमंद्वितीयमपिभवतिहंसचारुगते॥ छन्दोविदस्त
दानीगीतिंतामसृतवाणीभाषन्ते॥ आद्यचतुर्थपंचमकंचेत्पत्रगुरुस्यात्साक्षरपंक्तिः
॥ अगुरुचतुष्कं-भवतिगुरुद्वौघनकुचयुग्मेशशिवदनाया॥ श्लोकेषष्ठंगुरुज्ञेयंसर्वत्र
लघुपञ्चमं॥ द्विचतुः पादयोर्ह्रस्वं-सप्तमंदीर्घमन्ययोः॥ आदिगतंतुर्य्यगतं-पञ्चमकं
चान्त्यगतं॥ स्याद्गुरुचेत्तत्कथितं-मानवकक्रीडमिदं॥ द्वितुर्य्यषष्ठमष्टमं-गुरुप्रयोजितंय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दा॥ तदानिवेदयन्तिनां बुधानगद्यरूपिणी॥ सर्वेवर्णादीर्घायस्यां विश्रामस्याद्वेदैर्द्वेदे॥ वि
द्वहृन्देर्द्वीणवाणिव्याख्यातासविद्युन्माला॥ तन्विगुरुस्यादायत्रचतुर्थपञ्चमषष्ठंचान्तर्मुपा
न्त्यं॥ इद्रियवाणैर्यत्रविरामः साकथनीयाचम्पकमाला॥ चम्पकमालायत्रभवेदन्त्यविहि
नाप्रमजिघे॥ छन्दसिदक्षायेकवयस्तन्मणिमयतेकुर्वन्तो॥ मन्दाक्रान्तान्त्ययनिरहितासाल
क्षारोभवतीयदिसा॥ तिहिहिर्द्वैरवमभिहिताहंसीकमलवदने॥ क्रिस्वोवर्णेजायते
यत्रषष्ठः कम्बुग्रीवेनहदेवाष्टमान्त्यः॥ विश्रामस्यान्नन्विवेदैस्तुरगैस्त्रांभाषन्तेस्रग्धरा छन्द
सीयाः॥ श्रायचतुर्थमहिनतिस्तु सप्तमकंदशमंचतथान्त्यं॥ यत्रगुरुप्रकटस्मरसारस
स्यात्तत्कथितंननुदोधकमेतत्॥ यस्यात्रिषट्सप्तमपञ्चमस्याद्रुस्वंसुजंघेनवमंचनद्वत्॥
गत्याविलक्षीकृतहंसकान्तेतामिन्द्रवज्रांकुरुतेकवीन्द्राः॥ यदीन्द्रवज्राचरणेषुपूर्वा-म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चंत्रिवर्णालघवः सुवर्णे॥ अमन्दमाद्यन्मदनेनदानी सुपेंद्रवज्राकथितःकवीन्द्रैः॥ यत्रत्रयोर
प्यनयोस्तु पादा भवन्तिसीमन्तिनिचेद्रकान्ते॥ विद्वद्भिराद्यैः परिकीर्त्तितासा प्रयुज्यतामित्यु
पजातिरेषा[२] आख्यानिकायान्प्रकटीकृतार्थे यदीन्द्रवज्राचरणैः पुरस्तात्॥ उपेन्द्रवज्राच
रणात्रयोन्ये मनीषिणोक्ता विपरीतपूर्वा॥ आद्यमक्षरमनद्धतीयकं सप्तमं चनवमं दशान्ति
मं॥ दीर्घमिन्द्रसुखियत्रजायते तावदन्तिकवयोरथोद्धता॥ अक्षरं चनवमं दशमं चद्वा तया
द्भवतियत्रविनीते॥ प्राक्तनैः सुनयनैयदिसेवा सागतेतिकथिताकविभिः साम्यैसद्धतीयकष
ष्ठमंनगरते नवमं विरतिप्रभवंगुरुचेत्॥ घनपीनवयोधनभारनतेनतुतोटकवृत्तमिदं
कथितं॥ यदाद्यं चतुर्थं तथासप्तमं चे त्तथैवाक्षरं ह्रस्वमेकादशाद्यं॥ शरचंद्रविद्धेषिवक्रा
रविन्दे तद्वृत्तकं कविन्द्रैर्भुजङ्गप्रयातं॥ अयिकृशोदरियत्रचतुर्थकं गुरुचसप्तमकं दशमं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा॥ विरतियंचनशेवविचक्षणैर्ङ्गनविलम्बितमित्युपदिश्यते॥ प्रथमाक्षरमाद्यतृतीययोर्ङ्ग
नविलम्बितकस्यचपादयो॥ यदिनात्रनदाकमलेक्षणे॥ भवतिसुन्दरिसाहरिणस्तुतौ॥ उपेंद्र
वज्राचरणोपसन्निचे॥ उपान्त्यवर्णालघवःपुराकृताः॥ मदालसङ्गजितकामकार्मुके॥ वद
न्तिवंशस्थमिदंबुधास्तदा॥ यस्यामशोकांकुरपाणिपल्लवे॥ वंशस्थपादाद्युरुपूर्ववर्णकाः
नारण्यदोलारतिरंगलालसे॥ तामिन्द्रवंशांकवयःप्रचक्षते॥ यस्यांप्रियेप्रथमकमक्षरद्व
यं॥ तुर्यंतथाप्युरुनवमंदशान्तिमं॥ सान्त्यश्चवर्णनिरपितशुगत्रहैः॥ सालक्षितामृतलति
केप्रभावतीरौ॥ आद्यंचेत्रितयमथाष्टमंनवान्त्यं॥ भावन्तोगुरुविरतौसुभाषितेस्यात्॥ वि
श्रामोभवतिमहेशनेत्रदिग्भिः॥ विज्ञेयानतुसुदतिप्रहर्षिणीसा॥ आद्यंद्वितीयमपिचेद्गुरुत
चतुर्थं॥ यत्राष्टमंदशमकान्त्यमुपान्त्यमन्त्य॥ कामस्कुशेर्वविजितकामनङ्गजेद्धे॥ कान्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वसन्ततिलकं किल तद्वदन्ति॥ प्रथमसप्तकषट्कं विद्यते यत्र कान्ते· तदनु च दशमं चेदक्षरं
द्वादशान्त्यं॥ गिरिमिरथ तुरंगैर्यत्र कान्ते विरामः सुकविजनमनोज्ञा मालिनी साप्रसिद्धा॥ सु
मुखि लघवः पञ्च प्राग्यास्ततो दशमान्तिमः स्तदनु ललिता लापैर्वर्णैर्यदि त्रिचतुर्दशैः॥ भ
वति च पुनर्यत्रोपान्त्यः स्फुरन्नकरकंकणैर्यतिरपि रसैर्वेदैरश्वैः स्मृता हरिणीति सा॥ यदि प्रा
ग्रोक्तस्वः कलितकमलैर्षड्भिरपरा· स्ततो वर्णाः पञ्च प्रकृतिसुकुमारांगिरचिताः॥ त्रयोऽन्ये
चोपान्त्याः स्तनजघनभोगातिसुभगैरसैरी· शैर्यस्यां भवति विरतिः सा शिखरिणी॥ द्वितीयम
लिकुन्तलैर्यदि षडङ्कमंद्वादशो· चतुर्दशमथ प्रियैर्गुरुगभीरनाभीह्रदैः॥ स पञ्चदशमान्त
ज· तदनु यत्र कान्तैर्यति· गिरीन्द्रफणभृत्कुलैर्भवति सुभ्रु पृथ्वीति सा॥ चत्वारः प्राक्तु
सुविग्रहो द्वादशैकादशौ चे· त्प्रथमवर्णौ तदनु क्रमुमामोदिनि द्वादशान्तौ॥ तत्र प्रान्तौ सुगर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सहयैर्यत्रकान्तेविरामो·मन्दाक्रान्तांप्रवरकवयस्तन्वितंसंगिरन्तो॥आद्याश्चेद्गुरवस्त्रयःप्रियतमे
षष्ठस्तथाचाष्टमस्तत्त्वेकादशतत्त्रयस्तदनुवेदद्वादशौयोनतः॥मार्त्तण्डैर्मुणिभिश्चयत्रविरतिः
पूर्णेन्दुबिम्बानने·तद्वृत्तंप्रवदन्तिकाथरसिकाःशार्दूलविक्रीडितौचत्वारोयत्रवर्णाःप्रथम
मलघवःषष्ठकःसप्तमोपिह्यौतद्वत्षोडशाद्यौमृगमदतिलकेषोडशान्त्यौतथान्त्यौ॥रम्भातं
भोरुकान्तेमुनिमुनिमुनिभिर्द्वादशेचेद्विरामो·वालेवन्द्यैःकवीन्द्रैःसुतनुनिगदितास्रग्धरासा
प्रसिद्धा॥३९॥इतिश्रुतबोधेछन्दोलक्षणं॥ ॥ ॥ ॥

दुर्गा१तूर्ध्वंकनागमहिमासमधुत्रपर्वं॥छन्दसिध्वांतिपिसमांप
वासरंतथाम॥ज्ञेयंवर्णोकिलविदांभ्रमरांससारांकोवात्रभेदवर
छन्दविदःसुदक्षाः॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उद्दंचदिति। अमी गंगाः। गंगासंबंधिनस्तरंगाः। पुनर्भवंतीति पुनर्भवंतस्तेषां। पुनः पुनः संसारेऽस्यमानानां। जन्मदारी
नामिति शेषः। इतितमरभंगायऽस्तुतसमूहनाशायभवन्तु। तादर्थ्येचतुर्थीः किंलक्षणाः। भोजुंगाः उन्नताः। पुनः किल
उद्दंचतीति उद्दंचत्सर्वांगीसांयत्मात्सर्यमत्सरस्यभावोमात्सर्यं यत्रोत्कर्षासहनंमत्सरः। अत्रपार्वतीगंगारूपात
त्याऽत्कर्षोमहतांपत्युः शिरोधिरोहणरूपः तिनस्कृष्टंवाहीकंयत्कपटेनपुत्रापाहेरंवजननीपार्वतीं तस्याः कटाक्षा

उद्दंचन्मात्सर्य्यस्फुटकपटहेरंबजननीकटाक्षव्याक्षेपक्षणजनितसंक्षोभनिवहाः भवन्तु
त्वर्प्यन्तोहरशिरसिगंगाः पुनरमीतरंगाः भोजुंगाऽरितभरभंगायभवताम् ४ ४

इर्ष्ययावलोकितानितेषांव्याक्षेपेणव्याक्षिप्त्याजनितः जातः क्षणांक्षणमात्रंसंक्षोभनिवहः उद्वेजनसमूहोयेषां अत
एवः रहस्यमहादेवस्यशिरसित्वर्यंतः त्वायागच्छन्तः। एतावतायस्यपुरुषस्यगृहिणीद्वयंतिष्ठति। तयोरनपत्या
नप्रेयस्कीतिलोकेप्रसिद्धिः। महादेवस्यगृहेरंबस्यसकलविघ्नाद्वीहवानलस्य। जननीमाता। एतादृशीपार्व
ती। वामांगेधारयति त्वांचपुनरुत्तमांगेधारयामास। अतस्त्वदीयरूपशीलपरोपकारादिगुणसंपत्त्या महादेवोपि त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मरुल्लीलेति तेन च जंघालं वेगवन्तं अथवा जंघानं जंघापरिमितम् आदन्तेभ्योलक्षिप्यतइति वचनात् क्वचित् परिमाणेपि लवसंभव
ति। उदाहरणं तु स्वधियो यं सुधीभिः। जंघापरिमितजलस्य भावात् आदिस्नानयोग्यत्वात्। जलं मम जननजालं जल्पतु शिथिलयतु।
जननानां जन्मनाम्। जनुर्जननजन्मानीत्यमरः। जालं कर्मरूपमानायः। आनायः पुंसि जालं स्यात्स्त्रियमरः। उक्तं च। स्वकर्मसूत्रग
थितो हि लोकः। अथवा जननानां जालं तमूहं च तुरशीतिलक्षयोनिरूपं जालं जालं समूहश्चानायइत्यमरः। किं लक्षणम् जलं

मरुल्लीलालोलस्वरहरिनुलिनांभोजपटलस्खलत्पांशुप्रातक्षुरणविसरत्कौंकुमरुचिः
उरस्त्रीवक्षोजक्षरदगरुजंबालजटिलं जलं जंघालं मम जननजालं जरयतु ५

उरस्त्रीणां दिव्यांगनानां वक्षोजाः स्तनास्तेभ्यः क्षरन्तयोऽगरुः कृष्णागरुः। तस्य जंबालः पंकस्तेन जटिलं मिश्रितम् पुनः किं०
मरुतां पवनानां नीलामन्दं मंदं वहनम् तेन लोलन्यश्चपलाः या लहर्यस्ताभिः। नुलितानि कंपितानि भंभोजपटलानि क
मलसमूहास्तेभ्यः स्खलन् अधःपतन्त्यः पांशवः रजःसमूहः। पांशुर्नाजहयोरजइत्यमरः। तस्य क्षुरणं मेलनं तेन विल
सन्विनसनशीलं। विसरिति पाठे विसरणशीलं तेन कौंकुमरुचिः कुंकुमस्य केशरस्येयं कौंकुमी रुचिर्यस्य तत् केशरतु
ल्यकान्तिः। एतेन कमलपरागसम्पर्कितं जलम्। घ्राणेंद्रियाह्लादकत्वं वर्णितं सूचितम् ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्फुरदिति दिव्यसरितः दिविभवाः दिव्याः तेषां सरिन्नदी दिव्यपदं सरितो विशेषणं। तस्या दिव्यसरितः स्वर्नद्याः। महउच्छ्वासलहरी
छटाचंचत्पाथः कणसरणयः महतामुच्छ्वासउच्छ्वसनम्। तेन लहरीछटाभिः। चंचत्चंचलं पत्पाथः उदकं। कबंधमुदकं पाथइ
त्यमरः। तस्य कणाः शीकराः। शीकरांबुकणाः स्मृताइत्यमरः। तेषां सरणयः पंक्तयः। प्रतिदिनं प्रत्यहम्। नोत्सारकं। कमपि वचना
गोचरं संतापं संज्वरम्। संतापः संज्वरः समावित्यमरः। आध्यात्मिकाधिदैविकाधिभौतिकरूपं। जातित्वादेकवचनं अतएवोक्तं

स्फुरत्कामक्रोधप्रबलरससंजातजटिलज्वरज्वालाजालज्वलितवपुषान्नः प्रतिदिनं
हरन्तां संतापं कमपि महउच्छ्वासलहरीछटाचंचत्पाथः कणसरणयो दिव्यसरितः ६

तापत्रयावारकमौषधमद्वितीयं गांगं पयो भवहरं भजहे मुमुक्षोइति। हरंतां हरीकुर्वंतु। किंलक्षणानान्नः। स्फुरत् भजपायोयः
कामोभिलाषः। इदं मे भूयादिदं मया लब्धमिदं न स्यादित्याकारः। कामः स्मरः भिलाषे च कामं रेतोनिवासयोः। भव्यं यत्वाभ्य
ज्ञातानिविविधः। तस्माद्यः क्रोधः परकृतापमानादिजन्यः। अत्र पंचमीतत्पुरुषेण। कामक्रोधयोर्जनकजन्यत्वं संभवति॥
अतएवोक्तं गीतायां संगात्संजायते कामः कामात् क्रोधोभिजायतइति तस्य प्रबलो तिबलो योरसः द्रवः रसः स्यात्पारदे
शृंगारादौ वीर्ये द्रवे जले इति धरणिः। एवं च स्वल्पस्यापि द्रवीभूतद्रव्यस्य सर्वांगप्रसारित्वमनुभवसिद्धं। तेन संजातः स
म्यक्क्रयोत्पन्नः जटिलजटायुक्तः। जटिलापिप्पलीमांस्योर्जटायुक्तेनुगाच्यवदिति मेदिनीसचासौ ज्वालाजालाग्निलस्यना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लानांशिखानम्। वह्नेर्द्वयोज्वालकीलावर्चिर्हितिः शिखाभिर्यामित्यमरः। जालंसमूहलेनज्वलितंदग्धंवपुःशरीरंयेषान्तेषामित्यर्थः॥ ६॥ विनिघ्नानीति। उन्मत्तैरपिः उत्पथगामिभिरपिविनिघ्नानिविशेषेणगर्घाणिपिहृहननादीनि। स्याउन्मत्तलुब्धकूरेतथाचोत्पथगामीनिरभसः। चपलः। पतितैरपिपरिहार्याणि। परितआसमंतात्हर्जुत्पेक्षुयोग्यानि। ब्रह्महननादीनि। आप्तैश्चशालविशेषैरपि। अवाच्यानि अगम्यागमनादीनि। सपुलकंसरोमांचयथास्यात्तथापिशुनैः कर्णेजपैः

विनिघ्नान्युन्मत्तैरपिचपरिहार्याणिपतितैरवाच्यानिआप्तैः सपुलकमपास्यानिपिशुनैः हरं
नीलोकानामनवरतमेनांसिकियतांकदापिभ्रांतानत्वमिवजननीत्वंविजयसे ७

अपास्यानि आपालंक्षिप्तुंयोग्यानि। त्वमाहुरारसंकथनादीनि। एतादृशानिकियतांकतिपयानांलोकानांजनानांएनांसिहृजिनानिकलुषंदुरितंनोघमघंदुरितंदुष्कृतमित्यमरः। अनवरतमजस्रंनित्यंसंवताजस्रमित्यमरः। हरंतीनाशयंतीत्वं कदापिकस्मिंश्चित्कालेपिनभ्रान्तानविन्ना। अतःकारणात्हेजननि। त्वमिवत्वंविजयसे सर्वोत्कर्षेणवर्त्तसे। अत्रयद्यपिनत्वमुपमानंस्यात्तदात्वमुपमेयास्यादतस्त्वमुपमात्वमेव। अत्रानन्वयालंकारः। तदुक्तंचंद्रालोके। उपमानोपमेयत्वंयदेकस्यैववस्तुनः। चंद्रश्चंद्रइवाभातिइतिलक्षणात् ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्खलंतीति। भये इति कोमलामंत्रणे। भये जननि। स्वर्लोकात्त्रिदिवात्स्खलंती निपतंती त्वं। किमर्थमित्यपेक्षायामाह। भ
वनितलशोकापहृतये। भवनेर्भूमेर्यत्तलं अधः। तलश्चपेटे तालतोतलोऽस्त्री घातवारणे। स्त्रीस्वभावाधरयोस्तलं स्त्री घातेच
सव्यतः इति मेदिनी। भवावनितलशब्देन भवाः क्रोशन्तीति वत्तलक्षणया भवनितलस्थामनुष्यालक्ष्यते। शोकोमानसो

स्खलन्ती स्वर्लोकादवनितलशोकापहृतये जगन्मृत्युग्रंथौ यदसि विनिवद्धा पुरभिदा भये
निर्लोभानामपि मनसि लोभं जनयतां गुणानामेवायं तव जननि दोषः परिणतः ८

धर्मः। शोकमोहौ तु मानसाविति वचनात्। तस्यापहृतये नाशाय। एतेन तस्याः पतेः पुरकारित्वं सूचितं यत् यस्मात्कारणा
त्। पुरभिदा त्रिपुरारिणा। जगन्मृत्युग्रन्थौ कपर्दस्य जगन्मृत्युरित्यमरः। निवद्धा निर्मिता। अतः कारणा
त्तव गुणानां किंलक्षणानां निर्लोभानामनुद्धानामपि। मनसि लोभं जनयतां उत्पादयतां। भयमेव परिणतः परिपक्व
दोषः इति व्याजनिन्दा ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गं·ल·टी
५

स्वभावेति। हे मातः। ते तव। अपांजलानां किंलक्षणानां। स्वभावस्वच्छानाच्चिसर्गनिर्मलानां। पुनः किं। जहजशिशिराणां स्वाभाविकशीतलानां। अयंसन्निकृष्टवर्ती कोपि अनिर्वचनीयः महिमा जगति विश्वमिव जयति सर्वोत्कर्षेण वर्त्तते। किंलक्षणः अपारः। न पारोऽन्तो यस्य सः अपारः। अनन्त इत्यर्थः। अपारत्वे हेतुमाह। यं महिमानमद्यापि दानीमपि सुरहर्षेणा सुरत्रीतिप्रमहोहर्षः इत्यमरः। सुतलं सुरलोकं सुरलोको द्यौर्दिवौ द्वे स्त्रियामित्यमरः। सगरजाः सगरान्नृपविशेषाजा

॥ ॥ स्वभावस्वच्छानां सहजशिशिराणामपामपारस्ते मातर्जयति महिमा कोपि जगति
सहायं गायंती सुतलमनवद्यद्युतिभृतः समासाद्याद्यापि स्फुटपुलकसांद्राः सगरजाः ९

नाः सगरजाः सगरपुत्राः। आसाद्याप्य। किंलक्षणाः। अनवद्यद्युतिभृतः निर्मलकांतिधारिणः। पुनः किं· स्फुटपुलकसांद्राः सन्तः सहानिरन्तरं गायंति गानं कुर्वन्ति। स्फुटे बहिर्गतोयः पुलकोरोमांचः। पुलकः क्लमिभेदे स्यादुल्वर्षमणिरोषयोः॥ गजान्नपिण्डेरोमांचे इति विश्वः। तिनसाद्राः आद्यनाः प्रेमपरिपूर्णा इत्यर्थः। त्वदीयजलसंपर्कसंक्षालितसकलाघौघाः षष्टिसहस्रं सगान्मजादिव्यदेहधारिणः एतावत्कालपर्यन्तमपि हृष्टाः सन्तः स्वर्गे त्वदीयं निर्वचनीय

महिमानं गायंतीति भावः॥ ९ ॥

378

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृतक्षुद्रेति। त्रिभुवनतले ब्रह्माण्डोदरे तीर्थनिवहाः तीर्थसमूहाः। कृतक्षुद्राघौघाः कृतः क्षुद्रः स्वल्पो भाघौघो येषां तानाश्र
थनत्कारणानन्तरं। झटिति शीघ्रं शाकृष्टिर्यमसाक्षाय इत्यमरः। संतप्तमनो येषां तान्। पश्चात्तापे भवेद्दुर्मिति वचना
त्पापं कृत्वा पश्चादनुतापं कुर्वाणानित्यर्थः। एतादृशानजनान्। समुद्धर्तुं पापाद्धारकर्तुं संति भवन्ति। अपि निश्चये

कृतक्षुद्राघौघानथ झटिति संतप्तमनसः समुद्धर्तुं संति त्रिभुवनतले तीर्थनिवहाः अपि
प्रायश्चित्तप्रसरणपथातीतचरितान्नरान्दूरीकर्तुं जगति खलु जागर्ति भवती १०

न। प्रायश्चित्तप्रसरणपथातीतचरितान् प्रायश्चित्तं कृच्छ्रादि। तस्य प्रसरणं विधिस्तस्य पंथा इति प्रायश्चित्तप्रस
रणपथः। तस्मादतीतमतिक्रान्तं चरितमाचरणं येषां तान्। प्रायश्चित्तविधानशून्यकृतकर्मणा इत्यर्थः। नरान्मनु
ष्यान्दूरीकर्तुं संगीकर्तुं जगति विश्वे खलु निश्चये न भवती जागर्ति विनिद्राति। येषां क्वचिदपि उद्धारो न जायते
तेषां उद्धारस्त्वदधीन इति भावः १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जडानिति हे अंब। जडान् मूर्खान्। जडेमूर्खे हिमजलेभूकशिष्यांजडमतेतिविश्वः। विवेकरहितान्। अतएवोक्तं। आहार
निद्राभयमैथुनानिचत्वारिचिह्नानिवसन्तिदेहे। एकोविवेकोप्यधिकोमतो मेतेनैवहीनः पशुभिःसमानइति। मूर्खत्वा
पिशास्त्रप्रसिद्धपशुत्वम्। अथवाजडानचेतनान्वृक्षादीन्। अन्धान्नेत्रहीनान्। अथवा। अन्धयतीत्यंधमज्ञानंतद्लेषा
मितिमत्वर्थीयोऽच्। ज्ञानहीनान्। पंगून्पादरहितान्। प्रकृतिवधिरान्। प्रकृत्याचभावेनवधिरान्। उक्तिविकलान्॥

जडानंधान्पंगून्प्रकृतिवधिरानुक्तिविकलान्ग्रहग्लानान्लाविलदुरितनिलारसरणीन्
निलिंपैर्निर्मुक्तानपिचनिरयांतर्निपतितान्नमानंवत्रातुंत्वमिहपरमंभेषजमसि ११

उक्तोव्याहारेविकलालान्। व्याहारउक्तिर्लपितमित्यमरः। ग्रहैःरव्यादिभिः। ग्लानान्पीडितान्। अलाविलदुरितनिलारस
रणीन्। अविलसमूहंयत्दुरितंअविलदुरितं। तस्यनिलारःनारणम्। तस्यसरणिपंक्तिः। अलाअविलदुरितस्यनिला
रसरणिर्येषांतान्निलिंपैर्देवैः। शोभानिलिंपाद्यघरः स्वर्गिणश्चनभःसदइतिविकाण्डशेषः। निर्मुक्तान्त्यक्तान्।
अपिचपरान्निरयान्नरकानिपतितंनिरयस्यनरकस्यमध्यम्। तत्रनिपतितंनिमज्जतः। अन्तर्मध्येतथाप्राप्ते
स्वीकारेपिचइत्यमरइतिविश्वः। एतद्विशिष्टान्नरान्। त्रातुंपालयितुं इहसंसारेपरमंपराशक्तिर्यस्यतत्परमंस

मर्थंभेषजमौषधत्वमसिभवसि ११

Nepal Sanskrit University, Balmooki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निधानमिति। हे गंगे नववपुः। नोऽस्माकं तापं हरतु दूरीकरोतु। किं लक्षणम्। धर्माणां दयाणां निधानं शेवधिः। निधी
यते अस्मिन्निधिर्निधानम्। अधिकरणे ल्युट्। धर्मालयमिति यावत्। च पुनः नवमुदां नवाभ्यूर्वमुदस्तासां अपूर्वहर्षा
णां किमपि अनिर्वाच्यं विधानं कारणम्। तीर्थानां पुष्करादीनाम्। प्रधानं अग्रगण्यं प्रधानमग्रगण्ये पुंस्यमात्ये प्र
कृतौ स्त्रियामिति चामरः। पुनः त्रिजगतः त्रैलोक्यस्य। अमलपरिधानं परिधीयतेऽनेन परिधानं वस्त्रं। अमलं निर्दोषं च

निधानं धर्माणां किमपि च विधानं नवमुदां प्रधानं तीर्थानामिमलपरिधानं त्रिजगतः समा
धानं बुद्धेरथ खलु निरोधानमधियां श्रियामाधानं नः परिहरतु तापं नववपुः ७२

नतपरिधानं चेति। समस्तजगद्विषयकपापावरकमित्यर्थः। अत्रामलत्वं परिधीयमानं सतः परिधातुः सकलमंगलदायकं भूत्वा
क्षीणोऽपि पेमर्त्यलोके विशतीति दोषरहितत्वं परिधाने बोद्धव्यम्। अयमाशयः। गमागममलवाजीतत्वदीयजलरूपव
स्त्रप्राहतानान्नभूयोऽन्यत्परिधानमवशिष्यत इति। पुनः किं बुद्धेज्ञानस्य। समाधानं समाधायकं। यत्प्राप्य बुद्धेः समा
धानं जायत इत्यर्थः। अथानन्तरं खलु वाक्यभूषायां। खलु स्याद्वाक्यभूषायां जिज्ञासादौ च सत्यत इति विश्वः। अधियां न
धीर्येषां तेषां प्रज्ञाहीनानां। निरोधानं दोषातङ्कायकं। पुनः किं श्रियां त्रिवर्गसम्पत्तीनां आधानं आधायकं श्रीर्वैजयन्ती

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शोभाभारतीसरलडवे। लक्ष्म्यांत्रिवर्गसम्पत्तौवेषोपकरणेमतेतिविश्वः॥ १२॥ इदमिति। हेजननि। तवजलानां समूहसंघा
तःप्रवाहः। नोस्माकं। पापंदुष्कृतंहरतुहरीकरोतु। किंलक्षणः श्रीकण्ठस्यनीलकण्ठस्य। अप्रतिहतोः परिमितो येजटाजूट
केशसमूहः। तेनजटिलोमिश्रितः। पुनः किं। यस्यसंघातस्यतरंगैरूर्मिभिः। हीतिनिश्चयेन। सकलभुवनाभोगभवनंसक
लानांसमस्तानांभुवनानांलोकानांचतुर्दशानामितियावत्। आभोगः परिपूर्णता। आभोगोवरणाछत्रे पूर्णतापत्नयो

इदंहिब्रह्माण्डंसकलभवनाभोगभवनंतरंगैर्यस्यांतर्लुठतिपरितोलिंडुकमिव सस्य
श्रीकण्ठाप्रतिहतजटाजूटजटिलोजलानांसंघातस्तवजननिपापंहरतुनः १३

380

रपीतिविश्वः। तस्यभवनवासाः। भावासोवसथंगृहंचभवनमितिहलायुधः। इदंब्रह्माण्डंपरितःभासमंतात्। अन्त
र्मध्येतिंडुकमिवतिंडुकफलमिव। लुठतिइतस्ततःप्रसरति। अयमभिप्रायः। कल्पान्तेविकीर्णमहादेवजटाजूटनिर्गतत्व
दीयजलसंघातप्लावितमेतद्ब्रह्माण्डंतिंडुकवत्प्रतिभाति। एतेनेतदीयप्रवाहस्यब्रह्माण्डतिरोभावकारणत्वेसूचितम्

राम

Nepal Sanskrit University, Balmooki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नगेभ्यइति। हे जननि। कविभिर्वाल्मीकिप्रभृतिभिः। यस्याश्चयां नवजलाशयः जलायाः सादृश्यस्य। जलापलक्षणेण शोभाप्रेक्षा
मानयोरिति विश्वः। लेशो लवः एकदेश इति यावत्। दीयतेऽर्पयिष्यते हे सुरधुनि स्वर्गगे। तां त्वं कथय वद। नन्वनर्मदाहवदः
सर्वाः शंकरालानसंशय इति रेवाखण्डे हरिहरक्षेत्रमाहात्म्ये च। गङ्गाकीप्रभवाः सर्वाः शिलानाथगणात्मिकाः इति वचनात्क
थं जलालेशो रेवाप्रभृतिषु न संघटत इत्येतदाह। नगेभ्यो हिमाचलादिभ्यो यान्तीनां निर्गच्छतीनां मध्ये कतमया नद्या पुण्य

नतेभ्यो यातीनां कतमया तटिनीनां कतमया पुराणां हर्तुः सुरधुनि कपर्दोद्धिरुहे कया वा
श्रीभर्तुः पदकमलमक्षालि सलिलैर्जलालेशो यस्यां नवजननि दीयेत कविभिः ७४

णां त्रिपुराणाम्। अथवा पुराणां चतुर्दशलोकानाम्। संहर्तुः संहारकर्तुर्महादेवस्य कपर्दः जटाजूटः। आरुहे आरूढः।
अपि तु न कतमया वा। अथवा। श्रियालक्ष्म्याः। भर्तुः कान्तस्य कान्तः स्यात् कथमिति पतिवर्णिता भर्ता च भोक्ता धव इति
हलायुधः। विष्णोः सलिलैः स्वकीयैः पाथोभिः। पदकमलं चरणारविंदं। पदे व्यवसितत्राणास्थानलक्ष्म्यांघ्रिवल्लघ्रिप
माः। अक्षालि क्षालितं धौतमित्यर्थः। अपि तु न कयापीति काकुः। यदि जलानां सहानयोग्यान् कदाचिद्दूषितदासामप्रे
णानुनायोग्याकलभ्यत इति भावः॥ ७४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समुत्पत्तिरिति। हे जननि·जगति·तवउत्कर्षः आधिक्यं·कस्मात्त्वजागर्ति। जागरूकोनभवति·अपितुसर्वस्माद्देवेतिभावः॥
पद्मारमणपदपद्मामलनखात्। पद्मायाः कमलायाः। पद्मालयापद्माकमलाश्रीर्हरिप्रियेत्यमरः। रमणः प्राणनाथः
विष्णुरितियावत्। रुच्याभीकवरासिकाश्चारमणः प्राणाधिनाथोऽकइतिहलायुधः। तस्यपदपद्मंचरणकमलं तस्याम
लोयानखलस्मात्। तवसमुत्पत्तिर्जनिः। जनिरुत्पत्तिरुद्भवइत्यमरः। एतेनयोनितः श्रेष्ठ्यमुक्ता। स्थानतोपिश्रेष्ठ्यं

समुत्पत्तिः पद्मारमणपदपद्मामलनखात्त्रिवासः कंदर्पप्रतिभटजटाजूटभवने अथा
यंव्यासंगोनिखिलजननिस्तारणविधेर्न्न कस्मादुत्कर्षस्तवजननिजागर्तिजगति १५

माह। कंदर्पोहर्षकोनंगइत्यमरः। कंदर्पोऽनंगः। तस्यप्रतिभटः। प्रतिद्वंद्वीमहादेवः। तस्यजटाजूटएवभवनंगृहम
तत्रनिवासः। वसतिः। स्थानतः श्रेष्ठ्यमुक्ताव्यवसायादपिश्रेष्ठ्यमाह। अथानन्तरमयंसत्रिकृष्टवती। निखिल
जननिस्तारणविधेः। निखिलानांसमस्तानांजनानांप्राणिनांनिस्तारणस्यापसकाशादुद्धारणं तस्यविधिर्विधा
नंकारणमितियावत्। विधिर्विधानेदैवेपीत्यमरः। तस्यव्यासंगः उद्योगप्रयत्नइतियावत्। एतेनसकलमरीशिगोम

381

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रपन्नइति। इहलोके। तीर्थानि पुष्करादीनि। तीर्थं शास्त्रं धर्मक्षत्रोपायोपाध्यायमंत्रिषु। भवतार्पितुं शंभः स्त्रीपुंजः सुचवि
श्रुतमिति विश्वः। यस्य महत्क्षणास्य जन्तोः उद्धृतिविधौ उद्धारकरणविषये। त्वरितं सत्वरं पथास्यन्नथा। त्रपन्ते तन्नाप्राप्नु
वन्ति। किलेति संभावनायाम्। किल शब्दलुवार्तायां संभाव्यानुनयार्थयोरिति विश्वः। कपालीमहादेवप्रभृतिर्मृत्योर्येषा
न्ते कपालीप्रभृतयोपि देवाः। कं हलं कर्णे कुर्वन्ति। एतदीयवार्तामपि न शृणुम इति कर्णापिदधति। अथवा अहंकारभरा

त्रपन्ते तीर्थानि त्वरितमिह यस्योद्धृतिविधौ करं कर्णे कुर्वन्त्यपि किल कपालिप्रभृतयः ३
मन्दं मामंबत्वमपि करुणापूर्णहृदये पुनानासर्वेषामघमथनदर्पं दलयसि १६

न्मुखतो निषेधुमशक्नुवन्तिः कर्णे हलं दत्वा। त्वां समुद्धर्तुं वयन्न समर्था इति सूचयन्तीति भावः। हे अंब करुणापूर्णहृदये
करुणया परदुःखप्रहाणेच्छालक्षणया दयया पूर्णं व्याप्तं हृदयं यस्याः तत्संबुद्धौ। इमं परोवर्तिनं तं पूर्वोक्तं। इयं त्वं पु
नाना पावयन्ती सती। सर्वेषां पुष्करानां तीर्थानां कपालिप्रभृतीनां देवानां। अघमथनदर्पं अघस्य पापस्य यन्मथनं विलो
डनं तत्रयो दर्पो अभिमानः। वयं पापोद्धर्तुं समर्था इत्याकारः। तं दलयसि शिथिली करोषि। त्वत्तः परो न कोपि पापोद्धर्तुं

समर्थ इति भावः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्वपाकानामिति हेजननिमातः। श्वपाकानांश्वपचानांव्रातैःसमूहैः। किंलक्षणैः। भ्रमितविचिकित्साविचलितैः। भ्रमिता
अपरिमिता। विचिकित्सा विशेषेणाचिकेतमिच्छाविचिकित्सा तयाविचलितैर्व्याकुलैः संदेहवद्भिरितियावत् अतएव
विमुक्तानांत्यक्तानांमनः परिघट्टांपातकसमाजानां। किलेत्यजनये एकमहिनीयंसदनंनिलयन्निवासस्थानमितियावत्
एतादृशंमांउद्धर्तुंउद्धारंकर्तुं। परिकरांगाचिकावर्श्वं हृदयन्याः हृदीकुर्वन्त्यालव। श्लाघांप्रशंसांकर्तुं अहोइत्याश्चर्ये

श्वपानांव्रातैरमितविचिकित्साविचलितैर्विमुक्तानामेकंकिलसदनमेनः परिघट्टाम्
अहोमामुद्धर्तुंजननिहृदयन्याः परिकरंतवश्लाघांकर्तुंकथमिवसमर्थोनापशुः ७

३८२

नापशुः। पश्यतिसमनयासर्वमितिपशुः। नेरुपशुः नरपशुः। सदसद्विवेकरहितः कथमिवसमर्थः शक्तोभवति न
कथमपीतिभावः। समर्थलुहिनेशक्तेसम्बन्धेप्यस्यलिंगकथनिमेहिनी। समनयासर्वमापश्यतोः विवेकशीलस्यप
रुषस्य कथंवचनगोचरांनभवतीति भवेदितिभावः ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नकोपीति। एतावन्तंसमयंकालं। समयाः शपथाचारकालसिद्धान्तसंविदइत्यमरः। आरभ्यकोपिमादृशःपापिजनो
नःमिलितः। नसंगजः। खलुसान्त्वने- खलुस्याद्वाक्यभूषायांजिज्ञासायांचसान्त्वनेइतिविश्वः। यतयस्यऽद्वारादद्वारा
त्। जगतोलोकस्याआगतदूरे। आगतदूरेसमीपेचआगतदूरसमीपयोरित्यमरः। विस्मयभरः आश्चर्यराशिर्भवतिस्यात्।
विस्मयोद्भुतमाश्चर्यंचित्रमित्यमरः। इत्येतत्प्रकारः इतिहेतुप्रकरणप्रकारादिसमाप्तिष्वित्यमरः। नेतवमनसिमानसेचिर

नकोप्येतावन्तंखलुसमयमारभ्यमिलितोयऽद्वारादागतवतिजगतोविस्मयभरः इतीमा
मीहान्तेमनसिचिरकालंस्थितवतीमयंसंप्राप्तस्त्वांसफलयितुमंबप्रणयतः १८

रकालंबहुकालं। स्थितवतींस्थिताम्। इमांपूर्वोक्तांईहांचेष्टांइच्छाम्। सफलयितुंसफलांकर्तुं प्रणयतःप्रेम्णाः या
च्चयेववा। प्रणयःप्रेम्णिविश्रंभेयाचाप्रसादोरपीतिविश्वः। अयंमत्वक्षणोऽकृतीहभंवजनविलोकनांऽद्वारेद्वावती
संप्राप्तःप्रत्यागतः। त्वदीयेहापालनप्रयोजनायाहमागतः॥ ममतुनकिमपिप्रयोजनमितित्वदीयनिस्पृहत्वं द
र्शयतीतिभावः १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्वहन्ती। अनांहन्तिर्वर्त्तनमिवहन्तिर्येषान्ते श्वहन्तयः। तेषु व्यासंगः भासक्तिर्यस्य सः। अथवा अनांहन्तिरिवहन्तिर्येषां ता
नि श्वहन्तीनि इंद्रियाणि। पुनः पुनर्विषयेषु सन्तुष्टानि। तेषु व्यासंगो यस्य सः। इंद्रियाणां विषयोन्मुखकरणे यत
मान इत्यर्थः। अथानन्तरं नियतन्नियमेन मिथ्याप्रलपनं अनर्थवाग्व्यापारम्। असत्यभाषणमित्यर्थः। तथाच
स्मृतिः। नसत्यात्परमोधर्मो नानृतात्पातकं परमिति। यद्यप्यत्र प्रलापोऽनर्थकं वचइत्यमरकोशात्प्रलपनपदस्यानर्थ

श्वहन्तिव्यासंगो नियतमितमिथ्याप्रलपनं कुतर्के ध्यासः सततपरपैशुन्यमननं अ
पिध्यावन्ध्यावन्ममनुपनरेवंगुणगणान्नृतेन्वक्तोनामक्षणमपिनिरीक्षेनवदनं १९

वचनार्थकतयामिथ्यापदस्यानर्थकं प्रतिभाति॥ तथापिविशिष्टवाचकानां पदानां सति पृथक्विशेषणवाचकप
दसमवधानेविशेष्यमात्रपरतायाः सर्वत्रदृष्टत्वात्कश्चिद्दोषः। कुतर्के कुकल्पितास्तर्काः काक्षणाः। तत्र अभ्यासो
भ्यसनं तर्कः काक्षावितर्कोहकर्मभेदेषु कीर्त्यतइतिविश्वः। पुनरपि भूयोपि सततन्निरन्तरं परपैशुन्यस्य परमर्मो
द्घाटनस्य मननम्। जुपादपूरणे। एवंप्रकारमगुणगणान्गुणसमूहान् ध्यावंध्यावंध्यत्वाध्यत्वा। गामुलं
नमेतन्त्वदनेनामत्यांविनानामप्राकाश्यसंभाव्यकृत्वाभ्युपगमेपुचेतिविश्वः। क्षणमपिक्षणमात्रं ममवदनं मुखं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कियन्तइति। सुतनं। इहलोकार्थघटकाः। इहलोकार्थघटयन्तिनिर्णयन्ति इहलोकार्थघटकाः। देहात्मवादिनः स्वर्गोयमेव नरकः कुत्र केनदृष्टइतिब्रुवन्तएकेअन्ये। एकेमुख्यास्केवलाइत्यमरः। कियन्तः कतिनसन्ति। अपिनुबहवः सन्ति च परपारलोकप्रगायिनः परलोकप्रेमवन्तः। अलीतिवादिनः। अतएव पूतात्मानः पवित्रदेहाः। पवित्रमनसोवापुण्यवंत इत्यर्थः। आत्मादेहमनोबलस्वभावधृतिबुद्धिष्विति विश्वः। परेकतिनसंतिबहवः सन्तीतिभावः। हेमातर्गिः खलुनिश्चये

कियन्तःसन्त्येकेसततमिहलोकार्थघटकाः परेपूतात्मानः कतिचपरलोकप्रगायिनः सुवंशे
नेमानलवखलुरूपानःप्रेनरयंजगन्नाथः शश्वत्त्वयिनिहितलोकद्वयभरः २०

नानवरूपानः रूपयासार्वविभक्तिकलक्षिलाप्तनः अप्रथमंप्रनरप्रथमेभेदेइतिविश्वः। अयंत्वस्योवनीजगन्नाथः शश्वन्निरन्तरंत्वयित्वदाधारे निहितः निक्षिप्तः लोकद्वयस्य इहिकामुष्मिकयोर्भरोभारोयेनसतथा। भूत्वासुखयथास्यात्तथानिश्चितमित्यर्थः। होतेनिदानिरन्तदीयक्षेपेव मत्कार्यसाधिकामयाकिमर्थचिन्ताविधेयेतिभावः॥२०

२०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गं.गा.टी. १२

विशालाभ्यामिति। इह संसारे खलु निश्चयेन विशालाभ्यां दीर्घाभ्यामाभ्यां नयनाभ्यां नेत्राभ्यां किं फलाभ्यां नयनाभ्यां परमरमणीयानि रवधिकमनीयानि नव नवप्रवाहरूपेणि शेषः। नवमूलनवसंहननं शरीरं कवलेवं विग्रहदेहकाया इति हलायुधः। नवाली नवाल्यादिता। अनन्यतयानदृष्टे। तर्हि ताभ्यामेकिंचित्फलमिति भावः। हीति निश्चयेन मनुज

विशालाभ्यामाभ्यां किमिह नयनाभ्यां खलु फलं नयाभ्यामालीनपरमरमणीयानवनवः
अयं हि न्यक्कारो मनुजहनकस्य भवतोर्ययोर्नीतर्यानिलवलहरीलीलाकलकलः २१

384

हनकस्य मनुजेषु मनुष्येषु हनकस्य वाकस्य। अयं न्यक्कारः शाप्यं कस्तिर्निष्कृतिः शाप्यमित्यः। यथोभवतोः कारयोरन्तर्मध्ये नवलहरीलीलाकलकलः। लहरीणां — कोलाहलः। अथवा लहरीणां लीलया मंदं मंदं गत्वा कलेघ्यक्कमधुरेषु कलोः व्यक्तमधुरः श्रोतृसुखकारीति यावत्। कलो मंदस्तु गंभीरे इत्यमरः। नयानः नप्राप्तः॥ ॥२१॥

राम: १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विमानैरिति। सुकृतिनः पुण्यवन्तः। सुकृतीपुण्यवान्धन्यइत्यमरः। स्वच्छंदस्वैरं विमानैर्व्योमयानैः। सुरपुरं स्वर्गं। अयन्नेग
च्छंति। पापाः पापवंतः। हेजनाः। परवशाः पराधीनाः सन्तः। नाकरुर्निति। नरकान्नरकान्निरयमध्ये पतंतिनिमज्जन्ति पुण्यवा
न्स्वःसुखंभुक्त्वा दुःकृतीयमयातनांभुक्त्वेत्यर्थः विभागोविवेकः। अशुभमयमूर्तौपापस्वरूपेतस्मिन्जनपदेराष्ट्रे

विमानैःस्वच्छंदंसुरपुरमयन्तेसुकृतिनः पतंतिनाकेपापाजनानिनरकेतःपरवशाः विभागोयंत
स्मिन्नशुभमयमूर्तौजनपदेनयत्रत्वंलीलादलितमखिलाशेषकलुषाः २२

राष्ट्रेजनपदोदेशोविषयश्चनिगद्यतइतिकेशवः। यत्रयस्मिन्लीलादलितमखिलाशेषकलुषा। लीलयाऽनायासेन
दलितंक्षालितंमखिलानामर्थानामशेषंकलुषंपातकं यया सास्तादृशीत्वन्नवर्णसेइतिशेषः॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भविष्यंतइति॰ विप्रान्ब्राह्मणान्घ्नन्तः नाशयन्तः। विप्रानिति बहुवचनेनानेकब्राह्मणवधकारिणः। गुरुतल्पी
रपि। भविर्नविशन्तः भजन्तः गच्छन्तः। पुनर्मैरेयंमदिरांपिबन्तः। मैरेयंसीधुमदिरामद्यंहालाद्रासवमिति रभसः। कन
कमपि सुवर्णमपि अपहरन्तः मुष्णन्तः। चकारादुपपातकानि समुच्चयन्ते। एतादृशाश्चतुर्विधमहापापोपपापका
रिणो मनुष्याः। भक्तेमरणसमयेन्वयिनंशरीरंविहाय त्यक्त्वा भक्तदानाश्वरजपां भक्तल्यज्ञानकर्तृणा

भविष्यन्तोविप्रानविरतविशन्तो गुरुतल्पीः पिबन्तो मैरेयंपुनरपहरंतश्चकनकम् विहाय
त्वर्यन्तेतनुमनुदानाश्वरजपामुपर्यंवक्रीडंत्यखिलसुरसंभाविनपदाः २३

उपरिउपरिस्थानब्रह्मलोकादौ सकलासोपिनयदीस्थानाः संतः। हे अंबजननि क्रीडंतिदिव्यंति। महादानाश्व
रैस्वर्लोकप्राप्तिः। गणयांशरीरत्यागेन मुक्तीभावइतिकथ्यते तयोः साम्यंनिवहेत एवोक्तंभगवता का
लिदासेन कस्माद्वर्षिगर्विनाभिविनाभाव्यः पतिर्मेनके कासौपश्यवपुर्विसंचतिपुनः स्वर्गपगाधारिणा।
मुग्धेकिंविदितानजकुतनपायस्यांप्रमीतोजनस्त्रैलोक्यप्रियमुद्विहायतृणवद्बुल्लास्यदंगछतिइति॥ २४॥

Nepal Sanskrit University, Balmooki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नृणामिति। नृणाम्मनुष्याणां ईक्षामात्रादीक्षणादेव अपीतिनिश्चयेन। भवभयंसंसारभीतिंपरिहरन्त्याः नाशयन्त्या
ःतनुमूर्त्तेः। कथभूतायाः। शिवायामंगलरूपायाः। शिवंभद्रंकल्याणमंगलंशुभमित्यमरः। इहलोकेमहिमानंम
हत्त्वंकोनिगदतुकः कथयेत्। लिम्पथेलोट्। अपिनकोपीत्यर्थः। तत्रहेतुमाह। अमर्षणाक्रोधेन। म्लानायाः म्लानिं

नृणामीक्षामात्रादपिपरिहरन्त्याभवभयंशिवायालेमूर्त्तेः कइहमहिमानंनिगदतु अम
र्षम्लानायाः पाममतुरोधंगिरिभुवोविहायश्रीकण्ठः शिरसिनियतंधारयतियाम् २४

म्लानायाः गिरिभुवंपार्वत्याः। पामंसर्वातिशयम्। अतिरोधंसंकोचंविहायपरित्यज्य श्रीकण्ठेमहादेवः शिरसिम
स्तकेनियतंनियमेन। यान्त्वांधारयतिधत्ते अतः पार्वत्याः सकाशादपित्वयातुरागतिशयोमहादेवस्येतिभावः॥ २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अलभ्यमिति। यः पवमानो वायुः। सुमनसां पुष्पाणां अलभ्यं। लब्धुमशक्यम्। इत्यौगिनिशेषः। सौरभ्यं सौगन्ध्यम्। नियतं
हरति मुष्णाति। नन्वचेतनानां हरणम्। तादृशं पापमित्यत आह। एवंप्रकारेणाविरहो वियोगस्तद्वशात्तेन क्षतं छिन्नं ह
न्हृदयं येषां तेषां विरहव्याकुलानामित्यर्थः। क्षणात्प्राणानपि हरति सोपि पवमानः प्राणहरणशीलोपि सन् त्वदीया

अलभ्यं सौरभ्यं हरति नियतं यः सुमनसां क्षणादेवं प्राणानपि विरहशात्क्षतहृदाम् त्वदी
यानां लीलावलितलहरीणां ध्यतिकरात्पुनीते सोपि प्रागहह पवमानस्त्रिभुवनम् २५

नांचेतनसमूहानां लीलावलितलहरीणां लीलाभिश्चलिताश्चंचलाः याः लहर्यः तासां ध्यतिकरात्संपर्कात्
संपर्कप्राप्ये शीघ्रम् अहहेत्यद्भुते अहहेत्यद्भुते पते इति विश्वः। त्रिभुवनं त्रैलोक्यं पुनन्ति पुनाति य
दुचेतनाचेतनधातुको वायुस्त्वदीयं लहरीसंपर्कं प्राप्य त्रिभुवनं पुनाति तर्हि संकल्पजकाकथेति भावः॥ २५

386

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रभातइति। प्रभातेऽपि। स्त्रीणांमज्जन्तीनां। नृपतिरमणीनांराजहाराणां। अमूर्य्यपश्यराजहारा इति। प्रभातपदेनव्य
ज्यते कुचतटीगतः स्तनपरिसरंघाम्रः। अंगरागायपरिधृतइत्यर्थः। मृगमदः कस्तूरिकायावत्। हेमातः जननितवतोयैर्जलैः
मिलमिनिश्रितोभवति। तावत् मृगाः विमानैश्चरन्तियेमानिकाः देवाः। तेषांशतसहस्राणि। तैः परिवृताः अनुगताः किं

प्रभातेस्त्रीणांनृपतिरमणीनांकुचतटीगतोयावन्मातर्मिलनितवतोयैर्मृगमदः मृगाला
वद्वैमानिकशतसहस्रैः परिवृताविशन्तिस्वच्छंविमलवपुषोनंदनवनम् २६

लक्षणाः विगतोमलः पापंयेभ्यस्तानिविमलानिनिष्पापानिवपुंषीशरीराणियेषांतैः विमलवपुषः दिव्यदेहः
सन्तः। स्वच्छन्दंस्वैरंयथास्यात्तथा। नन्दनवनंइन्द्रोपवनंविशन्ति प्राप्नुवन्ति कस्मिन्काले प्रमीतानांमृतानांमृगा
णांपरंपरायातवतोयसंपर्कात् दिव्यदेहधारित्वंयदि नहि साक्षात्संपर्कवतांवुकाकथेतिभावः २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विधत्तामिति। भवती। कामानामभिलाषाणां कामोभिलाषस्तूर्थश्चेत्यमरः। सविद्री। सूतेमासविद्री दात्री। यदि जगति लोके
। जागर्ति विनिद्रा भवति। तदा विधिर्ब्रह्मा निरवधिसमाधिं भवधेः सीम्नः निष्क्रान्तं निरवधिः। भवधिस्त्ववधानेप्यास्तीत्यि-
कालेविलेपुमानिति मेदिनी। सचासौसमाधिश्च तन्निरवधिसमाधिं निःशंकं यथास्यात्तथेति क्रियाविशेषणमुः शं
काचात्रप्रसगः। मयिसमाधिस्थेप्रजानां कागर्तिरित्याकारः। विधत्तां करोतुविध्यर्थे लोट्। अशोके [illegible]

विधत्तां निःशंकं निरवधिसमाधिं विधिरहो सुखं शेषे शेतां हरिरविरतं नृत्यतु हरः कृतं प्रायश्चित्तैरलमथ तपोदानयजनैः सदेवं कामानां यदि जगति जागर्ति भवती ७

धिगर्थे शोके च कृपार्थविषादयोरिति विश्वः। हरिर्विष्णुः सुखं सुखेन शेषे शेषशय्यायां शेतां त्वापं करोतु भवि
रतं निरन्तरं हरो महादेवः नृत्यतु नृत्यं करोतु एतेनेत्वच्चकर्मणि प्रवृत्ता भवन्त्वित्यर्थः। प्रायश्चित्तैः कृच्छ्रचान्द्राय
णादिभिः जातं कृतं स्त्रीवेनुनिष्फलमित्यमरः। अथानन्तरं तपश्चेन्द्रियनिग्रहः। दानं स्वस्वध्वंसपूर्वकं परसत्तापार
तंत्र्यं देवतामुद्दिश्य यत्पूर्वकं च हो हर्विनिक्षेपः। तैरलं पर्याप्तं पूर्वोक्तानां सर्वेषामेकैकफलदातृत्वं। त्वं पुनरेका-

सदा जागर्ति फलानि दत्तवती मित्यर्थः
यामीलमिति भावः॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्मृतमिति खलु भाषायां। मम प्राणप्रान्तं। प्राणानां प्रान्तो नाशस्तस्मिन्समये। इदं तं गेति पदम् वदनसेवकमलं वदनकमलं तस्यान्तर्मध्ये मुखमरोजमध्ये इत्यर्थः। विलसतु विलासं करोतु किंलक्षणमिदन्तु। यत् श्रवणरमणीयं श्रवणयोः कर्णयोः गतं सदमणीयं कमनीयम् अथवा श्रवणेन आकर्णनेन रमणीयं श्रवणफलमुक्त्वा स्मरणफलमाह। पुनः किंलक्षणम्

स्मृतं सद्यः स्वान्तं सुखयति निनां तं सकृदपि प्रगीतं यत्पापं हृणिति भवतापं च हरति इदं तं गेति
श्रवणरमणीयं खलु पदं मम प्राणप्रान्ते वदनकमलान्तर्विलसतु २८

यत् स्मृतं सत् सद्यः। स्मरणसमकालमेव स्वान्तं मानसं निनां तत्पुंसं सुखयति आह्लादयति। स्मरणफलमुक्त्वा कीर्तनफलमाह। पुनः किं। यत् सकृदपि एकवारमपि प्रगीतं प्रकीर्तितं सत् हृणिति सत्वरं पापं च पापं भवतापं भवत्संसारस्य तापं संतापं हरति नाशयति २८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गं·लही १६

कपर्दीति। हे जननी। तेनव। लहरयः जलवीचयः। विजयंतां सर्वोत्कर्षेणवर्त्तंतां। किंलक्षणाः प्रणयमिलदर्द्धांगयुवनेः प्रणयेनस्निहेनमिलतसंगच्छतः अर्द्धांगं अर्द्धशरीरं युवनौ स्त्रियां यस्यतस्य। अर्द्धनारीश्वरस्येत्यर्थः। एतादृशस्य पुरारेस्त्रिपुरशत्रोर्महादेवस्य। कपर्दितजटाजूटात् उच्चस्य निर्गत्य भवाम्बापार्वत्याः। मृदुलतरसीमंतसरणौ अतिशयेन मृदुः मृदुलतरः सचासौसीमंतः केशपद्धतिः तस्य सरणिः पंक्तिः। सरणिः पंक्तिवर्त्मनोरितिविश्वः। तत्रप्रेंखंत्योव

कपर्दोच्चस्यप्रणयमिलदर्द्धांगयुवनेः पुरारेः प्रेंखंत्योमृदुलतरसीमंतसरणौ भवाम्बाः सापत्न्यस्फुरितनयनं कोमलरुचाकरेणाक्षिप्तालेजननिविजयन्तांलहरयः २९

लांत्योमिलंत्यइत्यर्थः। पुनः किं काक्षिप्तोलकस्यायेनभवानीपदस्योभयत्रसंबंधः। भवाम्बाः कोमलरुचाकोमलाकृतयस्यतेनकरणेनलीन। सापत्न्यस्फुरितनयनं सपत्न्याभावः सापत्न्यं सापत्न्येनस्फुरितेसेर्ष्यावलोकितेनयने नेत्रे यस्मिन्कर्मणि यथास्यात्तथाक्षिप्ताविधूताः। एतेनमहादेवस्यत्वमतिप्रेयसीतिसूचितम् २९

388

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनार्यइति। अयेमातः। अहंशिशुः। संप्राप्तः संगतः। किंलक्षणः अनार्यः दुःशीलः किंलक्षणात्वां। त्वेहेनप्रेम्णा भार्यां
परिभूतां दुःशीलमपि पुत्रं जननीनमसुपेक्षेतइतिभावः। उक्तंच। अपराधपरंपराहतत्वहि मातासमुपेक्षतेसुतमि
ति। पुनः किंशिशुः विगलितगतिः। विगलिता शिथिला गतिर्गमनं यस्य। अथवा विगलितनिषिद्धकर्मागतिर्व्यापा
रो यस्य सः। पुनः किंलक्षणात्वां पुण्यमार्गदांधर्मगतिदां। पुनः किंशिशुः पतनृपतिनः। नरकंसंगछन् धर्मपथात्तव

अनार्य्यः त्वेहार्द्रांविगलितगतिः पुण्यगतिदां पतन्विश्वोद्धर्त्रीं गदविगलितः सिद्धभिषजं मृ
दुधासिंधुं तृष्णाकुलितहृदयो मातरसयेशिशुः संप्राप्तस्त्वां महमिहविदध्याः समुचितं ॥

लितइतिभावः। पुनः किंविश्वोद्धर्त्रीविश्वस्यजगतः उद्धर्त्रीउद्धारकर्त्री। यदिविश्वोद्धारकरणेतवसामर्थ्यं। तर्हि
विश्वांतर्गतस्यसमोद्धारकरणे तवकः प्रयासाधिकइतिभावः। किंशिशुः। गदेनजरामरणरूपरोगेणविगलि
तः शिथिलितः जर्जरीभूतइतिभावः। पुनः किंत्वां। सिद्धभिषजंसिद्धौषधिं पुनः किंतृष्णाकुलितहृदयः। तृष्णया
मृगतृष्णया। आकुलितंव्याकुलितंहृदयं यस्यसः। पुनः किंत्वां मृदुधासिंधुं। अमृतनदीं। अंतःकरणादिहमदी
यदुःखस्यासमयेयत्तवसमुचितंयोग्यंतत्त्वंविदध्याः कुरु। उक्तंच। अनार्यचरितंदुष्टं पारवंडिनमनर्थकं। तहि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गं॰ ल॰ टी॰ नहि त्यजंति सुधियो महांतः शरणागतमिति। अन्यच्च अद्रेपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः शिरसां सनीवेति॥ ३०॥ भवत्वेति। हीति नि
श्चयेन खलु वाक्यभूषायां। हे अंब भवत्वान्यथा। आत्माधमपतितपावनपरिघस्त्यागस्नेहः। आत्मश्चाधमश्च पतितश्च पावनश्च परिघस्त्यागस्नेहः। अधमोऽ
जनः। पतितः कुपथासक्तः। पावनोऽधर्माभावकृत्। आत्मश्चाधमश्च पतितश्च पावनश्च आत्माधमपतितपावनास्तेषां परि
घस्त्यागः तस्य परित्यागं परिपालनं तत्र स्नेहो हार्दं श्लथयितुं शिथिलयितुं यथा अशक्यः शक्तुं योग्यः शक्यः। न शक्यः अ

भवत्याहि आत्माधमपतितपावनपरिघस्त्यागस्नेहः श्लथयितुमशक्यः खलु यथा मयाप्येवं प्रेमा
डरितनिवहे त्वं जगति स्वभावो यस्सर्वैरपि खलु यतोऽयं परिहरः ३१

शक्यः। एवं पूर्वोक्तरीत्या मयापि उरितेनिवहे पापतरुसमूहे प्रेमा स्नेहः श्लथयितुमशक्यः कुतः यतः कारणात् जग
तिलोकसर्वैरपि ब्रह्मादिभिरशक्तैरपि खलु निश्चयेन अयं स्वभावः परिहरः परिहर्तुमशक्योऽयं परिहरः। एतानना
नहि सुजनो दोर्जन्यं त्यजति सज्जनः साधुनामिति भावः ३१

389

राम॰
७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रपद्यन्तइति। अत्रभवतीं पूज्यं। अत्रभवन्नत्रभवच्छब्दौ पूज्यार्थे निपातितौ। भवतीं उपाधेः कैतवात्। उपाधिर्द्धर्मचिन्तायां कैतवेपि विशेषणे इति विश्वः। हेतौ पंचमी। कति लोकाः न प्रपद्यन्ते प्रपन्नाः अपि तु सर्वे प्रपद्यन्त इति भावः। पान्तु अत्र विशेषे यद्यदभीष्टं अभिलषितं स्फुरति प्रकाशते तत् त्वं वितरसि ददासि। हे तु कामनाम्प्यभीष्टदात्री भवत्येव जगति विराजत इति भावः। अथवा उपाधेः सकाशात् मायाया इत्यर्थः। यत् स्फुरति उपाधिं परित्यज्य इति पञ्चमी वा यत् ब्रह्मणि स्फुरति तत् त्वं वितरसि ददासि यद्वा नर्भा भयं मरणरूपं येषां तेभ्यः तेषां अभियां विकाररहितचेतसां यत् इष्टमभीष्टं तत्स्वरूपं वितरसि ददासि। तदुक्तं कालिदासेन विकार

प्रपद्यन्ते लोकाः कति न भवतीं त्वत्र भवतीं पांसवोपाधेः स्फुरति यदभीष्टं वितरसि
शपे तुभ्यं मानमनुपतरणस्मायसमधेः निसर्गादेव त्वय्यभिति मनुरागं विधतवान् ३२

हे नो सति विक्रियन्ते येषां न चेतांसि तेषां वर्धाग इति। हे मनघे त्वभावमलेमानः। अहं तुभ्यं शपे त्वच्छपथं करोमि पुनर्निश्चये नः मम मनुमत्संबंधी अयं त्वत्पुरोवर्ति भात्मा मनः। भात्मा देहमनोऽसत्स्वभावधृतिबुद्धिषु इति विश्वः। निसर्गात् स्वभावात् त्वयि एव। अभितं अपरिमितं अनुरागं प्रीतिं विधतवान् विशेषेण धतवान् विहितवानिति यावत्। एतेन नैसर्गिकानुरागिणोऽहं तु कस्य प्रेमोपेक्षणं न वर्चेति भावः॥ ३२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गं·ल·टी
१८

पयः पीत्वेति। हे मातः! अहं एतस्मात् पूर्वं तव वत्सं वंधिपयः जलं पीत्वा पानं कृत्वा। सपदि तत्कालं विमूढैः निनगं मूर्खैः प्रवृत्तिमार्गप
रैरित्यर्थः॥ एतादृशैः सहचरैः सहयायिभिः सह संरन्तुं विहर्तुं यातः गतः। स्वदेशमिति शेषः। पान्तु क्वचिदपि विश्रान्तिं विश्रामश्र
मापनोदमिति यावत् न भगमं गतः। इदानीं स्वर्गमानकालेचिरात् बहुकालमारभ्य। उन्निद्रं उद्गतनिद्रायस्य तं विनिद्रमि

पयः पीत्वा मातलवमपदि यातः सहचरैर्विमूढैः संरन्तुं क्वचिदपि न विश्रान्तिमगमम्
इदानीमुत्संगे मृदुपवनसंचारशिशिरे चिरादुन्निद्रं मां सदयहृदये शाययचिरम् ३३

३९०

त्यर्थः। दुःखिनो निद्रापि न भवतीति भावः। एतादृशं सं हे सदयहृदये सदयहृदयं यस्याः तत्संबुद्धौ मृदुपवनसंचारशिशि
रे मृदुर्मंदोयः पवनो वायुस्तस्य संचारः संसरणं तेन शिशिरे शीतले एतादृशे उत्संगे नीरे तवेति शेषः। चिरं बहुकालं शा
यय निद्रापय॥ ३३॥

रामः
१८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नवालंबादिति। हे भवजनानि नवआलंबात्आश्रयात्। आलंबंप्राप्येत्यर्थः। अथवा हेतौ पंचमी। स्फुरदलघुगर्वेण स्फुरति
तीति स्फुरत् नलघुः अलघुः अलघुश्चासौ गर्वश्च अलघुगर्वः। स्फुरन्जागरूकोः अलघुर्गुरुर्यो गर्वोः भिमानो यस्यः ते
न। गर्वोभिमानोहंकार इत्यमरः। एतादृशेन मया सहसा आकस्मिकं अभिचार्य इति यावत्। सर्वे समस्ताः सुरगणाः। सुर
णां देवानां गणाः समूहाः। आवज्ञाशरणिं अवज्ञायाः अवमानतायाः सरणिं श्रेणीं। शिवमानतावत्येत्यमरः। नीताः प्रा

त्वालंबादंवस्फुरदलघुगर्वेणसहसाः मयासर्वेवज्ञासरणिमथनीताः सुरगणाः इदानी
मौदास्यंयदिभजसिभागीरथितदानिराधाग्राहोदिमिकथयकेषामिहपुरः ३४

पिताः। अथ सुरगणावज्ञानंतरं इदानीं वर्तमानकाले हे भागीरथि। यदि त्वं औदासिन्यं उपेक्षामयीति शेषः। भजसि
तदानिराधाः निर्गतः आधाः आश्रयो यस्य स एतादृशः अहं इह संसारे केषां पुरः सन्निधौ रोदिमि रोदनं करोमि।
तत्त्वं कथयवद। सुरगणावज्ञाकारिणो ममोद्धारस्त्वदर्धीनस्त्वयाचाहं नोपेक्षणीय इति भावः॥ ३४ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सदैवेति। हे भव। सदैव सततमेव त्वय्येव अर्पितकुशलचिंताभरः। अर्पितः कुशलस्य कल्याणस्य या चिंता भरः निशं विचारः।
तस्याः भारः समूहो येन तं मा सुविषमे विकटे अस्मिन् समये यदि त्वं न जहासि तदा भयं त्रिलोकानां विश्वासः भा
लिकं त्रिभुवनलाभं त्रिलोकीमध्यात् भलं भयते भलं प्राप्नोति। चपनः। खलु निश्चयेन इयं निर्व्याजकरुणा। व्याजा

सदैव त्वय्येवार्पितकुशलचिन्ताभारमिमं यदि त्वं मां न त्यजसि समये अस्मिन्
विषमे तदा विश्वासो यं त्रिभुवनलाभलभयते निरुपाधा चेयं भवति खलु
निर्व्याजकरुणा ३५

351

पदेशात् निःक्रांता निर्व्याजात् सा चासौ करुणेति विग्रहः। व्याजोपदेशो लक्ष्यं चोपधयछद्मकैतवे इत्यमरः
फलाउसंधानरहिता अहेतुकीत्यर्थः। निरुपाधा निराश्रया भवति जायते इति ३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपीति। हे जननि। प्राज्यमपि बहुलमपि। राज्यं सर्वाधिपत्यं। तृणमिव सहसा अविचार्य। परित्यज्य त्यक्त्वा। नवविलोलवानीरं विलोलन्तः कंपनो वानीराः जलवेतसाः यत्रेति शोभनवानीरवंजुलाइत्यमरः। एतादृशीं नदीं। श्रितवतां समाश्रयतां पुनः किं लक्षणानां सुधातो। अमृतात् स्वादीयं अतिशयेन स्वादु सलिलभरं जलसमूहं। आतृष्णिं पिबतां तृष्णिं आइति अतृष्णिय

अपि प्राज्यं राज्यं तृणमिव परित्यज्य सहसा विलोलवानीरं नवजननि तीरं श्रितवताम् सु
धातः स्वादीयः सलिलभरमातृष्णि पिबतां जनानामानन्दः परिहसति निर्वाणपदवीम्

थेष्टं पिबतां पानं कुर्वतां जनानां लोकानां जनो लोके महर्लोकात्परलोके च पारमेश्वरे दिवि। एतादृशानां जनानां आनंदप्रमोदः निर्वाणपदवीं निर्वाणस्य मोक्षस्य पदवीं सरणीं परिहसति हास्यं करोति। निर्वाणं निर्हेतो मोक्षविनाशे गजमज्जने इति विश्वयादवौ ३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रदोषेति त्रिदशतटिनीतांडवविधिः ममवालोकस्येतिशेषः पापंदुरितं निरोधनांतिरस्करोतु आशिशिलोट् त्रि॰
दशानांविबुधानां त्रिदशाविबुधाःसुराइत्यमरः तटिनीह्रदिनीधुनीत्यमरः तस्यास्तांडवंनटनं तांडवंनटनंनाट्यमि
त्यमरः तस्यविधिर्विधानं विधिर्नानियत्वोकालेविधानेपरमेष्ठिनीतिमेदिनी किंलक्षणा प्रदोषांतेप्रदोषस्यरजनीमु
खस्य प्रदोषोरजनीमुखमित्यरः अंतःमध्यंतस्मिन्॥ किंलक्षणा नृत्यत्पुरमथनलीलोद्धतजटांतराभोगप्रेंखल्लहरिभु

प्रदोषांतेनृत्यत्पुरमथनलीलोद्धतजटांतराभोगप्रेंखल्लहरिभुजसंतानविधुतिः ॥

३१२

जसंतानविधुतिः पुरंत्रिपुरंमथ्नातीतिपुरमथनः महादेव नृत्यन्निवर्जनंकरोतीतिनृत्यन् नृत्यंश्चासौपुरमथनश्चनृ
त्यत्पुरमथनः तस्यलीलाविलासः तयाउद्धताउत्क्षिप्ताधातूनामनेकार्थत्वादुत्क्षिप्तेतिपर्यायः जटाकेशसमूहः त
स्याअंतरंमध्यं॥ तस्यआभोगपूर्णता॥ आभोगोवरुणाद्धत्रेपूर्णतायत्नपोरपीतिमेदिनी तत्रप्रेंखंत्पश्चलंत्पश्चंच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लाःयालहर्य्यः ताएवभुजाः तेषांसंतानःसम्यक्तानःसंतानःनृत्योपकरणांहस्तचालनविशेषः नानसंख्याचीक्ताकार
शीखंडे नानाल्चेकोनपंचाशदित्युक्त अथवाभुजानांसंतानःसमूहस्तस्यविधुतिःकंपनंयत्र पुनःकिंलक्षणाः वि
लक्रोडक्रीडज्जलडमरुडंकारसुभगः विलंकुहरं॥कुहरंविवरंविलमित्यमरः विलस्यकुहरस्य क्रोडःअंकः उत्संगइ
तियावत् क्रोडःशनैःशूकरेनानप्रमानंकरक्षसोरिनिमहिनी विलक्रोडेक्रीडन्विहरन्यत्जलंतस्यडमरुवत्डंका

विलक्रोडक्रीडज्जलडमरुडंकारसुभगस्त्रिरोधत्तांपापंत्रिदशतटिनीतांडवविधिः ३ पुरो
धावन्धावन्द्रविणमदिराघूर्णितदृशांमहीपानांनानातरुणतरखेदस्यनियतं॥ ॥

तदनुकरणाशब्दः डमरुवाद्यंप्रसिद्धांतेनसुभगःसुंदरः॥एतेनमहादेवस्यनृत्यसहायिनीत्वमेवेतिध्वनितं ३ प
पुरोधावन्निति द्रविणमदिराघूर्णितदृशां द्रविणंद्रव्यमेवमदिरा मादकत्वात्॥तयाघूर्णितःभ्रामिताःदृशोदृष्टयो
येषांतेषांमहीपानांनृपाणांपुरःअग्रेनियतंनियमेन धावन्धावन् धावित्व वीप्सायांद्वित्वं नानातरुणतरखेदः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्य॰नानाविधोयत्नरुगातरोजाग॰ कःखेदोयस्यतस्य पुनंकिं॰स्वहितशतहंतु॰स्वस्पहितानांशतं॰तस्यहंतु॰स्वीयार्थघातु॰
कस्य॰अतएवजडधियःमूढबुद्धेःममेव॰अयंवक्ष्यमानरूपोमंतुरपराधः॰मंतुःपुंस्यपराधेपिमनुष्यपिप्रजापतावितिं
मेदिनी॰ सकृदित्यपेक्षायासाह॰हेमान॰यद्यस्मात्॰कारणात्क्षणामपिक्षणामात्रमपि॰तेतव॰त्वन्मंवंधीवियोगःवि
रहः॰अतःकारणात्॰इहअस्मिन्॰मद्वक्षणेजने॰वयाकरुणादयाविधेयेतिशेषः ३८ स्मृतिंयातेति याज्ञक्ल

ममेवापंमंतु॰स्वहितशतहंतुर्जडधियो॰वियोगस्तेमातर्यदिहकरुणातःक्षणमपि ३८
स्मृतिंयातापुंसांमकृतसुकृतानामपिचयाहरस्यंतस्तंद्रांतिमिरमिवचंडांशुसरणिः

तसुकृतानामपि॰तकृतंसुकृतंपुण्यंयेस्तेषांपुंसांनराणां॰चपादपूर्त्तौ॰अंतकरणे॰स्मृतिंस्मरणंयातागतासती॰ राम॰
तंद्रांनिद्रां॰अज्ञानंनिद्रातंद्राप्रमीलास्यादित्यमरः॰चंडांशुसरणि॰चंडांशोःसूर्यस्यसरणिःगतिः॰तिमीरमिव अं २१
धकारमिव॰हरसिनाशयसि॰सापूर्वोक्ताइयंमत्पुरोवर्त्तिनी॰तेतवमूर्त्तिःजलरूपेतिशेषः॰किंलक्षणामकलसुर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संसेव्यसलिल॰ सकलैः समस्तैः सुरैर्देवैः॰ संसेव्यंसलिलंजलंयस्याः सा॰ देवाराध्यमानायास्तव॰ सेवनेअस्मदादीनांनृ॰
णामवसर॰ एवदुर्लभः॰ ममअंतअंत॰ करणे॰ स्थितिमितिज्ञेयः संतापमाधिं॰ अथानंतरं॰ त्रिविधंकायिकवाचिक
मानसिकरूपंपापंचहरतांतिरस्कुरु ३९ ललाटइति लोकैर्जनैः खलुवाक्यभूषायां। इहमर्त्यलोके। ललाटे
भाले॰ सलीलंसविलासंयथास्यात्॰ तथातिलकफिता॰ तिलकीकृता। मनी॰ तमोहंतुंअंधकारंदूरीकर्तुं॰ तरुणानर

इयंमानेमूर्तिः सकलसुरसंसेव्यसलिला॰ ममांत॰ सतापंत्रिविधमथपापंचहरताम् ३९ ललाटेयालो॰
केरहिखलुमलीलंतिलकिताततमोहंतुंधत्तेतरुणतरमार्जारइतुलनां विलिंपंतीसद्योविधिलिखित॰
दुर्वर्णासरणिंत्वदीयासामृत्स्नाममहरतुकृत्स्नामपिशुचं ४०

मार्जारइतुलनां॰ मध्याह्नकालीनसूर्य
तुल्यांधत्तेधारयति॰ तदुक्तंभारतेभीष्मयुधिष्ठिरसंवादे जान्हवीतीरसंभूतांमृदंमूर्द्ध्निविभर्त्तियः विभर्तिरूपंसौर्क
स्यतमोनाशायकेवलमिति॰ यासद्यधारणासमकालमेवः विधिलिखित॰ दुर्वर्णासरणिं॥ विधिनादैवेनलिखिता॰
दुर्वर्णानांदुष्कर्मणां॰ यासरणिपरंपरां॰ तांविलिंपंतिं॰ मार्जयंति॰ सापूर्वोक्तात्वदीयात्वत्संबंधिनीमृत्स्नामृत्तिका म

महाकालसर्वाभिष्टिचंद्रशाकंदरतुलना
पृ॰ ४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नरानिति·नन्नज्जनपदेषु·स्वस्वराष्ट्रेषु·समासक्तमनोयेषांतान्। अतएवमूढान्विवेकरहितान्नरान्मनुष्यान्·विकच
कुसुमव्रातमिषतः·विकचानिविकसितानि·कुसुमानिपुष्पाणितेषांव्रातोव्रजस्तस्यमिषतः·व्याजेन·सार्वविभक्तिक
मसिल·सोद्व्रासंसानंदंपथास्यात्तथाहसंत·हास्यंकुर्वंतः·पुनःकिं·सततंनिरंतरं·नित्यमलिनान्निसर्गमलिनान्·अ
लिनीद्विरेफान्·सौरभ्ये·सौगंध्ये·पुनानाःपावयंतः·त्रिदशतटिनीतीरतरवः·स्वर्गगांतटस्थद्रुमाः·नोस्माकं·सुखा·

नरान्मूढांस्तन्नज्जनपदसमासक्तमनसोहसंतःसोद्व्रासंविकचकुसुमव्रातमिषतः पुनानाः
सौरभ्यैःसततमलिनोनित्यमलिनान्सखायोनःसंतुत्रिदशतटिनीतीरतरवः ४१ यदंतःखे
लंतोबहलतरसंतोषभरितानकाकानाकाधीश्वरनगरसाकांक्षमनसः ॥ ४२ ॥

यःसुहृदःसंतु·भवंतु ४१ यदंतइति·यस्यअंतर्मध्येखेलंतः·क्रीडंतः·काकाः·वायसाः·किंलक्षणाः·बहलतरसंतोष
भरिताः·बहलतरेणादभ्रेणासंतोषेणाभरिताःपूर्णाःसंतः·नाकाधीश्वरनगरसाकांक्षमनसः·नाकस्यस्वर्गस्यअधी
श्वरः·इंद्रः। स्वरव्ययंस्वर्गनाकइत्यमरः। तस्यनगरंपुरंअमरावती·तत्रसाकांक्षंआकांक्षयासहसाकांक्षमनोयेषां

तेनाकाधीश्वरनगरसाकांक्षमनसः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदिक्षीरविहारपरिनुष्टमानसानांकाकानांनाकाधीश्वरनगरंतुक्षुनदावृद्धिमतांकाकथेतिभावः। निवासात्स्वाश्रयात्
लोकानांजनानां। जनिमरणशोकापहरणं जनिर्जन्म मरणंमृत्युः तयोशोकस्तस्यहरणंवाशकं। तत्पूर्वोक्तलक्षणाए
तत्मत्पुरीवर्त्तिनेतव नीरंतटं नोऽस्माकंश्रमशमनधीरंश्रमस्यजन्ममरणखेदस्य शमनंनाशनं तत्रधीरंसमर्थंभवतुस्र
ल ४२ महादानैरिति महादानैर्भूमिसरस्वतीकपिलाप्रभृतिभिः। बहुविधवितानैर्नानाविधयज्ञैः विनानोयज्ञऽद्वो

निवासाद्लोकानांजनिमरणशोकस्यहरणं तदेतत्तीरंश्रमशमनधीरंभवतुनः ४२ महादानैर्ध्यानै
र्बहुविधवितानैरपिचयन्नलभ्यंघोरापिःसुविमलतपोराजिभिरपि॥

॥चैविस्तारेपुन्नपुंसकमितिमेदिनी

चपुनर्ध्यानैरपि। ध्यानलक्षणमुक्तं। समाहितेनमनसा। चैतन्यांतरवर्त्तिनाच्चात्मनोभीष्टदेवानांध्यानंध्यानमिहोच्यते
इति सुविमलतपोराजिभिरपि। अदोषाभिस्तपश्चर्यापंक्तिभिरपि। किंलक्षणाभिः घोराभिःक्लेशवहाभिः यत्नलभ्यं
नप्राप्यं तत् वाङ्मनोऽगोचरं अचिंत्यंअसंज्ञं। विष्णोर्व्यापकस्य परंस्थानंसायुज्यरूपं पदंव्यवसितत्रायास्थानलक्ष्मी
घ्रिवस्तुथित्यमाः तथाचश्रुतिः तद्विष्णोः परमंपदंसदापश्यंतिसूरयइति। एवंभूतंपदं। अखिलसाधारणत्यातर्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राणिसामान्यतया॰ ददानाप्रापयंतीत्वं। इहब्रह्मांडे॰ केनवस्तुनासाकं॰ तुलनीयातुलितुंयोग्याअसिभवसि। तत्रे॰ऽस्मभ्यं॰
कथयवद ४३ नयद्दिति॰ वेदैराम्नायैरपि॰ श्रुतिः स्त्रीवेदआम्नायइत्यमरः यत्साक्षात्प्रत्यक्षंननिगदितं॰ नवर्णितं॰
साक्षात्प्रत्यक्षतुल्ययोरित्यमरः। किंलक्षणैर्निगमैः। गलितभेदैः। गलितनिरस्तभेदोयेषांतैः। यस्मिन्जीवानांप्राणि
नां। जीवोब्रह्मप्रभेदस्याज्जीवः प्राणिनिगीर्ण्यनाविति विश्वः॰ मनोवागगोचरमित्यर्थ॰ यन्निराकारंनिरवयवंनित्यम॰

अचिंत्यंतद्विष्णोः पदमखिलसाधारणतया ददानाकेनासित्वमिहतुलनीयोकथयनः ४३ नयत्सा
क्षाद्वेदैरपिगलितभेदैर्निगदितं॰ नयस्मिन्जीवानांप्रभवतिमनोवागवसरः निराकारंनित्यंनिजमहि
मनिर्वासितनमोविश्वद्रुंयत्तत्वंसुरनटिनीनित्यंनविषयः ४४

विनाशि। पुनः किंलक्षणंनिजमहिम॰ राम:
निर्वासितनमः॰ निजेनस्वेनमहिम्नामाहात्म्येननिर्वासितंतमोऽज्ञानंयेनतत्॰ विश्वद्रुंसुराद्रयभूम्यं॰ नविषयः घ
टवन्न॰ हेसुरनटिनि॰ तत्वंसत्वंमसि॰ एतेनतत्वमस्यादिवाक्यैः प्रतिपादितमपरोक्षं॰ तत्त्वमेवासीतिभाव ४४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यजंत्येकेइति॥ एकेअन्येकठिनतरसेवानकठिनतराइः साध्यासेवासेवनंयेषांतान्। देवान्·यजंतिआराधयंति·तदप
रेतद्दितोविनानव्यासक्ताः विनानेयज्ञकर्मणि·व्यासक्तोविशेषेणआसक्ताः व्यासक्ताः। विनानोयज्ञविस्तारोल्वा
चेषुऋतुकर्मणीतिविश्वः कतिपयेकेचन·यमनियमरक्ताः यमाश्चनियमाश्च·यमास्तु·अहिंसासत्यमस्तेयम
संगाहीनसंचयाः·आस्तिकंब्रह्मचर्यंचमौनस्थैर्यंक्षमाऽभयमिति·नियमास्तु·शौचंजपस्तपोहोमश्रद्धाति·

यजंत्येकेदेवान्कठिनतरसेवांस्तद्दितो·विनानव्यासक्तायमनियमरक्ताः कतिपये
अहंतुत्वन्नामग्रहणाभृतकामस्त्रिपथगेजगज्जालंजानेजननितृणाजालेनसदृशं ॥ ५

थंमदर्चनं·तीर्थाटनंपगर्थेहातुष्टिराचार्यमेवनमिति·तेषुरक्ताः·अनुरक्ताआरक्ताइतियावत्·हेत्रिपथगेत्रि
पथगामिनि·अहंतुत्वन्नामग्रहणाभृतकामः। तवनामग्रहणात्वन्नामग्रहणं। ग्रहणंतूपलब्धौस्याद्दानेचग्रह
णेकरे। ग्रहोपरागेस्वीकारइतिविश्वः·त्वन्नामग्रहणेनस्वीकारेणाभृतः पूर्णः कामोऽभिलाषोयस्यसः। एतादृशः

सदं·जगज्जालंविश्वसम्
हं·तृणाजालेनतृणसमूहेनासदृशंतुल्य
जानेजानवान् ५५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अविश्रांतमिति॥ अविश्रांतं विश्रामरहितं यथास्यात्तथा। जन्मावधिः सुकृतकर्मार्जनवतां आजन्मपुण्यकर्मसंचयतां सतां सहस्रशः मुक्तं हरिणा। मनसि वचसि काये पुण्यपीयूषपूर्णाः परधनमुपकारश्रेणिभिः प्रीणयन्तः परगुणपरमाणूनपर्वतीकृत्य नित्यं निजहृदि विकसन्तः सन्ति सन्तः कियन्तः इति साधूनां श्रेयः कल्याणं कर्तुं विधातुं कतिविबुधा देवाः कृतिनः कुशलाना संतिभवंति अपि तु सर्वे भवंति तदुद्धरणं तु पिष्टपेषणवदिति भावः परं

अविश्रांतं जन्मावधि सुकृतकर्मार्जनवतां सतां श्रेयः कर्तुं कतिन कृतिनः संति विबुधाः
निरालंबानां कृतसुकृतानां च भवतीं विना सुभिल्लोके न परमिव लोकं हितकरं ४६

मुनिरालंबानां निर्गतः आलंबो आश्रयो येषां तेषां पुनः किं अकृतसुकृतानां अविहितपुण्यकर्मणां पुण्यहीनानामित्यर्थः प्राणिनामिति शेषः भवतीं त्वां विना अस्मिन् लोके मर्त्यलोके परमन्यहितकरं कल्याणकारकं नावलोकेन पश्यामि पापिनामुद्धारकरणे त्वमेव समर्थेति भाव ४६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वधानेति हेसुरधुनिदेवसरित् द्रागेवरुष्टिपेवद्रटिमरमणीयंद्रटिम्नादार्ढ्येन रमणीयंसुंदरंपरिकरंगात्रिकाबंधं भ
वेत्परिकरोबाहुपर्य्यंकपरिवारयो प्रगाढगात्रिकाबंधेइतिविश्वः वधान -- हेयुनः किरीटेमुकुटे वालेंदुंबालश
शिनंकिरीटस्थितमित्यर्थः पन्नगगणोः भोगिसमूहेउरगः पन्नगोभोगीत्यमरः नियमय दृढयइतरजनसाधार

वधानद्रागेवद्रटिमरमणीयंपरिकरं किरीटेवलिंदुंनियमयपुनः पन्नगगणोः नकु
र्यात्त्वंहेलामितरजनसाधारणतयाजगन्नाथस्यायंसुरधुनिसमुद्धारसमयः ४

णतया स्वल्पपातकिमनुष्यसामान्यतयाहेलामवज्ञांनकुर्य्याः माकुरुहेलावज्ञाविलासयोरितिविश्वः अ
यंसमुद्धारसमयः उद्धारकालः जगन्नाथस्योद्धारः नवान्यंतश्रमापादकइतिभावः ४ ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीं दूरस्थानां दुर्लभं गात्रानोदीनां मनस्याराणमुद्धृतये ध्यानमाह। शरदिति॰ शारचंद्रश्वेतां शरदिंदुसमुज्वलां शारचंद्र
स्यातिनिर्मलत्वात्तदुपमानं पुनः किंलक्षणां शशिशकलशोभालमुकुटं शशिशकलेनचंद्रखंडेन॰ शोभालशोभा॰
वान्मुकुटोयस्याः स॰ आदंतेभ्योलज्जिष्यतइतिवचनात्॰ मत्वर्थीयोलच्प्रत्ययः पुनः किंलक्षणां करैः हस्तैः कुंभां
भोजेकुंभश्चअंभोजंचकुंभांभोजे॰ कुंभसुधाघटः अंभोजंकमलंवरोनामभक्ताभिलाषदानसूचिकामुद्रा॰ भयनिरासः

शारचंद्रश्वेतां शशिशकलशोभालमुकुटां करैः कुंभांभोजेवरभयनिरासोचदधतीं सुधासाराकाराभर
णवसनांशुभ्रमकरस्थितांत्वांयेध्यायंत्युदयतिनतेषांपरिभवः ४८

भयस्यभीतेः निरासोनिरसनं अभ
यंदधतीं धारयंती॰ चपादपूरणे॰ पुनः किंलक्षणां सुधासाराकाराभरणवसनां आभरणानिचवसनानिच॰ सुधासार॰
स्यआकारइवआकारोयेषांतानिसुधासाराकाराणि॰ आभरणवसनानियस्यासौ॰ आभरणानिभूषणानि॰ व
सनानिवासांसिपुनः किंलक्षणां॰ शुभ्रमकरस्थितांश्वेतयाहवाहनांत्वांयेनराः ध्यायंतिहृदिशीलयंति॰ तेषांनरा॰
णां॰ परिभवस्तिरस्क्रियापापेभ्यइतिशेषः॰ नउदयतिनसमुदेति ४८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मंत्रैरिति·मंत्रैर्मंत्रभिर्मीलितं·निलीनं·औषधैर्भैषजैर्मुकुलितं संकोचितं·सुराणां देवानां गणैः समूहैः रुद्रादिभिः त्रस्तभी
तं·गारुत्मतैर्गरुडानिभिः·गारुत्मतो गरुडानिर्गरुडोऽहीराइत्यपानिकेशवः यावभिर्मणिभिः विदलितः विदीर्णः·वीचि·
क्षालितकालियाहितपदे·वीचिभिरूर्मिभिः क्षालिता कालियस्य नागविशेषस्य·अहित·शत्रुर्विष्णु·तस्य पदं चरणो यया
सा तत्संबुधौ·हे स्वच्छैकिकच्छोलिनि·अधुनाइदानीं·मंत्रादिभिरुपेक्षितकालेइत्यर्थः भवसंसारएव व्यालः सर्पस्तेन अ·

मंत्रैर्मीलितमोषधैर्मुकुलितं त्रस्तसुराणां गणैः स्वस्तकिंचसुधारसैर्विदलितं गारुत्मतैर्यावभिः वीचिक्षा·
लितकालियाहितपदे स्वच्छैकिकच्छोलिनि त्वं तापांतिरयाधुनाममभवव्यालावलीढात्मनः ४९ घूतेना
गेंद्रक्षत्तिप्रमथफणिमणिश्रेणिनंदीदुमुख्यं·

वलीढोदष्टः आत्मदिहोपस्यतस्य·भवव्यालावलीढात्म·
नोममतापांतिरयतिरस्कुरु·एतेनजगत्पालकस्य विष्णो·कालियविषसमाक्रांतपदं क्षालितं निर्विषीकृतं·तर्हि भवस·
र्पदष्टस्य ममतापापनोदे·कियान्तवप्रयासइतिभावः शार्दूलविक्रीडितं वृत्तं ४९ घूतेइति·घूतेउरोदेप्रवृत्ते
सति·पार्वतीमहादेवयोरिति शेषः·नागेंद्रक्षत्तिप्रमथफणिमणिश्रेणिनंदीदुमुख्यं·नागेंद्रस्य गजेंद्रस्य गजामुर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जयंती·नस्यक्षत्रिश्चर्म·क्षत्रिश्चर्मत्वबोर्भूर्जेइतिमेदिनी·प्रमथापारिषदाः प्रमथाःस्युः पारिषदाइत्यमरः फणिनांसर्पाणां
मणिश्रेणिर्मणिपंक्तिः·नंदीवाहनवृषभः इंदुश्चंद्रः तेचतेमुख्याआदयोयस्मिन्नतत्·एतादृशंसर्वस्वसमलधनं हार·
यित्वापराधीननांप्रापयित्वा·अथसर्वस्वपराजयानंतरं पुरभिदिपुराणिभिनत्तीतिपुरभित्·तस्मिन्पुरभिदिमहादे
वे·शाकरुष्टिति·स्वंआत्मानंस्वंज्ञातावात्मधनयोरात्मीयेपिप्रचक्षतइतिविश्वः परीकर्तुकामेसहीविधातुकामस
ति·ननुजगद्गुरोर्महादेवस्येदमनुचितंतदेवंन·कुतः यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरोजनः सयत्प्रमाणंकुरुतेलोकस्तद

सर्वस्वंहारयित्वास्वमथपुरभिदिशाकपरीकर्तुकामे·

नुवर्तनइति·सत्पथगर्हंघृतमसमंजसमिति चेदुच्यतेमहादेवक्रीडनं देवेश्वरवक्रीडाखिलंब्रह्माण्डगोलकं·मासा·
द्वादशयेनाथतेसारिफलकेरनहाः· कृष्णाकृष्णेनायावैतिथयस्तास्त्रसारिका· द्विपंचदशमासेयास्त्वक्षयुग्मंतथा·
यने·सृष्टिप्रलयसंज्ञौरनहोजयपराजये·देवीजयेभवोत्सृष्टिरुत्सृष्टिर्भूर्जटेर्जये भवतोःखेलसमयोयस्यस्थितिरुदा
हृता·इत्थंक्रीडेवसकलमेतद्ब्रह्मांडमीशयोरिति स्कंदपुराणे नारदवचनात्· घृतंप्राकृतं·प्राकृतातिरिक्तस्यतस्यतु
नदोष·तथाचोक्तंभागवते·तेजीयसांनदोषायवह्नेःसर्वभुजोयथेति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महतां क्रीडनं सृष्टिस्थितिप्रलयापादकमित्यलं पल्लवितेन मृदुलं मदं हसितया हासं विदधत्या यदाश्रयात्वं समदधी
नतां प्राप्तश्चेत्तमपि प्राप्नोमि पूर्वं त्वया हं क्लेशितदानीं त्वामहं क्लेशयामीति भावः हे भवत्या हिमवते। हिमात्वयस्याप
त्यस्त्री हे भवती गौरी हरीतकी हे भवती गौरी भृङ्गवचापि चेति त्रिकांडशेषः साकूतं सावज्ञानं यथास्यात्तथा अथा
कूतं त्वाशयः स्यादवज्ञानमपाप्यय इति केवः वीक्षितायाः आलोकितायाः तव व्यालोलो ह्वासि। व्यालोलं सपत्नीप
राभवभीत्या कंपितं सत् उद्ह्वासि उद्गतो विगतो लासो विलासउद्ह्वासः सोस्याली इति उद्ह्वासि पुनः किं लक्षणं वल्गाह्व

साकूतं हे भवत्या मृदुलहसितया वीक्षितायाः लवांबुव्यालोलो ह्वासि वल्गाह्व हरिनवघटतांडवं नः पुनीतां

५०

हरिनवघटतांडवं वल्गाह्व हरीणां चंचद्ह्व हरीणां नवाभिः सद्यः कालीनाभिः घटाभिः घटनाभिः तांडवं नर्तनं इ
तस्ततो भ्रमणं यस्य तत् घटा घटनगोष्ठीभ घटनासु च दृश्यत इति विश्वः एतादृशं अंबुजलं नोऽस्मान् पुनीतां पुना
तु न तत्पराधीनायास्तस्याः अंबुकथं पावनसमर्थमिति चेत् उच्यते महतां दुःखमप्यन्येषां सुखायेत्यतो न शंक्यं क
शः उक्तं च महतो रुजन्नपि गुणाय महानिति पुष्पदंतोपि सकल्माषः कण्ठेन वनकुरुतेन श्रियमहो विकारेपि श्लो
घ्यो भुवनभयभंगव्यसनिन इति स्वयंवृत्तमेतत् ५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दरस्मितेनेतिशंतनो॰नृपविशेषस्यअंगनागृहिणी ममतनोशरीरस्यसपदिनक्कालंशंकल्याणं॰ततोनुविलास्यन्॰किंल
क्षणा॰चिदेकमयचंद्रिकाचयचमत्कृतिंतन्वती॰चिनःसंविदःएकमयीकेवलप्रचुरा॰एकंतुकेवलेश्रेष्ठेइतिविश्वः
याचंद्रिकाअज्ञानतमोविनाशिनीज्योत्स्ना॰चंद्रिकाकौमुदीज्योत्स्नेत्यमरः॰तासांचयस्यसमूहस्य॰चमत्कृतिंच

दरस्मितसमुच्चसद्वदनकांतिपूरामृतेर्भवज्वलनभर्जितानिशमूर्जयंतीजनान् चिदेकमयचंद्रि
काचयचमत्कृतिंतन्वतीततोनुममशंततोःसपदिशंततोरंगना ५१

मत्कारंतन्वतीविलास्यंती॰प्र

नःकिं॰दरस्मितसमुच्चसद्वदनंकांतिपूरामृतेः दरवत्शंखवत्॰स्मितंउज्ज्वलंईषद्विकसितदंतंहास्यंतेन॰समुच्च
मनद्वदनकांतिनांमुखरुचीनांपूरःप्रवाहःपरंपरेतियावत्॰अतएवअमृतानिपीयूषाणिपीयूषमृतंसुधेत्य
मरःतैकरणैःभवज्वलनभर्जितान्भव॰संसारएवज्वलनोग्निस्तेनभर्जितान्तुष्टान्नानमनुष्यान्॰अनिशंनि
रंतरं॰ऊर्जयंतीप्रीणयंतीपृथ्वीवृत्तमतत् ५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विभूषितेति·गंगाभागीरथी·समांगानिशरीरावयवान्·अंगंप्रतीकोवयवइत्यमरः·अमलीकरोतुः निष्पापानि·
विदधातु·किंलक्षणाअनंगस्य·कामदेवस्य·रिपुर्महादेवः तस्योत्तमांगंमस्तकंउत्तमांगंशिरः शीर्षंमूर्द्धानाम
स्तकोत्त्रियामित्यमरः विभूषितंशोभितंअनंगरिपूत्तमांगंयया सापुनर्किं॰ सद्यः दर्शनसमकालंकृतः विहितः

विभूषितानंगरिपूत्तमांगा·सद्यःकृतानेकजनार्तिभंगा·
मनोहरोत्तुंगचलत्तरंगा·गंगासमांगान्यमलीकरोतु ५२

अनेकजनानामसंख्यमनुष्याणांआर्त्ते·पीडायाः भंगछेदोयया साभंगस्तरंगोरुभेदेछेदेजयविपर्ययेइति
विश्वः मनोहराः मनोहारिणः उत्तुंगाउन्नताः चलभस्तरंगाउर्मयोयस्यांसा·मनोहरोत्तुंगचलत्तरंगा·उपजातिवृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीं स्तोत्रनाम·स्वनामनिबंधनपूर्वकं स्तोत्रपठनफलमाह· इमामिति इमां उक्तलक्षणां·पीयूषलहरीं पीयूषस्यामृतस्य·ल
हरीव लहरी·पीयूषलहरी·तां पठनकर्तॄणां·मोक्षदायकदादक्षरूपायाः स्तुतेः पीयूषलहरीत्वेनोपमानं जगन्नाथेन जग
न्नाथनाम्नाकर्त्रा·निर्मितां कृतां·यः पुमान् पठेत् तस्य पुंसः सर्वत्र सर्वकालं जयसंपदः सर्वोत्कर्षसंपदः जायंते उत्पद्यंते

इमां पीयूषलहरीं जगन्नाथेन निर्मितां यः पठेत् तस्य सर्वत्र जायंते जयसंपदः ५३
इति श्रीजगन्नाथविरचितापीयूषलहरीनाम गंगास्तुतिः समाप्तम् शुभम्

400

इति शिवम् ५३ संवद्वेदरसद्विदंतकुमिते १८६४ वर्षे शुभे माधवे मासे कृष्णदलेशशांकदिवसे श्रीद्वादशीसत्तिथौ·
दुर्गारामतनूजनिर्दलपतिर्गंगालहर्य्यास्तुतेश्टीकां वालविबोधिनीं सुरसाद्भागीरथीप्रीतये १ इति श्रीदुर्गारामसू यमः
रिसुतदलपतिरामविरचितागंगालहरीटीका वालबोधिनीनाम्नी समाप्ता· भागीरथीप्रीयतामिति शुभम् ४ ॥ २८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu